लक्षालङ्कारः-भुक्तवज्जनसंवृत इत्यत्र भुक्तवन्तश्च ते जनाश्च भुक्तवज्जनाः । रत्नोपहारकर्मण्यः रत्नोपहाराख्यकर्मवान् ।

इडाज्यहोमाहुतिभिर्मन्त्रशिक्षाविशारदैः ।
तस्मिन्हि ततृपुर्देवास्तते यज्ञे महर्षिभिः ।। ७३ ।।(०३)

यथा देवास्तथा विप्रा दक्षिणान्नमहाधनैः ।
ततृपुः सर्ववर्णाश्च तस्मिन्यज्ञे मुदान्विताः ।। ७४ ।।(०४)

## अस्मिन् पर्वणि ३० अध्याये ७४ श्लोकाः सन्ति

(०१) (१) न; तु; नु; च देवः (२) यत्राग्निनाथ; वितिषटेन; ऋषज्ञीन षडग्नीनथ; षडग्निना; च (for (अ) थ); (४)(ऽ)यमद् (for ऽयजद्) दक्षिणावतां; वृतान्; (५) सर्वाजनान्; सर्वं जनं; सदा कामैः; सर्वाञ्जनपदान्कामैः (६)संवृद्धैः (for समृं); .

(०२) (१) अन्नादी; बहुभक्षः; भक्ष्यैः; दक्षः (अ) थ (for च); अन्नवन्बहुभक्षांश्च; (२)मुक्तवत् (for भुं); नसम्भृतः भोक्तव्यं जनसंवृतः; भुक्तः सज्जनसं; (३) क- अन्नोपहारकर्मण्यो बभूव स समागमः । क- अन्नोपहारसभ्पन्नो बभूव. रत्नोपहारः कर्मण्यो; रत्नोपकारं; रभोपहारं; (for रत्नापहारकर्मण्या; रत्नोपहार (चय)सम्पन्नो; हारकर्माणो; अन्नोपहानकर्मभ्यो; रत्नोपहारकरणे; रक्षोपहारकर्मण्यो (रक्षसां नाशे साधुना कर्मणा युक्तः) ० (४)महानृपः; समागतः;.

(०३) (१) इडाज्य(थ) सो (सा)माहुतिभिद्; इडोज्यहोमां; तिलाज्यहोमां; ईज्याहोमां इध्माज्यसोमां; ; ळानसोमानाहुतिर्; ळान्नसोमाहुतिभिर्; ; ळाज्यहोमां; इडा; (२) क- मन्त्रशिक्षा. मन्त्रशिष्या; (ष्यान्); शिख्या; मन्त्राक्षर (for मन्त्रशिक्षा); विशारदैः; समाहितैः; (३)तस्मिंस्तु; हुतेग्नौः; तस्मिन्वै; यथोक्तैसू; तस्माद्धि (for तस्मिन्हि); (४) भूते; ततो (तस्मिन्); सूते (for तते); यज्ञ; यज्ञि (for यज्ञे); सूतयज्ञो (for तते यज्ञे); मनीषिभिः; सहर्षिभिः;.

(०४)(२)दक्षिणानां; णाभिर् (for णान्न); (३) ससवर्णाश्च; (४) यज्ञे तस्मिन्; मुदा युताः; महात्मनः; राजस्य परिकर्मनियोगः.

## राजसूयपर्वणि(२) द्वितीयोऽध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि राजसूयपर्वणि यज्ञकरणे त्रिंशोऽध्यायः।। ३०।।

**(समाप्तं च राजसूयपर्व)**

# ३१. एकत्रिंशोऽध्यायः

# अर्घाभिहरणपर्व

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये
जानमानोऽपि नृपतिः सर्वपूज्यतमं हरिम् ।
संशयं भूभृतां भेत्तुं भीष्मं पप्रच्छ धर्मवित् ।।२३२।।
नास्ति नारायणसममिति वादेन निर्णये ।
कृते ब्रह्मादिभिरपि कृष्णं मर्त्यं हि मेनिरे ।।२३३।।
नृपास्तस्मादयं कृष्णो नारायण इति स्म ह ।
सम्यग् ज्ञापयितुं धर्मसूनुर्भीष्ममपृच्छत ।।२३४।।
ब्रह्मादयः सुरा यस्माद् दृश्यन्ते मर्त्यवन्नृभिः ।
न चैवातितराभ्यासो नृणामस्ति मुनिष्वपि ।।२३५।।
सर्वशास्त्रविदं भीष्मं जानन्त्येते नृपा अपि ।
तस्माद् भीष्ममपृच्छत् स कुलवृद्धत्वतस्तथा ।।२३६।।
पितामहाग्रपूजार्हः कोऽत्र लोकसमागमे ।
ब्रह्मशर्वादयश्चात्र सन्ति राजान एव च ।
इति पृष्टोऽब्रवीद् भीष्मः कृष्णं पूज्यतमं हरिम् ।।२३७।।
यद्यप्येकस्त्रिधा विष्णुर्वसिष्ठभृगुवृष्णिषु ।
प्रादुर्भूतस्तथाऽप्येते नृपा हि व्यासरामयोः ।।२३८।।
विप्रत्वान्न विरुद्ध्यन्ते तत एव च युक्तताम् ।
मन्यन्ते न विरोधश्च तेषां तत्र हि तादृशः ।।२३९।।
अविवादे प्रसिद्धिश्च नैवास्य भविता क्वचित् ।
तस्मात् कृष्णाय दातव्यमिति भीष्मेण चिन्तितम्।।२४०।।
कृष्णाय दत्ते राजानो विवादं कुर्युरञ्जसा ।

विवादेन च कीर्तिः स्याद् वासुदेवस्य विस्तृता ।
ततः कृष्णायाग्रपूजा दत्ता पार्थैर्जगत्पुरः ।।२४१।।
व्यासभार्गवयोः साक्षात् तदैक्यात् तदनन्तरम् ।
अग्र्यां पूजां ददुश्चान्यान् यथायोग्यमपूजयन् ।।२४२।।

## 2- 05- 31

अभिषेचनदिने ब्राह्मणादीनामन्तर्वेदिप्रवेशः ।। १ ।। भूभारभपणे नारदचिन्तनम् ।। २२ ।। पुर्व संक्षिप्योक्तायाः कृष्णागमनकथायाः किञ्चिद्विस्तरेण कथनम् ।। ३ ।। सहदेवेन भीष्माज्ञया श्रीकृष्णस्याग्रपूजाकरणम् ।। ४ ।। शिशुपालेन श्रीकृष्णस्याग्रपूजाया असहनम् ।। ५ ।। राजसूये ब्राह्मणानां नृपाणां च समागमः ।। नारदस्य श्रीकृष्णमाहात्म्यवर्णनम् ।। भीष्मस्यानुज्ञया श्रीकृष्णस्याग्रपूजा ।।

### वैशम्पायनः

ततोऽभिषेचनीयेऽह्नि ब्राह्मणा राजभिः सह ।
अन्तर्वेदीं प्रविविशुः सदस्यार्थं महर्षयः ।। १ ।।(०१)

लक्षालङ्कारः-अन्तर्वेदिं इत्यत्र 'वेदिः परिष्कृता भूमिः' इति वचनात् ब्राह्मणानामुपवेशार्थं शालान्तरालङ्कृता भूमिः अन्तर्वेदिः ।

नारदप्रमुखास्तस्यामन्तर्वेद्यां महात्मनः ।
समासीनाः शुशुभिरे तत्र वै राजर्षिभिसहा ।(०२)
समेता ब्रह्मभवने देवैदेवर्षयो यथा ।। २ ।।(०३)

---

(०१) (१) ०नीयेन; ०नायैव; ०नीये च; ०नीये तु (for ०नीयेह्नि); तमाभिषेचनीये च; अभिषेचनीयेनयुधिष्ठिरेणेति शेषः । अथ वा अभिषेचनीयं अभिषेचनं तेन हेतुना; (२) ब्राह्मणै; समं (for सह); (३) अन्तर्वेदिं; ०र्वेदो ०र्वेद्यां; (४) सत्कारार्थैः सत्काथं च; सत्कारार्हाः; स (सा) दस्थाथं (र्धै; र्थे);.

(०२) (१) तस्या; तस्य (for तस्याम्); (२) महर्षयः (for महात्मनः); (३) समानीताः; समानीतैः; सहासीनाः; (४) तथा (for तदा); तत्र वै राजभिः सहः तत्र (दा) राजर्षिभिः सह;.

(०३) (१) ब्रह्मवदने; ०सदने; (२) देव; देवैर् (for देवा); देवर्षिभिर् (for ०र्षयो);
तथा (for ०यथा);.

कर्मान्तरमुपासन्तो जजल्पुरमितौजसः ।। ३ ।।

लक्षालङ्कारः-कर्मान्तरम् इत्यत्र अन्यदन्यत्कर्म कर्मान्तरम् ।

एवमेतन्न चाप्येवमेवं चैतन्न चान्यथा ।
इत्यूचुर्बहवस्तत्र वितण्डानाः परस्परम् ।। ४ ।।[०१]

लक्षालङ्कारः-वितण्डानाः परस्परम् इत्यत्र एवमेतत्, एतदेवं च नेत्याद्याकारेण वितण्डावादं कुर्वन्तः जजल्पुरिति पूर्वेणान्वयः ।

कृशानर्थांस्ततः केचिदकृशांस्तत्र कुर्वते ।
अकृशांश्च कृशाश्चक्रुर्हेतुभिः शास्त्रनिश्चयैः ।। ५ ।।[०२]

तत्र मेधाविनः केचिदर्थमन्यैप्रपूजितम्।
विचिक्षिपुर्यथा श्येना नभोगतमिवामिषम् ।। ६ ।।[०३]

केचिद्धर्मार्थसंयुक्ताः केचित्तत्र महाव्रताः ।
रेमिरे कथयन्तश्च सर्वभाष्यविदां वराः ।। ७ ।।[०४]

---

(०१) (१) इदमेव; एवमेतन्; एवमेवं; वा (for च); एवमेतन्न वाप्येव (०चाप्येत) म्; एवमेतं न वाप्येदम्; एवं ते तत्र चाप्येवम्; (२) एवमेव; एवमेवं; एवं चैतन्; एवं चैव; वान्यथा; एवं वै तत्र नान्यथा; एवमेवान्यथान्यथा; एवं चेदन्यथा यथा; (३) प्रत्यूचुर्; (४) विवृण्वानाः; वितण्डां (०डा) वै; वितण्डा (०डां) श्वः वितडानां (०नः) वितन्वानाः; वितण्डावादं (कुर्वतः); वितण्डां; वितण्डा (०तडं) वादिनो द्विजाः;.

(०२) (१) कृतान्; कृशान्; अर्चास्; अन्यांसू (for अर्थासू); ततः; तदा (for तथा); (२) अकृतासू; अकृशा (सा) स् (for अकृशांसू); तत्र; अकृशांश्च क्रिरे मिथः; (३) चके; चक्राद्; अकृतांश्च कृतांश्चैव; अकृषांश्च कृषाश्चक्रुर; अकृशाश्चक्रु हेतुभिः; कृशांश्चैव कृशांस्तत्र; (४) बहुभिः (for हेतु); शास्त्रनिश्चयैः सर्वशास्त्र विनिश्चितैः;.

(०३) (१) अथं; अत्र; तत्र; (२) तत्र; अन्यम् (for अर्थम्); अनुमानैः (for अर्थमन्यैः); उदी (०क्षी) रितं; प्रपूरितं (समर्थितं); (३) विचिक्षेपुर्; तथा(for यथा); सेनो; श्येनो (०न); सेना (for श्येना); विचिविक्षिप्प्यर्यथा श्येना;.

(०४) (१) केचिदुन्मार्गकुशलाः; ०द्धर्मार्थ कुशलाः; (२) केचित् (for कथास्); प्रभाषिरे; महाप्रभाः; त्मनः (for ०व्रताः); (३) रेमिरे कथयस्तत्र; (४) सर्वभाष्यविदां; सर्वे वेदं;.

सा वेदिर्वेदसम्पन्नैर् महार्षिद्विजपार्थिवैः ।
आबभासे समाकीर्णा नक्षत्रैर्द्यौरिवामला ।। ८ ।।(०१)

न तस्यां सन्निधौ शूद्रः कश्चिदासीन्न चाव्रत : ।
अन्तर्वेद्यां महाराज न्युधिष्ठिरनिवेशने ।। ९ ।।(०२)

तां तु लक्ष्मीवतो लक्ष्मीं तभा यज्ञविधानजाम् ।
तुतोष नारदः पश्यन्धर्मराजस्य धीमतः ।। १० ।।(०३)

अथ चिन्तां समापेदे स मुनिर्मनुजाधिप ।
नारदस्तु तदा पश्यन्सर्वक्षत्रसमागमम् ।। ११ ।।(०४)

सस्मार च पुरा वृत्तां कथां तां पुरुषर्षभ ।
अंशावतरणे यासौ ब्रह्मणो भवनेऽभवत् ।। १२ ।।(०५)

देवानां सङ्गमं तं तु विज्ञाय कुरुनन्दन ।
नारदः पुण्डरीकाक्षं जकाम, मनसा हरिम् ।। १३ ।।(०६)

---

(०१) (१) वेदैर्; वेदी (for वेदिर्); वेदसम्पन्ने; (२) देवैर्द्विजमहर्षिभिः; देवद्विजमनीषिभिः; महर्षिद्वि (हद्विर्द्वि) जपार्थिवैः; (३) आबभाषे; आविभागे; अव (०ब) भासे; (४) नक्षत्रे; ०रिवायता; रिवामरा; रत्नैर्द्यौरिव निर्मला;.

(०२) (१) तस्याः; ०स्य (for ०स्यां); शूराः (for शूद्रः); (२) अस्यां (for आसीन्); उताव्रती (न वाव्रती) (for न चाव्रतः); बाब्रतः; चावृतः; चान्नती , (ब्राह्मणः); चाव्रवीत्; चानृतः; कश्चिदासीदनावृतः; (३) अतर्वेद्यासू; द्या; ततो राजन्; तथा राजन्; महाराज; (४) निवेशनं;.

(०३) (१) च (for तु); लक्ष्मीयुतो; नित्यं (for लक्ष्मीं); (२) तथा (for तदा); यज्ञविधानतां; ०वितानजां; (४) पश्यतः; धीमतेः (for धीमतः);.

(०४) (२) स पुनर्; स मन्युर्; स ऋषिभिर्; मनुजाधिपः; ०धिपान् (३) नारदस्तत्; दस्तु; तथा; सदा (for तदा); प्रापत् (for पश्यन्); नारदस्तत्र चापश्यत०); (४) सर्वक्षेत्र; क्षत्रसमागमान्; ०गतं;.

(०५) (१) स सस्मार; पुरावृतां; पुरां (परा) वृत्तां; पुरावृत्तं (०वृत्तान्); प्रवावृत्तां; (२) कथं तां; कथितान् (for कथां तां); भरतर्षभः; पुरुषर्षभ (०भः); मनुजाधिप (पः); मनुजर्षभ; तं तं भरतसत्तम; (३) योसौ; वासौ०; या तु; या सा; पूर्वं; राज्ञां (for यासौ); (४) ब्राह्मणो; ब्रह्मण्यो; भुवने;.

(०६) संविदं; शङ्करं; सङ्गरं; बभव; सङ्गमे । तांस्तु; तत्तद्र ) ए० यु रुनन्दनः; यदुनन्दनं) नारद) पुडरीकाक्ष ०) जगाम । सस्मार) .

साक्षात्स विबुधारिघ्नः क्षतौ नारायणो विभुः ।
प्रतिज्ञां पालयंन् धामात्र जातः परपुरञ्जयः ।। १४ ।।(०१)

सन्दिदेश पुरायोऽसौ विबुधान जकतः प्रभु ः ।
अन्योन्यमभिनिघ्नन्तः पुनर्लोकानवाप्स्यथ । १५ ।।(०२)

इति नारायणः शम्भुर्भगवान्भूतभावनः ।
आदिश्य, विबुधान्सर्वानजायत यदोः कुले ।। १६ ।।(०३)

क्षितावन्धकवृष्णीनां वंशे वंशभृतां वरः ।
परया शुशुभे लक्ष्म्या नक्षत्राणामिवोडुराट् ।। १७ ।।(०४)

यस्य बाहुबलं सर्वे, ः सुराः सेश्द्रा उपासते ।
सोऽयं मानुषइपेण, हरिरास्तेऽजनार्दनः ।। १८ ।।(०५)

अहो बत महद्भूतं स्वयम्भूर्यदिदं स्वयम् ।
आदास्यति पुनः क्षत्रमेवं बलसमन्वितम् ।। १९ ।।(०६)

लक्षालङ्कारः-आदास्यति 'दो अवखण्डने' इति धातोः आ समन्तात् संहरिष्यति ।

इत्येतां नारदश्चिन्तां चिन्तयामास धर्मवित् ।

---

(०१) (१) साक्षात् स; स्व (for स); विविधारिन्धः; (२) क्षेत्रे; क्षे (क्ष) त्रं; क्षात्रे; क्षितौ; नारायणे; हरिः; प्रभुः (for विभुः); (३) प्रतिज्ञापालनं; ज्ञां धारयन्; श्रीमात्र्; चेमां; धामां (for धीमात्र्); (४) जातं;.

(०२) (१) पुरं; (२) विबुधा; विर्वि (धा)न्; (३) ०मपि निघ्नन्तः; मभिमिघ्नन्त; (४) लोकमवा;.

(०३) (१) देवो; शम्भुं; शम्भुं (ब्रह्माणं); (२) भूतभावनः; जगतः पतिः (for जगतः प्रभुः); (३) आ (अ) दित्य; आविश्य; भगवान् (for विबुधान्); (४) अवतीर्य (for अजायत); यदोः कुले; यदुक्षये (यदुगृहे); निजायत्तत्तदुक्षये;.

(०४) (१) क्षितो बन्धूकदृष्णीनां; स्थिता वन्धक; (२) वंश (for वंशे); वंशवतां; , (३) श्रीमान् (for लक्ष्म्या); (४) ०मिवोडुराट्; ०मिवेदुराट्;.

(०५) (१) बाडत्रबलस्ये (०से) द्राः; सर्वे; सर्वं (for सेन्द्राः); (२) नित्यं; सदा; शूराः (for सुराः); सर्वम्; सेद्रा (for सर्व); (३) मानुषदेहेन (देहस्थ); रूपेण; देहस्तु (for ०वन्नाम); नाम (स्फुटं); (४) जनार्दनः (for रिमर्दनः);.

(०६) (१) महद्रूपं; (२) स्वयम्भुर्; यमिदं; यत्तदा (for यदिदं); इदं उपनीतां; (३) प्रादास्यति; आधा०; आदा; दो अवखण्डन इति धातोः आ समन्तात् संहरिष्यति; (४) बलसमन्वितः; बहुसमन्वितं;.

हरिं नारायणं ज्ञात्वा यज्ञैरीज्यं तमीश्वरम् ।। २० ।।(०१)

लक्षालङ्कारः-यज्ञैरिज्यम् इत्यत्र इज्यं पूजायोग्यम् ।

तस्मिन्धर्मविदां श्रेष्ठो धर्मराजस्य धीमतः ।
महाध्वरे महाबगहुस,स्थौ स बहुमावान्ः ।। २१ ।।(०२)

ततस्समुदिता मुख्यैः गुणैर्गुणवतां वराः ।
बहवो भावितात्मानः पृथक्पृथगरिन्दमाः ।। २२ ।।

आत्मकृत्यमिति ज्ञात्वा पाञ्चालास्तत्र सर्वशः ।
समीयुर्वृष्णयश्चैव तदाऽनीकाग्रहारिणः ।। २३ ।।

सदारास्सजनामात्या वहन्तो रत्नसञ्चयान् ।
विकृष्टत्वाश्च देशस्य गुरुभारतया च ते ।। २४ ।।

लक्षालङ्कारः-विकृष्टत्वात् इत्यत्र भूशोधनार्थं लाङ्गलेन देशानां विकृष्टत्वात्। तस्य च देशस्याल्पत्वादिति भावः ।

ययुः प्रमुदिताः पश्चाद् भगवन्तं समन्वयुः ।
बलं शेषं समुदितं परिगृह्य समन्ततः ।। २५ ।।

अजः चक्रायुधश्शौरिः अमित्रगणमर्दनः ।
बलाधिकारं निक्षिप्य सम्मान्यानकदुन्दुभिम् ।
सम्प्रायाद्यादवश्रेष्ठो यजमाने युधिष्ठिरे ।। २६ ।।(०३)

उच्चावचमुपादाय धर्मराजाय माधवः ।
धनौघं पुरतः कृत्वा खाण्डवप्रस्थमाययौ ।। २७ ।।

---

(०१)(२) सर्वं (for धर्म); (३) हरिं; ध्यात्वा; कृत्वा; मत्वा (for ज्ञात्वा); (४) यज्ञैरिज्यं (पूजायोग्यं); ०रीज्यं; यज्ञेराजं; यज्ञैरिड्यं; रीड्य; महेश्वरं; अधीश्वरं (for तमी);.
(०२) (१) धर्मवतां; ०बिदः; भृतां (for विदां); श्रेष्ठे (for श्रेष्ठो); (३) महाबाहुस् ०तेजासू; ०बाहो (for ०बुद्धिस्); (४) बहुमानितः; ०मानवान्; मानवित् (०वत्); मा न;.
(०३) (१) राज्ञां (३) बलाधिकारे

तत्र यज्ञागतान् सर्वांश्चैद्यवक्रपुरोगमान् ।
भूमिपालगणान्सर्वासप्रभानिव तोयदान् ॥ २८ ॥[०१]

मेघकायान्निश्श्वसतो यूथपानिव यूथपः ।
बलिनस्सिंहसङ्काशान्महीमावृत्य तिष्ठतः ॥ २९ ॥

ततो जनौघसम्बाधं राजसागरमव्ययम् ।
नादयन् रथघोषेणाभ्युपायान्मधुसूदनः ॥ ३० ॥[०२]

लक्षालङ्कारः-रथघोषेण तान् यज्ञागतान् चैद्यादीन् सर्वान् नादयन् सन् उपायात् सभामध्यमुपायात् ।

असूर्यमिव सूर्येण निवातमिव वायुना ।
कृष्णेन समुपेतेन जहर्षे भारतं पुरम् ॥ ३१ ॥

ब्राह्मणक्षत्रियाणां हि पूजार्थं सर्वधर्मवित् ।
सहदेवो विशेषज्ञो माद्रीपुत्रः कृतोऽभवत् ॥ ३२ ॥

प्रभवन्तं तु भूतानां भास्वन्तमिव तेजसा ।
प्रविशन्तं यज्ञभूमिं सितस्यावरजं विभुम् ॥ ३३ ॥[०३]

लक्षालङ्कारः- सितस्य बलरामस्य

तेजोराशिमृषिं विप्रमदृश्यं वै विजानताम् ।
वयोधिकानां वृद्धानां मार्गमात्मनि तिष्ठताम् ॥ ३४ ॥

जगतस्तस्थुषश्चैव प्रभवाप्ययमच्युतम् ।
अनन्तमन्तं शत्रूणाममित्रगणमर्दनम् ॥ ३५ ॥

भगवन् सर्वभूतानामापत्स्वभयमच्युतम् ।

---

(०१) (२) पश्यन् चैद्यवर्गसमागतान्

(०२) (२) ह्युपायान्

(०३) (३) विशन्तं यज्ञभूमिं तं

भविष्यं भावनं भूतं द्वारवत्यामरिन्दमम् ।। ३६ ।।[०१]

लक्षालङ्कारः-भगवान् सर्वभूतानाम् इत्यारभ्य खाण्डवप्रस्थमाययौ इत्यन्तश्लोकानामयं भावः – हे अरिन्दम जनमेजय यः यादवश्रेष्ठो माधवः आनकदुन्दुभिं बलाधिकारं सेनानायकं द्वारवत्यां निक्षिप्य धर्मराजाय उच्चावचं धनौघं पुरतः कृत्वा खाण्डवप्रस्थं यज्ञारम्भात् प्राक् आययौ, ऋजुम् अनुग्रवत्स्थितं, चक्रायुधं, शौरिं, जगतस्तस्थुषश्चैव प्रभवाप्ययं, अच्युतं, अनन्तं, शत्रूणां अन्तं, अत एवामित्रगणमर्दनं, सर्वभूतानां प्रभवं, अच्युतं यथा भवति तथा आपत्सु आश्रयं, भविष्यं उपरि बुद्धादिरूपेणावतरिष्यन्तं, भावनं इदानीं कृष्णव्यासादिरूपेण वर्तमानं, भूतं मत्स्यादिरूपेण प्रागवतीर्णं, तेजोराशिं, ऋषिम् अदृश्यं दर्शनायोग्यं तमेनं कृष्णं दृश्यं प्राकृतं जनमिव जानतां वयोतिगानां वृद्धानाम् अत एव मार्गमावृत्य तिष्ठतां सतां, युधिष्ठिरे यजमाने सति द्वारवत्यां समुदितम् अमित्रगणमर्दनं शेषम् अवशिष्टं बलं सैन्यं समन्ततः परिगृह्य सम्प्रायात् यज्ञसभां विहाय महासभां प्रत्येव आगतवान् ।

स दृष्ट्वा कृष्णमायान्तं प्रतिपूज्यामितौजसम् ।
यथार्हं केशवे वृत्तिं प्रत्यपद्यत पाण्डवः ।। ३७ ।।

ज्यैष्ठ्यकानिष्ठ्यसंयोगं सम्प्रधार्य गुणागुणैः ।
आरिराधयिषुर्धर्मः पूजयित्वा द्विजोत्तमान् ।। ३८ ।।

महदादित्यसङ्काशमासनं च जगत्पतेः ।
तमनासादितं कैश्चित्तस्मिन्नुपविवेश सः ।। ३९ ।।[०२]

लक्षालङ्कारः-आसनं च जगत्पतेरित्यत्र ददाविति योग्यपदाध्याहरः ।

ततो भीष्मोऽब्रवीद्राजन्धर्मराजं युधिष्ठिरम् ।
क्रियतामर्हणं राज्ञां यथार्हमिति भारत ।। ४० ।।[०३]

आचार्यमृत्विजं चैव संयुक्तं च युधिष्ठिर ।**[०४]

---

(०१) (१) प्रभवं (४) अरिन्दम

(०२) (१) ददौ नासादितं

(०३) (२) धर्मवत्रं (for राजं); इदं वचः (for युधि); (३) अर्हणां; अर्हणा; अर्हणो (for अर्हणं);

(०४) (२) संयुजं

स्नातकं च प्रियं चाहुः षडर्घ्यार्हान्नृपं तथा ॥ ४१ ॥(०१)

एतानर्हानधिगतान् तानाहुः संवत्सरोरांषितान् ॥ ४२ ॥(०२)

त इमे कालपूगस्य महतोऽस्मानुपागताः ।(०३)
एषामेकैकशो राजन्नर्घ्यमानीयतामिति ।
अथ चैषां वरिष्ठाय समर्थायोपनीयताम् ॥ ४३ ॥(०४)

युधिष्ठिरः

कस्मै भवान्मन्यतेऽर्घ्यमेकस्मै कुरुनन्दन ।
उपनीयमाने युक्तं च तन्मे ब्रूहि पितामह ॥ ४४ ॥(०५)

**वैशम्पायनः**

ततो भीष्मः शान्तनवो बुद्ध्या निश्चित्य भारत ।
वार्ष्णेयं, मन्यते(अमन्यत तदा) कृष्णमर्हनी(णी)यरिन्तमः ॥ ४५ ॥(०६)

---

(०१) (१) ऋत्विजश्चैव; ऋत्युजं चैव; (२) संयुजं; विवाह्यं; पितरं; संयुक्त , (विवाहेन संयुक्तं, यत्काले आगतमतिथिं); तं (for च); युधिष्ठिरः; ०रं; (३) नृपं (for प्रियं); बाहुः प्राहुः; चैव (for चाहुः);

(४) षडर्घ्याहान्; ०र्घार्हा; ०र्घ्यार्हान्; ०र्घ्याहां; ०र्घार्हान्; ०र्घ्यार्हा; तद०र्घ्या (for षडर्घ्यार्हान्); नृपस्; नृपास्; नृपांस् (for नृपं); ततः (for तथा); वीर्यश्रेष्टे ष पण्डितान्; षडर्घ्या र्हान्नृपतींस्ततः; संहर्षा (षडर्हा)न्नृपतींस्ततः; वीर्यश्रेष्ठं च पण्डिताः; षडर्हान्नृपति (०तीं) स्ततः;.

(०२) (१) एताम् (for एतान्); अर्घ्यान् (for अर्हान्); अभिमतान्; हितान्; अधिगतान्; एतानर्घ्यार्हकानाहुः;

(२) परि; बहु (for आहुः); संवत्सरोषिताः;.

(०३) (१) कालयुक्तस्थ; भ्यागता राजन्; राजसूयस्य (श्व); राजसूर्यस्य; (४) नुपागतान्;.

(०४) (१) एतेषामेकशो; एषामेकैकतो; (२) अघंम्क अर्घ; अर्घ्य (for अर्घ्यम्); इह (for इति); अर्घः (र्घ्यः) समुपनी (दी) यतां; तदर्घमुपनीयतां;

(३) इति (for अथ); अथ वैषां; अथ तेषां; अथैषां च (for अथ चैषां); वरिष्ठायां; वरिष्ठो यस्; (४) तस्यार्घ्य (र्घ) भुपकल्प्यताम्;.

(०५) (१) यस्मै; र्घ्यम्, यस्मै भगवान्मन्येर्घम्; (२) अमुष्मै (for एकस्मै); आनीयमाने (०नो); युक्तं यत्; संयुक्तं; तद्युक्तं (for युक्तं च); (४) तन्नो; तस्मिन् (for तन्मे);.

(०६) (२) वीर्यवान् (for भारत); (३) वार्ष्णेय; अब्रवीत् (for मन्यते); कृष्ण; अमन्यत तदा कृष्णम्; वार्ष्णेयं कृष्णं मन्यस्व; कृष्णं मन्यस्व वार्ष्णेयम्; , (४) अर्हणीयसमं; पूजनीयतमं विभुं (for भुवि); अर्हणीयमरिन्दमः , (म; मं);.

भीष्मः

एष ह्येषां समेतानां तेजोबलपराक्रमैः ।
मध्ये तपन्निवाभाति ज्योतिषां, रविंरशुमान्ः ।। ४६ ।।(०१)

**वैशम्पायनः**

असूर्यमिव सूर्येण निर्वातमिव वायुना ।
भासितां ह्लादितं चैव कृष्णेनेदं सदो हि नः ।। ४७ ।।(०२)

तस्मै भीष्माभ्यनुज्ञातः सहदेवः प्रतापवान् ।
उपजह्रेथ विधिवद्वार्ष्णेयायार्घ्यमुत्तमम् ।। ४८ ।।(०३)

गामर्घ्यं मधुपर्कं च ह्यानीयोपाहरत्तदा ।
चरणावस्पृशच्छौरेः सहदेवो विशाम्पते ।। ४९ ।।

केशवश्चाप्युपाघ्राय मूर्ध्नि शस्त्रभृतां वरः ।
सहदेवमथोवाच कच्चिद्वः कुशलं गृहे ।। ५० ।।(०४)

सोऽपि तं तु तथेत्याह सर्वं ननु तवाज्ञया ।
एतस्मिन्नन्तरे राजनिदमासीदथाद्भुतम् ।। ५१ ।।(०५)

तां दृष्ट्वा क्षत्रियास्सर्वे पूजां कृष्णस्य भूयसीम् ।

---

(०१) (१) भीष्मः एषां ह्येषां; एतर्ह्येषां; येषु ह्येषां; एह्येतेषां; समस्तानां (for समे); एषां तु समवेतानां; (२) पराक्रमं; (३) तिष्ठन्निव; तमस्विव; तपन्निव; (४) भानुमान् (for भास्करः); ज्योतिषां रवि (पति) रंशुमान्; ज्योतिषा रविरंशुभिः; तेजसा रविरंशुमान्; ज्योतिषां रविरिवावभों.

(०२) (१) आसूर्यम्; (२) निर्वातमिव; विवातमिव; तपन्तमिव; निवा०; (३) भाषितं; भासिनं; हासितं (for भासितं); हासितं; द्रादितं (for ह्लादितं); भीतिसंह्लादितं चैव; (४) सदा (for सदो); हि वः; हिनी; हि ना; हितः; द्य स; (for हि नः);.

(०३) (१) ततो; तस्माद् (for तस्मै); भीष्माद्यनुज्ञातः; (३) उपयज्ञे; उपाजह्रे; च (for थ); (४) (अ) र्घम् (for (अ)र्यम्); वार्ष्णेयापार्थमुत्तमं;*.

(०४) (१) कें च ह्यानीया; नाम; नाम्रा (for शौरेः); उपजह्रे स गोविन्दं; ) .

(०५) (१) सर्वा (for सर्वं); नस्तु (for ननु); तदा (for अथ);) .

सम्प्रेक्ष्यान्योन्यमासीना हृदयैस्तामधारयन् ।। ५२ ।।(०१)

प्रतिजग्राह तांकृष्णः शास्त्रदृष्टेन कर्मणा ।
शिशुपालस्तु तां पूजां वासुदेवे न चक्षमे ।। ५३ ।।(०२)

उपालभ्य स भीष्मं च धर्मराजं च संसदि ।
अराक्षिपद्वासुदेवं चेदिराजो महाबलः ।। ५४ ।।(०३)
तेषामाकारभावज्ञः सहदेवो न चक्षमे ।। ५५ ।।

मानिनां बलिनां राज्ञां पुरः सन्दर्शिते पदे ।
पुष्पवृष्टिमर्हत्यासीत्सहदेवस्य मूर्धनि ।
जन्मप्रभृति वृष्णीनां सुनीथः शत्रुरब्रवीत् ।। ५६ ।।

सुनीथः-

प्रष्टा वियोनिजो राजा प्रतिवक्ता नदीसुतः ।
प्रतिग्रहीता गोपालः प्रदाता च वियोनिजः ।। ५७ ।।

सदस्या मूकवत्सर्वे आसतेत्र किमुच्यते ।

वैशम्पायनः-

इत्युक्त्वा स विहस्याशु पाण्डवं पुनरब्रवीत् ।। ५८ ।।

शिशुपालः-

अतिपश्यसि वा सर्वान्न वा पश्यसि पाण्डव ।
तिष्ठत्स्वन्येषु पूज्येषु गोपमर्चितवानसि ।। ५९ ।।(०४)

---

(०१) (१) तं; तद् (for तां); प्रेक्षान्योन्यमथासीना;) .

(०२) (१) इति (for प्रति); तं; तां (for तत्); पूजां (for कृष्णः); (२) शास्त्रदिष्टेन; (३) तदा (for तु तां); (४) चक्ष्महे;.

(०३) (१) उपा (प) लभ्य च; उपालभ्य स; (३) अथोक्षयद्; अवाक्षि०; अथाक्षि०; अक्षिपद्वासुदेवं च; आक्षिपद् (आक्षिप्य) वासुदेवं च;.

(०४) (१) आस्ते तत्र (for आसतेत्र);(२) सर्वान्नो (for वा सर्वान्); हि (वा);(३) सत्स्वेव; यत्सत्सु

एते चैवोभये तात कार्यस्य तु विनाशके ।
अतिदृष्टिरदृष्टिर्वा तयोः किं त्वं समास्थितः ।। ६० ।।[०१]

अस्मिन्  पर्वणि ३१अध्याये ६० श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(१)  प्रथमोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अर्घाभिहरणपर्वणि श्रीकृष्णार्घ्यदाने एकत्रिंशोऽध्यायः।। ३१।।

# ३२. द्वात्रिंशोऽध्यायः

## 02-05-32

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

अग्र्योपहार उपयापित एव कृष्णे
कोपादनिन्ददमुमाशु च चेदिराजः ।
श्रुत्वैव तत् पवनजोऽभिययौ नृपं तं
हन्तुं जगद्गुरुविनिन्दकमृद्धमन्युः ।।२४३।।
दूरेऽपि केशवविनिन्दनकारिजिह्वा-
मुच्छेत्स्य इत्युरुतराऽस्य सदा प्रतिज्ञा ।
भीमस्य तं तु जगृहे सरिदात्मजोऽथ
सम्प्रोच्य केशववचो निजयोर्वधाय ।।२४४।।
मयैव वध्याविति तावाह यत् केशवः पुरा ।

---

(for तिष्ठत्सु);(४) कृष्णम् (for गोपम्);.

(०१)   (१) राज्ञः (for राज्ञां); सन्दिशते (for सन्दर्शिते); सुनीतः; ०यः (for ०थः); यष्टा (for प्रष्टा); परिवेत्ती; परिहर्ता (for प्रतिवक्ता);  एते वै भवितारे च; विनाशिके; ०शने; कार्यस्य तुलिकाशिने; त्वं (न) तयोः किं; द्वयोः किं त्वं (for तयोः किं त्वं);) .

तच्छ्रुत्वा भीमसेनोऽपि स्थितो भीष्मकरग्रहात् ।।२४५।।
जानन्नपि हरेरिष्टं स्वकर्तव्यतयोत्थितः ।
भीम एतावदुचितमिति मत्वा स्थितः पुनः ।।२४६।।
देवसङ्घभविनां महानभूदीक्ष्य तोष इह केशवेऽधिकाम् ।
अर्चनां य इह मानुषो जनो मध्य एव स तु संस्थितोऽभवत् ।।२४७।।
आसुरा इह सुयोधनादयस्तत्र ते विमनसो बभूविरे ।
दुर्वचोभिरधिकं च चेदिपः कृष्णमार्च्छदुरुसद्गुणार्णवम्।।२४८।।
समाह्वयच्च केशवं युधे तमाशु केशवः ।
निवार्य तस्य सायकाञ्जघान चारिणा प्रभुः ।।२४९।।
निकृत्यमानकन्धरः स भक्तिमानभूद्धरौ ।
तमाश्रितश्च योऽसुरो महातमः प्रपेदिवान् ।।२५०।।

श्रीकृष्णमाक्षिपतः शिशुपालस्य वचनम्

शिशुपालः

नायमर्हति गोविन्दस् ष्ठत्स्विह महात्मसु ।
महीपतिषु कौरव्य आराजा वत्पार्थिवार्हणम् ।। १ ।।(०१)
नायं युक्तः समाचारः पाण्डवेषु महात्मसु ।
यत्कामादेवकीपुत्रं रीकाक्षं पाण्डवार्चितुमर्हसि ।। २ ।।(०२)
बाला यूयं न जानीध्वं धर्मः सूक्ष्मं हि पाण्डवाः ।

---

(०१) वैश० (for शिशुपाल उ); (१) गोविन्दस् (for वार्ष्णेयसू); (२) तिष्ठत्विव; त्सु सु; त्स्वसि; त्स्वपि; ०त्विह; त्स्वस्मिन्; (३) महापतिः स कौरव्यो; (४) राजेव ( ह); अराजा (for राजवत्); पार्थिवार्पणं०; वार्हणां; ०वोर्हणा; ०वोर्हणं; राजेवापार्थिवोर्हणं ( णां); राजेवापार्थिवार्हणां ( णं);.

(०२) (१) न्यायं; नाथ; न च (for नायं); उक्तः (for युक्तः); समाहार; न चायुक्तसमाचारः; (२) पाण्डवेय; पाण्डवानां महात्मनां; (३) यत्कामं; देवकीपुत्रं (for पुण्डरी); (४) पाण्डवार्चितुमर्हसि;.

अयं त्वत्राभ्यतिक्रान्तो ह्यपगेयोऽल्पदर्शनः ।। ३ ।।(०१)

लक्षालङ्कारः-अयं त्वत्र इत्यत्र अयं सूक्ष्मो धर्मः ।

त्वादृशो धर्मयुक्ते हि कुर्वाणः प्रियकाम्यया ।
भवत्यभ्यधिकं भीष्म लोकेष्ववमतः सताम् ।। ४ ।।(०२)

लक्षालङ्कारः-भवत्यभ्यधिकं इत्यत्र हे भीष्म लोकेषु सतामवमतः कृष्णः कं अभि कं प्रति, अधि अधिकः भवति इति योजना ।

कथं ह्यराजा दाशार्हो मध्ये सर्वमहीक्षिताम् ।
अर्हणामर्हति तथा यथा युष्माभिरर्चितः ।। ५ ।।(०३)

अथ वा मन्यसे कृष्णं स्थविरं भरतर्षभ।
वसुदेवे स्थिते वृद्धे कथमर्हति तत्सुतः ।। ६ ।।(०४)

अथ वा वासुदेवोयं प्रियकामोऽनुवृत्तवान् ।
द्रुपदे तिष्ठति कथं माधवोऽर्हति पूजनम् ।। ७ ।।(०५)

---

(०१) (१) जानीध्वे; (२) धर्मः सूक्ष्मं; धर्मसूक्ष्मो; धर्मं सूक्ष्मं; धर्मसूक्ष्मं(for धर्मः सूक्ष्मो); पाण्डवः; पाण्डव; (३) तत्रात्यतिक्रान्त; क्षत्राभ्यति; तत्रानति०; च स्मृत्यविक्रान्त; चाभिभ्यति०; च स्मृ( स्म)त्यति०; च स्मृत्य निष्कान्त; अत्रह्यातिक्रान्त; तत्र व्यति०; तत्राह्यति०; त्वत्राभ्यति०; अत्राभ्यति; ततोभ्यति०; चात्राभ्यति अयं त्वत्र; अयं सूक्ष्मो धर्म; अयं तत्र; अयं च तत्रात्यतिक्रामो; अयमत्राष्यतिक्रम्य; (४) आपगेया; ह्यापगेयो०; अपगेयो०; कर्मणा त्वं;.

(०२) (१) तादृशां; तादृशं; त्वादृशे (for शो); धर्मयुक्ति; युक्ते; (२) प्रतिकाम्यया; प्रिय०; (३) भवत्यभ्यषिकं; भवत्येभ्यधिकं; भवलभ्यधिको; सम्भवत्यधिकं; भवत्वभ्यधिकं; कमभि कं प्रति; अधि अधिकः भवति इति योजना; भीष्म; भीमं (for भीष्मो); भवत्यधिकं भीष्म; (४) लोकेषु वसतः; ०ष्वेव मतः; ष्वनुमतः; षु च मतः; ०ष्ववमतं; ०ष्वभिमत; ष्वपि मतः; षु विमतः; सुखं ( सता); परं (for सताम्);.

(०३) (१) राजा; ह्यदाता; हि राजा (for ह्यराजा); (२) सर्वमभी; (३) अर्हणम्; यथा (for तथा); (४) तथा (for यथा); अच्युतः (for अर्चितः);.

(०४) (१) हि त्वं (for कृष्णं); (२) कुरुपुङ्गव ( ०बः); कुरुनन्दन( ०नः) (for भरं); (३) वासुदेवे; वृद्धि (for वृद्धे);.

(०५) (१) क- अथवा वसुदेवोपि यथा पुत्रे सुवृत्तवान् ।, क- वासुदेवोऽपि यथा पुक्षोऽनु, वसुदेवो; हि; यं (for पि); (२) प्रियः( हित)कामोनुवृत्तिमान्; हितकामोनुवृत्त( ०वर्त)वान्; प्रेयमित्यनुवृ; यथा पुत्रेण( ०त्रेषु; त्रे तु)वृ; यथा पुत्रेनुवृ; (३) द्रुपदे सति वार्ष्णेयं; (४) सज्जनं; पूजनां (for पूजनम्); कथ मर्चतिवानसि;.

आचार्यं मन्यसे कृष्णमथ वा पुङ्गव ।
द्रोणे तिष्ठति वार्ष्णेयं कस्मादर्चितवानसि ॥ ८ ॥(०१)

ऋत्विजं मन्यसे कृष्णमथा अथवा, कुरुपुङ्गंव ।
द्वैपायने स्थिते विप्रे कथं कृष्णोऽर्चितस्त्वया ॥ ९ ॥(०२)

भीष्मे शान्तनवे राजन्स्थिते पुरुषसत्तमे ।
स्वच्छन्दमृत्युके तस्मिन् कथं कृष्णोऽर्चितस्त्वया ।
कृपे च भारताचार्ये कथं कृष्णस्त्वयार्चितः ॥ १० ॥
अयं तत्र व्यतिक्रान्तः कर्मणा चाल्पदर्शनः ।
तादृशोऽधर्मयुक्तो हि कुर्वता प्रियकाम्यया ।
कृपे च भारताचार्ये कथं कृष्णोऽर्चितस्त्वया ॥११॥

लक्षालङ्कारः-अयं तत्र इत्यत्र विशेषेणातिक्रान्तमतिक्रमणं यस्य स तथोक्तः । धर्मं कुर्वता त्वया कृष्णस्य परियकाम्यया कथं कृष्ण अर्चित इत्युत्तरेणान्वयः ॥

(अत्र लक्षालङ्कारे द्विवारयमं श्लोकः मुद्रतः । पृ५६०. वस्तुतः अयं श्लोकः वावीळ्ळपाठे नोपलभ्यते। मातृकावर्ति)

अश्वत्थाम्नि स्थिते वीरे सर्वशास्त्रविशारदे ।
कथं कृष्णस्त्वया राजन्नर्चितो यदुनन्दनः ॥ ११ ॥
दुर्योधने च राजेन्द्रे स्थिते पुरुषसत्तमे ।
द्रुमं किम्पुरुषाचार्यमतिक्रम्य तथार्चितः ॥ १२ ॥
अयं पार्थादनवमो धनुर्वेदे पराक्रमे ।
एकलव्ये स्थिते राजन्कथं कृष्णस्त्वयाऽर्चितः ॥ १३ ॥
भगदत्ते महावीर्ये जयत्सेने च मागधे ।

---

(०१)(२) कुरुनन्दन ( नः); पुङ्गवः; स्थविरं भरतर्षभ; (३) वार्ष्णेय; (४) कथम् (for कस्माद्);.
(०२) (२) कुरुसत्तम; ०नन्दनः; कुरुपुङ्गव ( वः); (३) वृद्धे; कृष्णे (for विप्रे); (४) स्थिते व्यासेर्चितः कथं;.

कालिङ्गे च स्थिते राजन्कथं कृष्णस्त्वयाऽर्चितः ।। १४ ।।

पूर्वदेशाधिपे वीरे कौसलेन्द्रे बृहद्बले।
विराटे च स्थिते वीरे कथं कृष्णोऽर्चितस्त्वया ।। १५ ।।

भीष्मके चैव दुर्धर्षे पाण्डुवत्कृतलक्षणे ।
नृपे च रुक्मिणि श्रेष्ठे दन्तवक्त्रे च पार्थिवे ।
शल्ये मद्राधिपे चैव कथं कृष्णस्त्वयार्चितः ।। १६ ।।

दरदे च महावीरे कथं कृष्णोऽर्चितस्त्वया ।

सुराष्ट्राधिपतौ वीरे मालवे च स्थिते नृपे।
कृतक्षणे च वैदेहे कथं कृष्णस्त्वयाऽर्चितः ।। १७ ।।[०१]

अयं च सर्वराज्ञां वै बलश्लाघी महारथः ।
जामदग्न्यस्य दयितः शिष्यो विप्रस्य भारत ।। १८ ।।

येनात्मबलमाश्रित्य जरासन्धो, युधि जिताः ।
तं कर्णं समतिक्रम्य कथं कृष्णस्त्वयार्चितः ।। १९ ।।

नहि चर्त्विङ न राजा मधुसूदनः ।
अर्चितश्च कुरुश्रेष्ठ किमन्यत्प्रियकाम्यया

विन्दानुविन्दावावन्त्यौ काम्भोजं च सुदक्षिणम् ।
स्थिते साल्वे च राजेन्द्रे कथं कृष्णोऽर्चितस्त्वया ।। २० ।।

अस्मिन् पार्थसखे राजन् गन्धर्वाणां महीपतौ ।
स्थिते चित्ररथे वीरे कथं कृष्णस्त्वयाऽर्चितः ।। २१ ।।

वाह्लीकं स्थविरं वीरं कौरवाणां महारथम् ।
सौमदत्तिं महावीर्यं सोमदत्तं महारथम् ।। २२ ।।

---

(०१) (१) क- कोशे अर्धद्वयं नास्ति.

शकुनिं सौबलं चैव सिन्धुराजं महाबलम् ।
एतानवमतान् कृत्वा कथं कृष्णोऽर्चितस्त्वया ।। २३ ।।

न हि चर्त्विङ् न चाचार्यो न राजा मधुसूदनः ।
न स्नातको न जामाता कथं कृष्णोऽर्चितस्त्वया ।। २४ ।।[०१]

अर्चितस्त्वत् कुरुश्रेष्ठ किमन्यत् प्रियकाम्यया ।। २५ ।।[०२]

लक्षालङ्कारः-अर्चितस्त्वत् इत्यत्र त्वत् त्वत् त्वत्तः

अथ वाभ्यर्चनीयोऽयं जुष्भभिवृष्णि पुङ्गवः ।
किं राजभिरिहानीवतैरवमानाय भारत ।। २६ ।।[०३]

वयं तु न भयादस्य कौन्तेयस्य महात्मनः ।
प्रयच्छामः करान् सर्वे न लोभान्न च सान्त्वनात् ।। २७ ।।[०४]

लक्षालङ्कारः-प्रयच्छाम इत्यत्र लोभात् मातुःस्वस्रीय इति लोभात् ।

अस्य धर्मप्रधनस्य पार्थिवत्वं चिकीर्षतः ।
करानस्मै प्रयच्छामः सोऽयमस्मान्न मन्यते ।। २८ ।।[०५]

किमन्यदवमानाद्धि यदीत्थं राजसंसदि ।
अप्राप्तलक्षणं कृष्णमर्घ्येणार्चितवानसि ।। २९ ।।[०६]

---

(०१) (३) अतश्च त्वं (for अर्चितश्च); अर्चितस्त्वत् ( त्वत्त); अर्चितः कुरुशार्दूल; (४) किमस्य;.

(०२) अर्चितश्च कुरु०

(०३) (१) वा ह्यर्चनीयो; वाभ्यर्चं; वात्यर्च० (for वाप्यर्चं);
(२) युष्माभिर्वृष्णि ( क वृष्णिः ०भि कुरु)पुङ्गवः; (४) अपमानाय;.

(०४) (१) भयात्तस्य; देव; ०दन्ये; (२) पाण्डवस्य (for कौन्ते); (३) प्रयच्छाम; करान्तर्यन्प्रयच्छाम; शान्त्वनात्; न लोभान्न यभां च तान;.

(०५) (१) अस्य धर्म( सर्व)प्रधानस्य; (२) करान्नस्मै; करं तस्मै; करमस्मै; करान्सर्वे; (४) मन्यसे;.

(०६) (२) यदियं; यदयं; यादवं; यदेनं( वं); यदित्थं; यदिदं; यदीत्थं; (यदिमं); (३) अप्राप्तलक्षण; अराजलक्षणं; अप्राप्यलक्षणं; (४) अर्घेण ( अर्थेण); अर्घेन; अर्घ्येन (for अर्घ्येण); नृपः; न स (for असि);.

अकस्माद्धर्मपुत्रस्य धर्मात्मेति यशो गतम्।
को हि धर्मच्युते, पूजामेवं युक्तां फयोजयेत् ।। ३० ।। [०१]

योऽयं वृष्णिकुले जातो राजानं हतवान्पुरा ।
जरासन्धं महात्मानमन्यायेन दुरात्मवान् ।। ३१ ।।[०२]

अद्य धर्मात्मता चैव व्यपकृष्टा युधिष्ठिरात् ।
दर्शितं कृपणत्वं निविष्टं च कृष्णेऽर्घ्यस्य निवेदनात् ।। ३२ ।।[०३]

यदि भीताश्च कौन्तेयाः कृपणाश्च तपस्विनः ।
राज्ञां तु मध्ये पूजां ते कृतवन्तो गरीयसीम् ।
ननु त्वयापि बोद्धव्यं यां पूजां माधवार्हसि ।। ३३ ।।[०४]

लक्षालङ्कारः-यदि भीताश्च कौन्तेया इत्यत्र हि तर्हि हि कथमिति चाव्ययद्वयस्यार्थो ज्ञेयः । राज्ञां मध्ये कथं पूजां कृतवन्तः ।

अथ वा कृपणैरेतामुपनीतां जनार्दन ।
पूजामनर्हः कस्मात्त्वमभ्यनुज्ञातवानसि ।। ३४ ।।[०५]

---

(०१) (१) धर्मराजस्य (for पुत्रस्य); (२) वचो गतं; गतो वच; च चागतं (for यशो गतम्); गतं; (३) यो (for को); धर्मच्युतं; धर्माच्युते; धर्मोच्युते; पूज्यम्; राजा (for पूजाम्); यो धर्म्यामच्युते पूजाम्;(४) युक्ते; वृत्ते; युक्तः; एनां (for युक्तां); नियोजयेत्; समाचरेत् (for प्रयो); पूजामेवं समाचरेत्; एवं युक्तात्प्रपूजयेत्;.
(०२) ( अनयेन; भवने च; भयेन च (for अन्यायेन); महात्मवान् (for दुरा);) .
(०३) (१) अन्यधर्मात्मना चैव; अद्य धर्मात्मना ( नां)चैव; कोन्यो धर्मात्मनां चैव; (२) व्यपदिष्ट; कृष्णा; ह्यपकृष्टा ( ष्टो); व्यपकृष्टो; अपकृष्टा; युधिष्ठिर; ष्ठिरे; (३) विचित्यं चः च निर्दिष्टं; हि निर्दिरं( र्षि)ष्टं; दर्शितं च; निकृष्टं च (for निविष्टं च); दर्शितं कृपणत्वं च; कृपणस्त्वं निमग्नश्च; कृपणत्वं निदिग्धं ( निदग्धं; उपचितं); (४) वार्ष्णेयस्य; कृष्णे( ष्णो)र्घस्य; कृष्णोर्घ्यस्य प्रदर्शनात्;.
(०४) (१) यदभीताश्च; कौरव्या; कौतेय; (२) मनस्विनः; तरस्विनः ( हि (for तु); भिभूयसीं; हि भूयसीं (for गरी०); राशां मध्ये पाण्डवेय पूजां तामभिभूयसीं;) , (३)क- त्वं कृतवन्ती हि भूयसीम् । अनु; एतत्; तत्तु (for ननु); त्वया वि; त्वया हि; बोद्धव्या; न त्वयात्यपि( या ह्यपि) बोद्धव्यं; (४) पूजां यां; माधवार्हसि; वोर्हसि;.
(०५) (१) एत्वाम्; एतैर्; एनाम् (for एताम्); (२) उपानीतां; उपनीता; नीतो; जनार्दन; जनार्दने; नः; नं; (३) अनर्हे; अर्हः; अनर्हन्; अनार्हं(for अनर्ह); कस्मात्; त्वं; (४) ज्ञातुमर्हसि;.

अयुक्तामात्मनः पूजां त्वं कस्मात् बहु मन्यसे ।
हविषः प्राप्य निष्यन्दं प्राशितुं श्वेव निर्जने ।। ३५ ।।[०१]

लक्षालङ्कारः-हविषः प्राप्य इत्यत्र विष्यन्दं पात्रात् पतितभागम् ।

न त्वयं पार्थिवेन्द्राणामपमानः प्रयुज्यते ।
त्वामेव कुरवो व्यक्तं प्रहसन्ते जनार्दन ।। ३६ ।।[०२]

क्लीबे दारक्रिया यादृगन्धे वा रूपदर्शनम् ।
अराज्ञो राजवत्पूजा तथा ते मधुसूदन ।। ३७ ।।[०३]

दृष्टो युधिष्ठिरो राजा दृष्टो भीष्मश्च यादृशः ।
वासुदेवोऽप्ययं दृष्टः सर्वमेतद्यथातथम् ।। ३८ ।।[०४]

इत्युक्त्वा शिशुपालस्तानुत्थाय परमासनात् ।
निर्ययौ सदसस्तस्मात्सहितो राजभिस्तदा ।। ३९ ।।[०५]

अस्मिन् पर्वणि ३२अध्याये ३९श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(२) द्वितीयोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अर्घाभिहरणपर्वणि शिशुपालक्रोधे द्वात्रिंशोऽध्यायः।। ३२ ।।

---

(०१) (१) अयुक्तम्; अयुक्तान्; अयत्नम्; (२) कस्माद् (for पुनर्); (३) हविषं; ष्यं; निस्पन्दं; निष्पन्दं; विष्यन्दं; निःस्पन्दं; निःष्यन्दं; निःस्यन्दं; निस्थन्दं ( प्रवाहं); हविष्यं प्राशितुं श्वेव ( चैव); (४) प्राशिता ( भक्षिता); प्राशिताशू; प्राशितं ( तुं); तंश; चैव (for श्वेव); प्राशितस्येव निर्जितः; विप्रगेहे च निर्जने;.

(०२) (१) क- न्वयं . न त्वया; नन्वयं (for न त्वयं); पृथिवीं द्राणामम; (२) अवमात्मनः; अपमानः; अवमानं (for अवमानः); (४) प्रलभ्यन्ते; प्रलम्भस्ते; प्रहसन्ते(ति); प्रालम्भन्ते; प्रलभन्ते;.

(०३) (१) योगं; यातृग्; वा स्याद्; यास्य (for यादृग्); (२) गन्धे; दण्डे (for अन्धे); कुपदर्शनं; रवि० (for रूप०); (३) अराज्ये; अ(स्य) राज्ञो; अराज्ञौ; जे; जा; ज्ञि; आराज्ञि;.

(०४) (१) दुष्टो; यादृग् (for राजा); (२) दुष्टो; रुष्टो; भीमश्च; भीताश्च; तादृश; (३) दुष्ट; रुष्ट; (४) सर्वमेव; सर्वे ते यद् (for सर्वमेतद्); यथा तथा; यता यथा; सर्वथा कुरुनदन;.

(०५)(१/२) शिशुपालास्तान्; पालेन; पालस्तु; पालश्च; परमासने; शिशुपालः सभामध्ये इत्युक्त्वोत्थाय चासनात्; (३) सदृशस् (for सदसस्); खपक्षैर्निर्ययुस्तस्मात; (४) तथा (for तदा);.

# ३३. त्रयस्त्रिंशोऽध्यायः

## 02-05-33

शिशुपालं सान्त्वयन्तं युधिष्टिरं निवार्य भीष्मेण श्रीकृष्णमाहात्म्य-कथनम् ।। १ ।। श्रीकृष्णस्याग्रपूजामसहमानानां शिरसि पदमाहितमिति सहदेववचनकथनम् ।। २ ।। युधिष्ठिरकर्तृकः शिशुपालस्यानुनयः ।। ३ ।। तदीयाक्षेपवचनानां भीष्मकर्तृकमुत्तरम् ।। ४ ।।

वैशम्पायनः

ततो युधिष्ठिरो राजा शिशुपालमुपाद्रवत् ।
उवाच चैनं मधुरं सान्त्वपूर्वमिदं वचः ।(०१)
नेदं युक्तं महीपाल यादृशं वै त्वमुक्तवान् ।। १ ।।(०२)

अधर्मश्च परो राजन्पारुष्यं च निरर्थकम् ।। २ ।।(०३)

न हि धर्मं परं जातु नावबुध्येत पार्थिवः ।
भीष्मः शान्तनवस्त्वेनं मावमंस्था अतोऽन्यथा ।। ३ ।।(०४)

---

(०१) (२) उपादधत्; अथाब्रवीत्; (for उपाद्रवत्); (३) उवाच भ्रातृभिः; सार्धँ; उवाच मधुरं पथ्यं; (४) शान्त्वपूर्वम्; ; साम (for सान्त्व);ऽ

(०२) (१) नैवं (for नेदं);यादृशो; तादृशं; त्वादृशो; तादृशो; (for यादृशं); च (व); (ऽ)यं; यत् (for वै); त्वादृशे; वक्तमीदृशं; स्वाः (या)दृशैर्वक्तमीदृशं (शे); यादृशं वै त्वयुक्तवान्; त्वादृशो धर्ममुक्तवान्; .

(०३) (२) क- चरुषं च निरर्थकम् । क- परुषश्च निरर्थकः । क- परुषं तु निरर्थकम् । क- पोरुषं च निरथकम् । (३) पुरो; पलो(for परो); (४) पौरुषं च; पारुष्यं यन्; पौरुष्यं च; परुषं च; परुषं तु; प(for पु); रुषश्च निरर्थकः.

(०४) (१) तु (for हि); धर्मपरं; धर्मपराः; धमं प (धर्मपु)राज्ञ; राजन्; जेतुं (for जातु); (२) नावमन्येत; नान्व (०व); बुध्यति; नैव मन्येत; अवबुध्वेत; पार्थिवः; (कर्हिचित्); (३) भीष्मं; शान्तनवं; चैनं; त्वेवं; तेन; (for त्वेनं); (४) मा त्वं (त्व०); मसीर्; म्रावमसीद्; (द्); (for मावमंस्था); यतोन्यथा; त्वमन्यथा; ततोन्यथा; इतोन्यथा; मावमंस्थाप्यतोन्यथा; अतोऽन्यथा;.

यमं चैनान् महीपालांस्त्वत्तो वृद्धतमान् न्बहून् ।
मृष्यन्ते चार्हणां कृष्णे तद्वत्त्वं क्षन्तुमर्हसि ।। ४ ।।(०१)

लक्षालङ्कारः-यमं चैनान् इत्यत्र अतः अवमानात्कारणात् । अन्यथा अवमाने सतीत्यर्थः। यमं यमसदृशं भीष्ममिति पूर्वेणान्वयः ।

वेद तत्त्वेन कृष्णं हि भीष्मश्चेदिपते भृशम् ।
न ह्येनं त्वं तथा वेत्थ यथैनं वेद कौरवः ।। ५ ।।(०२)

भीष्मः

न चास्यानिनयो नायमर्हति सान्त्वनम् ।
लोकवृद्धतमे कृष्णे योऽर्हणां नानुभमन्यते ।। ६ ।।(०३)

चाञिचित्व रणे रणकृतां वरः ।
यो मुञ्चति वशे कृत्वा गुरुर्भवति तस्य सः ।। ७ ।।(०४)

अस्यां हि समितौ राज्ञामेकमप्यजितं युधि ।
न पश्यामि महीपालं कृण्णेनाक्लिष्टकर्भणा ।। ८ ।।(०५)

---

(०१) (१) यमं (for पश्य); यमसदृशं भीष्ममिति पूर्वेणान्वय; चैतन्; चैमान्; चैनान्; माम् (for चेमान्); (२) वृद्धतरान; त्वत्तो वृद्धतमा बहू; (३) मृषन्ति; मृष्यन्ति; मर्ष्यँ (०षं)ते; मृष्यतशू; चार्हणं; कृष्णो; (४) तद्वक्तं (त्त्वं); किं च त्वं; तद्वत्तं (for तद्वत्त्वं);.

(०२) (१) कृष्णं वै; कृष्णेन (for कृष्णं हि); (२) भीष्मं;चेदिपतेर्; (३) त्वेनं; ह्येवं; हि च (for ह्येनं); यथा; वेद; वेत्सि (for वेत्थ); (४) यथायं; तथैनं (for यथैनं); देवः; वेत्ति (for वेद); कौरवं; यथैवैनेद कौरवा;.

(०३) (१) नास्मिन्; ० नासौ; नास्य (for नान्मा); ह्य( चा; वा)नुनयो (for अनुनयो); ० नास्मायननुयो देयो; नास्मै ( ०स्मिन्) देयो ह्यनुनयो; तस्यार्या०नुनयो देयो; नास्माभिरनुनेतव्यो; नास्य चानुनयो युक्तो; न चास्यानुनयो देयो; (राजन्); अनुनयः; प्रकुपितप्रसादनं, (२) नापि चा; नाहम (०क्य नायम०); श्गन्त्वनं; स्तन्त्वनां; सात्वतां; (३) लोकवृद्धितमे; ०वृद्धमते;हृणं (for हृणां); नाभिमन्यते; न तु मन्यते;क्षत्रियः .

(०४) (१) अक्षयः; क्षत्रिया (०क्य क्षत्रियः); क्षत्रियः क्षत्रियं; क्षत्रियान् (०क्य ०यं); (२) रणभृता; वर; (४) प्रभुर , (for गुरु,);.

(०५) (१) तस्यां (for अस्तं); तु; हि (for च); (२) रणे (for युधि); (३) महीपाल; महापालं; न हि पश्यामि महीपालं; (४) सात्वतीपुत्रसात्वतं; साकृती० ०सात्क्यात्; सात्वती० ०सात्वतान्; सात्वती; ०सात्वनात्; ० सात्वति० ०तेजसा; सात्वतीपुत्रसात्वतात्; (०त्वतः); ०पुत्रमोजसा; ०पुत्रसात्वतान्;

न हि केवलमस्माकम अर्चितव्यो जनार्दनः ।
त्रयाणामपि लोकानामर्चनीयो जनार्दनः ।। ९ ।।(०१)

कृष्णेन विजिता युद्धे बहवः क्षत्रियर्षभाः ।
जगत्सर्वं च वार्ष्णेये निखिलेन प्रतिष्ठितम् ।। १० ।।(०२)

तस्मात्सत्स्वपि वृद्धेषु सन्पज्यः कृष्ण एव थः।
एवं वक्तुं न चार्हस्त्वं मा भूत्र तेद्धिरीदृशी ।। ११ ।।(०३)

ज्ञानवृद्धा मया राजन्बहवः पर्युपासिताः।
यस्य राजन्प्रभावज्ञाः पुरा सर्वे च रक्षिताः ।। १२ ।।(०४)

तेषां कथयतां शौरेरहं गुणवतो गुणान् ।
समागतानामश्रौषं बहून्बहुमतान्सताम् ।। १३ ।।(०५)

कर्माण्यपि च यान्यस्य जन्मप्रभृति धीमतः ।
बहनिः कथ्यमानानि नरैर्भूयः श्रुतानि मे ।। १४ ।।(०६)

न केवलं भयात् कामाच्चेदिराज जनार्दनम् । (०७)

---

कृष्णेनाक्लिष्टकर्मणा; सात्वतात् (सात्वतेन । पञ्चमी विभक्ति०व्यत्ययात्);.

(०१) (१) च (for हि); (२) अन्यं; अर्घ्यं;(for अर्च्य); अर्चितव्यो (अर्चनीयो) जनार्दनः (४) अर्चि(०र्च)तव्यो; ; पूजनीयो (०क्य अर्चनीयो); महाभुजः; महीधरः (for० जनां);.

(०२) (१) निहता; विजिता (for हि जिता); सर्वे (for युद्धे); क्षत्रियं बहवः; (३) हि (for च); वार्ष्णेयं;.

(०३) (२)क- कृष्णमर्चाम नेतरान् । अर्चामि (for अर्चाम); नेरतं; ०रतान्; कृष्णमर्चामहेर्चितं; सम्पूज्यः; कृष्ण एव नः; (हि; सः); श्रेष्ठ एव जनार्दनः, (३) एव (for एवं); न च; (४) भूत् ते;.

(०४) (१) ज्ञानवृद्धो; हि मे; यथा (for मया);(३) कोशे अर्धपञ्चकम् नोपलभ्यते ।.

(०५) (१) गुणवतां (for कथयतां); शौरिर्; (२) गुणवते; (४) बहुमतां; नरान् (for ०मतान्); बहून्वहुमता सतां;.

(०६) (१) हि (for च); न चान्यस्य (for च यान्यस्य); (२) धर्मतः; (for धीमतः); (३) बहुभिः; बन्दिभिः; बहूनि (for बहुशः); (४) नः (for मे); नरैरूप(र्बहु) श्रुतानि मे; नरैर्भूयो युतानि मे; हरेर्भूयः शिानि मे; हरेः; सम्यक्च्छ्रुतानि मे;.

(०७) (१) भयात् (for वयं); कर्मात् (for कामात्);.

न सम्बन्धं पुरस्कृत्य कृतार्थं वा कथञ्चन ।[०१]
अर्चामहेऽर्चितं सद्भिर्भुवि भौभसुखावहम् ।। १५ ।।[०२]
यशः शौर्यं बलं चास्य विज्ञायार्चां प्रयुञ्जमहे ।। १६ ।।[०३]

न च हि,कश्चिदिहास्माभिः सुखंलोडच परोस्य वैः ।
गुणैसन्यानतिक्रम्य हरिरर्च्यतमो मतः ।। १७ ।।[०४]

ज्ञानवृद्धो द्विजातीनां क्षत्रियाणां बलाधिकः ।
वैश्यानां धान्यधनवाञ्छूद्राणामेव जन्मतः।
पूज्यतायां च गोविन्दे हेतू द्वावपि संस्थितौ ।। १८ ।।[०५]

वेदवेदाङ्गविज्ञानं बलं चाभ्यधिकं तथा ।[०६]
नृणां लोके हि कोऽन्योऽस्ति विशिष्टः केशवादृते ।। १९ ।।[०७]

दानं दाक्ष्यं श्रुतं वीर्यं ह्रीः कीर्तिर्बुद्धिरुत्तमा ।

---

(०१) (१) सम्बन्धकं; न सम्बद्धं (for न सम्बन्धं); (२) कृत्यर्थं वा; कृत्यार्थं वा; ; कृष्णं चापि; (for कृतार्थं वा); नैवाथ चापि किञ्चनः; कृत्यार्थं चापि कं(वापि किं)चन; कृतार्थं चा; ( वा) पि कं (किं) चन;.
(०२) (१) अर्चयामो; (for म); अर्धामहे (for अर्चा); अर्चमोर्चित तं सद्भिर्; अर्चयत्यच्युतं सद्भिर्; (२) युधि (for भुवि); भूतसुखावहं; भीमपराक्रमं; भीमसुखावहं; (for भौम); सर्वभूतसुखावहं;.
(०३) (१) यस्य (for यशः); महाराज; बलं चास्य; ज (यं)चारस्य (for जयं चास्य); (२) विज्ञेयार्चाः विज्ञायार्घ्यं; विज्ञायास्य (for ०याचा); प्रयुञ्चदम(ङ्म)हे; प्रमाज्महे;.
(०४) (१) च (for हि); किञ्चिदिहा०; कश्चिदिवा; (२) सुबलो; दुर्बलो; स्वबलो; सुखं लोड्य परीक्ष्य वै; सुबालोपि (ले वि; ०लोप्य) परीक्ष्य वै; (३) गुणे (for गुणैर्); अन्यान्; अर्च्यान् (for वृद्धान्); गणैरर्च्यानतिक्रम्य; (४) हरिम् (for हरिर्); मम; हि नः (for मतः);.
(०५) (१) ज्ञानवृद्धि; नृधो;.
(०६) (३) पूज्यौ (ज्या); द्वावपि; पूज्येन्यौ द्वावपि; पूज्यौ (ज्यौ; ज्ये) तावपि; पूज्योसाविह; पूज्यतायां च; पूज्यताविह; पूज्यस्तावपिः; युज्येते तौ च; युज्यते ते च; युज्यत तौ च; युज्यन्ते चैव; पूज्यते तौ च; गोविद; दो; कृष्णे वै; (४) तावपि; वृद्धापि (for द्वावपि); संमतौ (for संस्थितौ); क्षत्रज्ञावपि सत्तमौ;.
(०७)(२) धनं (for बलं); चाप्यधिकं; चा (वा); भ्यधिकं (for चाप्यमितं);चा (वा);भ्यधिकं (for चाप्यमितं); (३/४) हि लोके,; कोन्योस्ति; कश्चास्ति (for कस्यास्ति); विशिष्टः; नृणां लोकोस्ति लोको हि कश्चास्ति केशवावृते;.

सन्नतिः पुष्टिश्च श्रीर्धृतिस्तुष्टिः नियताच्युते ।। २० ।।[०१]

तमिमं सर्वं, सम्पन्नआचार्यं च पितरं गुरुम् ।
अर्च्य,मर्चितममस्, सर्वे सम्मन्तु मर्हथ ।। २१ ।।[०२]

ऋत्विग्गुरुस्तथाऽऽचार्यः स्नातको नृपतिः प्रियः ।
सर्वमेतद्धृषीकेशस्तस्मादभ्यर्चितोऽच्युतः ।। २२ ।।[०३]

कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः ।
कृष्णस्य हि कृते भूतं विश्वमिदं चराचरम् ।। २३ ।।[०४]

एष प्रकृतिरव्यक्ता कर्ता चैव सनातनः ।
परश्च सर्वभूतेभ्यस्तस्मात्वृद्धतमोऽच्युतः ।। २४ ।।[०५]

बुद्धिर्मनो महद्वायुस्तेजोऽम्भः खं मही च या ।
चतुर्विधं च यद्भूतं सर्वं कृष्णे प्रतिष्ठितम् ।। २५ ।।[०६]

---

(०१) (१) कृतं (for श्रुतं); वीर्यं; कीर्तिर्; (for शौर्यं); (२) प्रा; धीः (for ह्रीः); बुद्धिलक्षणं; घुद्धिसत्तमा; बुद्धि रुत्तमसंनतिः; (३/४) सन्ततिः; श्रीः पुष्टिः (for संनतिः); श्री; च (for श्रीर्); तुष्टिः; पुष्टिः; बुद्धि (for पुष्टि); निरता; नियुता० (for नियतां);.

(०२) (१) तमेवं०(for तमिमं); गुणसम्पन्नम्; लोक; सत्वं (for सर्वं); (२) आयं च (for आचार्यं); , (३)क- अर्च्यमच्युतमर्चामः । क- अभ्यर्चतर. अर्घ्यम्; अर्चाम् (for० अर्च्यम्); अर्ध्यतम्; अच्युतम्; अर्चितुम् , (for अर्चितम्); अर्ण्यार्हैं; अर्चा (र्च्या)मः (for अर्चाहं); अभ्यर्चतमनर्ध्याहं; अर्ध्यमर्चितवानस्मि; अभ्यर्च्यतममर्चाम; (०र्च्यामः); (४) सर्वं; सक्षतुम्; शंसितुम्; शंसन्तुम्; (for संमन्तुम्); अर्हसि; सर्वं तत्क्षतुमर्हसि;.

(०३) (१) गुरुः; मनुर् (for गुरुर); तथाचार्यः; (र्य); (for विवाह्यश्च); (२) नृपतिप्रियः; प्रभुः (for प्रियः); (३) हृषीकेशं०; ( शेः; ०श); मया (०क्य ऽच्युतः);.

(०४) (१) च (for हि); कृष्णो हि सर्वलोकानाम; (२) रथ; ०रह; ०रिह (for ०रपि); चाव्ययः; चात्ययः; चाप्यया (for चाप्ययः); अप्ययः; (३) तु कृते; प्रकृते (for हि कृते); विश्वम्; भूतिम् (for भूतम्); कृते; भूतं; (४) इह (for इदं); भूतं; जातं; विश्वं; चराचरं (for समं);.

(०५) (१) एकप्रकृतिरव्यक्तः. एषा; एवं (for एष); प्रभृतिः; प्रकृतिः अव्यग्रा; अव्यक्तः; (२) कृता (for कर्ता); चैष (for चैव); सनातनी; (३) एवं च; परं च; परस्य; वरश्च (for परश्च); (४) अर्च्यतमो; पूज्यतमो; वृद्धतरो (तो); मतः (for ऽच्युतः);.

(०६) (१) महद्; महा; महान्; (२) महीद्वयं; महीधराः (for मही च या); तेजोब्धिः कर्मही च यः (३) चतुर्विशच्च; चतुर्वर्णं च; यद्रूपं (for यद्भूतं); (४) सर्वकृष्णप्रति;.

आदित्यश्चन्द्रमाश्चैव नक्षत्राणि ग्रहाश्च ये ।
दिशश्च विदिशश्चैव सर्वं कृष्णे प्रतिष्ठितम् ।। २६ ।।(०१)

*३५८ (अधिकपाठः कपाठे)
अग्निहोत्रमुखा वेदा गायत्री छन्दसां मुखम्
राजा मुख मनुष्याणां नदीनां सागरो मुखम्।
नक्षत्राणां मुखं चन्द्र आदित्यस्तेजसां मुखम्।
पर्वतानां मुखं मेरुर्गरुडः पततां मुखम्।
ऊर्ध्वं तिर्यगधश्चैव यावती जगतो गतिः ।
सदेवकेषु लोकेषु भगवाम्लेशवो मुखम् ।*(०२)

एष रुद्रश्च सर्वात्मा ब्रह्मा चैष सनातनः ।
अक्षरः क्षररूपेण मानुषत्वमुपागतः ।। २७ ।।(०३)

अयं तु पुरुषो बालः शिशुपालो न बुध्यते ।
सर्वत्र सर्वदा कृष्णं तस्मादेवं प्रभाषते ।। २८ ।।(०४)

यो हि धर्मान्विचिनुयादुत्कृष्टं मतिमान्नरः ।
स वै पश्येद्यथा धर्मं न तथा चेदिराडयम् ।। २९ ।।(०५)

सवृद्धबालेष्वथवा पार्थिवेषु महात्मसु ।

---

(०१) (१) आदित्य; वायुर् (for चैव); (२) गृहाश्च तथा (for च ये); (३) दिशश्च विदिशश्चैव; दिशश्च प्रदिशश्चैव; ; द्वैशश्चैवोपदिशश्चष्ठ;.

(०२) (तपतां; तपसां; (for तेजसां); वरः; सुखं; मुखं ऊर्ध्व;(for ऊर्ध्वं); अधश्चैषा; अधस्यैष (for अधश्चैव); जगतौ पतिः; जगतां गतिः; सदैवते(के) षु; स देवेषु च(for सदेवकेषु);) .

(०३) (एष; चैव (for चैष); पितामहः (for सना० ); त्वमिहागतः;) .

(०४) (१) हि; च; नु (for तु); (२) पालोनुबध्यते; (३) सर्वधा; कृष्णाम् (for कृष्णं); (४) तदा देवं (for तस्मादेवं); प्रभाषसे; कोवाप्येनं न पूजयेत् .

(०५) (१) धर्मान् (for धर्मं); वितत्तीयान्; विचिन्मुयाद् ; प्रचिनु;० विवृणु०; विचिनुयात्;( कुर्यात्); (२) प्रकृष्टं; उत्कृष्ट०; उत्कृष्टं (३) सर्वैः; सर्वे (for स वै); पश्ये; पश्यद् (for पश्येद्); यथा तत्वं; यथा धर्मे; अधाधर्मं (४) यथा; तथा;.

को नार्हं मन्यते कृष्णं को वाऽप्येनं न पूजयेत् ।। ३० ।।[०१]

अथेमां दुष्कृतां पूजां शिशुपालो व्यवस्यति ।
सुकृतां वा यथान्यायं तथाऽयं कर्तुमर्हति ।। ३१ ।।

वैशम्पायनः

एवमुक्ते तु गाङ्गेये शिशुपालश्चुकोप ह ।
क्रुद्धं सुनीथं दृष्ट्वाऽथ सहदेवोऽब्रवीत्तदा ।। ३२ ।।

सहदेवः

नीतिपूर्वमिदं सर्वं चेदिराज मया कृतम् ।
न मे विमतिरस्तीह कारणं चात्र मे शृणु ।। ३३ ।।

स पार्थिवानां सर्वेषां गुरुः कृष्णो बलेन वै ।
तस्मादभ्यर्चितोऽर्घ्यार्हः सर्वे सम्मन्तुमर्हथ ।। ३४ ।।

यो वा न सहते राज्ञां कश्चित्सबलवाहनः ।
क्षिप्रं युद्धाय निर्यातु शक्तश्चेदत्र मे युधि ।
तस्य मूर्ध्नि सुसन्न्यस्तं राज्ञस्सव्यं पदं मया ।। ३५ ।।

एवमुक्तो मया हेतुः उत्तरं प्रब्रवीतु मे ।। ३६ ।।

वैशम्पायनः

ततो न व्याजहारैषां कश्चिद्बुद्धिमतां सताम् ।
मानिनां बलिनां राज्ञां मध्ये सन्दर्शिते पदे ।
पुष्पवृष्टिर्महत्यासीत्सहदेवस्य मूर्धनि ।। ३७ ।।

एवमुक्ते सुनीथस्य सहदेवेन केशवे ।

(०१) (१) सवृद्ध बालेप्यथ वा; बालेषु तथा; (२) (ऽ)नाद्यं; नहं; नाभि (for नर्हं); मनुते (for मन्यते);
(४) वा ह्योनं; वा (ना)प्येवं;.

स्वभावरक्ते नयने भूयो रक्ते बभूवतुः ।। ३८ ।।

तस्य कोपं समुद्भूतं ज्ञात्वा भीष्मः प्रतापवान् ।
आचचक्षे पुनस्तस्मै कृष्णस्यैवोत्तमान्गुणान् ।। ३९ ।।

स सुनीथं समामन्त्र्य तांश्च सर्वान्महीक्षितः ।
उवाच वदतां श्रेष्ठ इदं मतिमतां वरः ।। ४० ।।

सहदेवेन राजानो यदुक्तं केशवं प्रति ।
तत्तथेति विजानीध्वं भूयश्चात्र निबोधत ।। ४१ ।।

अस्मिन् पर्वणि ३३ अध्याये ४१ श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(३) तृतीयोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अर्घाभिहरणपर्वणि शिशुपालक्रोधे त्रयस्त्रिंशोऽध्यायः।। ३३ ।।

# ३४. चतुस्त्रिंशोऽध्यायः

## 02-05-34

श्रीकृष्णमहिम्नो विस्तरेण कथनाय भीष्मं प्रति युधिष्ठिरप्रार्थना ।। १ ।। भीष्मेण विष्णो-र्जगत्सृष्टिकथाकथनम् ।। २ ।। मधुकैटभवधकथनम् ।। ३ ।।

वैशम्पायनः

ततो भीष्मस्य तच्छ्रुत्वा वचः काले युधिष्ठिरः ।
उवाच मतिमान्भीष्मं ततः कौरवनन्दनः ।। १ ।।(०१)

युधिष्ठिरः

(०१) (३) क- ज्ञापनार्थाय सर्वेषां भीष्मं पुरथाब्रवीत् ।.

विस्तरेणास्य देवस्य कर्माणीच्छामि सर्वशः ।
श्रोतुं भगवतस्तानि प्रब्रवीहि पितामह ।। २ ।।

कर्मणामानुपूर्व्यं च प्रादुर्भावांश्च मे विभोः ।
यथा च प्रकृतिः कृष्णे तन्मे ब्रूहि पितामह ।। ३ ।।

वैशम्पायनः

एवमुक्तास्तदा भीष्मः प्रोवाच पुरुष(भरत)र्षभम् ।
युधिष्ठिरममित्रघ्नं तस्मिन्क्षत्रसमागमे ।। ४ ।।

समक्षं वासुदेवस्य देवस्येव शतक्रतोः ।
कर्माण्यसुकराण्यन्यैराचचक्षे जनाधिप ।। ५ ।।

शृण्वतां पार्थिवानां च धर्मराजस्य चान्तिके ।
इदं मतिमतां श्रेष्ठः कृष्णं प्रति विशाम्पते ।। ६ ।।

साम्नैवामन्त्र्य राजेन्द्र चेदिराजमरिन्दमम् ।
भीमकर्मा ततो भीष्मो भूयः स इदमब्रवीत् ।
कुरूणां चापि राजानं युधिष्ठिरमुवाच ह ।। ७ ।।

भीष्मः

वर्तमानामतीतां च शृणु राजन्युधिष्ठिर ।
ईश्वरस्योत्तमस्यैनां कर्मणां गहनां गतिम् ।। ८ ।।

अव्यक्तो व्यक्तलिङ्गस्थो य एष भगवान्प्रभुः ।। ९ ।।

पुरा नारायणो देवः स्वयम्भूः प्रपितामहः ।
सहस्रशीर्षः पुरुषो ध्रुवोऽव्यक्तः सनातनः ।। १० ।।

सहस्राक्षः सहस्रास्यः सहस्रचरणो विभुः ।
सहस्रबाहुः साहस्रो देवो नामसहस्रवान् ।। ११ ।।

सहस्रमुकुटो देवो विश्वरूपो महाद्युतिः ।

अनेकवर्णो देवादिरव्यक्ताद्वै परे स्थितः ॥ १२ ॥[०१]

असृजत्सलिलं पूर्वं स च नारायणः प्रभुः ।
ततस्तु भगवांस्तोये ब्रह्माणमसृजत्स्वयम् ॥ १३ ॥

ब्रह्मा चतुर्मुखो लोकान्सर्वांस्तानसृजत्स्वयम्।
आदिकाले पुरा ह्येवं सर्वलोकस्य चोद्भवः ॥ १४ ॥

पुराथ प्रलये प्राप्ते नष्टे स्थावरजङ्गमे ।
ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे ॥ १५ ॥

आभूतसम्प्लवे प्राप्ते प्रलीने प्रकृतौ महान् ।
एकस्तिष्ठति सर्वात्मा स तु नारायणः प्रभुः ।
नारायणस्य चाङ्गानि सर्वदैवानि भारत ॥ १६ ॥

शिरस्तस्य दिवं राजन्नाभिः खं चरणौ मही ।
अश्विनौ कर्ण(घ्राण)योर्देवो चक्षुषी शशिभास्करौ ॥ १७ ॥

लक्षालङ्कारः-शिरस्तस्य इत्यत्र दिवं द्युलोकं तस्य शिर आहुरिति सम्बन्धः ।

इन्द्रवैश्वानरौ देवौ मुखं तस्य महात्मनः ।
अन्यानि सर्वदैवानि तस्याङ्गानि महात्मनः ॥ १८ ॥
सर्वं व्याप्य हरिस्तस्थौ सूत्रं मणिगणानिव ॥ १९ ॥[०२]

आभूतसम्प्लवान्तेऽथ दृष्ट्वा सर्वं तमोऽन्वितम् ।
नारायणो महायोगी सर्वज्ञः परमात्मवान् ।
ब्रह्मभूतस्तदाऽऽत्मानं ब्रह्माणमसृजत्स्वयम् ॥ २० ॥

लक्षालङ्कारः-परमात्मवान् परमचित्तवान् परमप्रयत्नवान् वा । ब्रह्मभूत इत्यत्र ब्रह्मणो वेदात् भूतः अभिव्यक्तः । तदात्मानं वेदात्मानं वेदप्रवर्तकमित्यर्थः।

---

(०१) (४) क- दुपरिस्थितः । क- परः स्मृतः.
(०२) (२) क- सूत्रे मणिगणा इव.

सोऽध्यक्षः सर्वभूतानां प्रभूतः प्रभवोऽच्युतः ।। २१ ।।

सनत्कुमारं रुद्रं च मनुं चैव तपोधनान् ।
सर्वमेवासृजद्ब्रह्मा ततो लोकान्प्रजास्तथा ।। २२ ।।(०१)

तेन तद्व्यसृजंस्तत्र प्राप्तकाले युधिष्ठिर ।**
तेभ्योऽभवन्महात्मभ्यो बहुधा ब्रह्म शाश्वतम् ।। २३ ।।(०२)

लक्षालङ्कारः-तेन तद्व्यसृजत् इत्यत्र तेन ब्रह्मणा तत् रुद्रादियोगिवृन्दं व्यसृजत्।

कल्पानां बहुकोट्यश्च समतीता हि भारत ।
आभूतसम्प्लवाश्चैव बहुकोट्योऽतिचक्रमुः ।। २४ ।।

लक्षालङ्कारः-आभूतसम्प्लवा इत्यत्र आभूतसम्प्लवाः, भूतसम्प्लवः प्रायः तत्पर्यन्तं विद्यमानाः लोकानां बहुकोट्यः अपचक्रमुः ब्रह्मणो देहान्निर्गताः सृष्टा इत्यर्थः ।

मन्वन्तरयुगेऽजस्रं सकल्पा भूतसम्प्लवाः ।
चक्रवत्परिवर्तन्ते सर्वं विष्णुमयं जगत् ।। २५ ।।(०३)

लक्षालङ्कारः- सकल्पा इत्यत्र सकल्पाः दैनन्दिनकल्पेन ब्रह्मकल्पेन च सहिताः ।

सृष्ट्वा चतुर्मुखं देवं देवो नारायणः प्रभुः ।
स लोकानां हितार्थाय क्षीरोदे वसति प्रभुः ।। २६ ।।

ब्रह्मा च सर्वलोकानां लोकस्य च पितामहः ।
ततो नारायणो देवः सर्वस्य प्रपितामहः ।। २७ ।।(०४)

श्री भीष्मः

अव्यक्तो व्यक्तलिङ्गस्थो य एष भगवान्प्रभुः ।

---

(०१) (२) क- सकप्तर्षीश्च.(३) क- पूर्व.
(०२) (१) ते च (२) प्राप्ते काले
(०३) (२) सङ्कल्पा
(०४) (१) देवानां .लोकानां

नारायणो जगच्चक्रे प्रभवाप्ययसंहितः ।। २८ ।।[०१]

एष नारायणो भूत्वा हरिरासीद्युधिष्ठिर ।**
ब्रह्माणं शशिसूर्यौ च धर्मं चैवासृजत्स्वयम् ।। २९ ।।[०२]

बहुशः सर्वभूतात्मा प्रादुर्भवति कार्यतः ।
प्रादुर्भावांस्तु वक्ष्यामि दिव्यान्देवगणैर्युतान् ।
सुप्त्वा युगसहस्रं स प्रादुर्भवति कार्यवान् ।। ३० ।।

पूर्णे युगसहस्रेऽथ देवदेवो जगत्पतिः ।
ब्रह्माणं कपिलं चैव पारश्रेष्ठी तथैव च ।। ३१ ।।[०३]

लक्षालङ्कारः-ब्रह्माणं कपिलम् इत्यत्र कपिलं कपिर्भूत्वा लसतीति व्युत्पत्त्या कपिलं मुख्यवायुम् । 'तौ विवेश स्वयं वायुरि'ति वायोर्वक्ष्यमाणत्वादत्रापि कपिलो वायुः । पारश्रेष्ठी इत्यत्र पारः संसारसमुद्रस्य पारे विद्यमानः श्रेष्ठी श्रेष्ठा मुक्ता एव सेवकतया अस्य वर्तन्त इति श्रेष्ठी देवदेवो नारायण इति पूर्वेण सम्बन्धः।

देवान्सप्त ऋषींश्चैव शङ्करं च महायशाः ।
सनत्कुमारं भगवान्मनुं चैव प्रजापतिम् ।। ३२ ।।[०४]
पुरा चक्रेऽथ देवादीन्प्रदीप्ताग्निसमप्रभः ।। ३३ ।।[०५]

येन चार्णवमध्यस्थौ नष्टे स्थावरजङ्गमे ।
नष्टदेवासुरनरे प्रणष्टोरगराक्षसे ।। ३४ ।।

योद्धुकामौ सुदुर्धर्षौ भ्रातरौ मधुकैटभौ ।
हतौ भगवता तेन तयोर्दत्त्वा वृतं वरम् ।। ३५ ।।

---

(०१) (३) क- नरनारायणौ भूत्वा प्रभवाप्ययसंहितौ ।

(०२) (३)क- ब्रह्मा च शक्रस्सूर्यश्चैव सनातनः ।.

(०३) (२) परमेष्ठी

(०४) (१) सप्तर्षभिश्चैव

(०५) (१) क - देवादिः.

भूमिं बद्ध्वा कृतौ पूर्वं मृन्मयौ द्वौ महासुरौ ।
कर्णस्रोतोद्भवौ तौ तु विष्णोस्तस्य महात्मनः ।। ३६ ।।

लक्षालङ्कारः-भूमिं बद्ध्वा इत्यत्र भूमिं स्वकरचरणाद्यङ्गेषु बद्ध्वा । कर्णस्रोतोद्भवौ इत्यत्र स्रवत्यत्र वायुरिति व्युत्पत्त्या स्रोतानि नवद्वाराणि ।

महार्णवे प्रस्वपतः शैलराजसमौ स्थितौ ।
तौ विवेश स्वयं वायुः ब्रह्मणा साधु चोदितः ।। ३७ ।।

तौ दिवं छादयित्वा तु ववृधाते महासुरौ ।
वायुप्राणौ तु तौ दृष्ट्वा ब्रह्मा पर्यामृशच्छनैः ।
एकं मृदुतरं विद्धि कठिनं बुध्य चापरम् ।। ३८ ।।

नामनी तु तयोश्चक्रे स विभुः सलिलोद्भवः ।
मृदुस्त्वयं मधुर्नाम कठिनः कैटभः स्वयम् ।। ३९ ।।

तौ दैत्यौ कृतनामानौ चेरतुर्बलगर्वितौ ।। ४० ।।

तौ पुराथ दिवं सर्वां प्राप्तौ राजन्महासुरौ ।
प्रच्छाद्याथ दिवं सर्वां चेरतुर्मधुकैटभौ ।
सर्वमेकार्णवं लोकं योद्धुकामौ सुनिर्भयौ ।। ४१ ।।

तौ गतावसुरौ दृष्ट्वा ब्रह्मा लोकपितामहः ।
एकार्णवाम्बुनिचये तत्रैवान्तरधीयत ।। ४२ ।।

स पद्मे पद्मनाभस्य नाभिदेशात्समुत्थिते ।। ४३ ।।

आसीदादौ स्वयञ्जन्म तत्पङ्कजमपङ्कजम् ।
पूजयामास वसतिं ब्रह्मा लोकपितामहः ।। ४४ ।।

लक्षालङ्कारः-आसीदादौ इत्यत्र स्वयंजन्म स्वयं पङ्कादिकारणं विना केवलं स्वतः स्वस्वभावादेव जन्म यस्य तत् स्वयंजन्मेति पङ्कजस्य विशेषणम्।

तावुभौ जलमध्य(गर्भ)स्थौ नारायणचतुर्मुखौ ।

बहून्वर्षायुतानप्सु शयानौ न चकम्पतुः ।। ४५ ।।

अथ दीर्घस्य कालस्य तावुभौ मधुकैटभौ ।
आजग्मतुस्तौ तं देशं यत्र ब्रह्मा व्यवस्थितः ।। ४६ ।।

तौ दृष्ट्वा लोकनाथस्तु कोपात्संरक्तलोचनः ।
उत्पपाताथ शयनात्पद्मनाभो महाद्युतिः ।। ४७ ।।

तद्युद्धमभवद्धोरं तयोस्तस्य च वै तदा ।
एकार्णवे तदा घोरे त्रैलोक्ये जलतां गते ।। ४८ ।।

तदभूत्तुमुलं युद्धं वर्षसङ्घान्सहस्रशः ।
न च तावसुरौ युद्धे तदा श्रममवापतुः ।। ४९ ।।(०१)

अथ दीर्घस्य कालस्य तौ दैत्यौ युद्धदुर्मदौ ।
ऊचतुः प्रीतमनसौ देवं नारायणं प्रभुम् ।। ५० ।।

प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः ।
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ।। ५१ ।।

लक्षालङ्कारः-आवां जहि इत्यत्र उर्वी अस्मन्मरणभूमिः ।

हतौ च तव पुत्रत्वं प्राप्नुयाव सुरोत्तम ।
यो ह्यावां युधि निर्जेता तस्यावां विहितौ सुतौ ।। ५२ ।।

लक्षालङ्कारः-रूपद्वयेन वायोः दैत्यद्वये सन्निधानात् हतौ च तव पुत्रत्वमित्युक्तम्।

तयोः स वचनं श्रुत्वा तदा नारायणः प्रभुः ।
तौ प्रगृह्य मृधे दैत्यौ दोर्भ्यां तौ समपीडयत् ।। ५३ ।।

ऊरुभ्यां निधनं चक्रे तावुभौ मधुकैटभौ ।
तौ हतौ चाप्लुतौ तोये वपुर्भ्यामेकतां गतौ ।

---

(०१)(२) तथाऽभूत्तुमुलं युद्धं वर्षपूगास्सहस्रशः ।.

मेदौ मुमुचतुर्दैत्यौ मथ्यमानौ जलोर्मिभिः ।। ५४ ।।

मेदसा तज्जलं व्याप्तं ताभ्यामन्तर्दधे तदा ।
नारायणश्च भगवानसृजद्विविधाः प्रजाः ।। ५५ ।।

दैत्ययोर्मेदसाच्छन्ना सर्वा राजन्वसुन्धरा ।
तदा प्रभृति कौन्तेय मेदिनीति स्मृता मही ।। ५६ ।।

प्रभावात्पद्मनाभस्य शाश्वती च कृता नृणाम् ।। ५७ ।।

अस्मिन् पर्वणि ३४ अध्याये ५७ श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(४) चतुर्थाऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अर्घाभिहरणपर्वणि शिशुपालक्रोधे चतुस्त्रिंशोऽध्यायः।। ३४।।

# ३५. पञ्चत्रिंशोऽध्यायः

## 02-05-35

वराहावतारकथनम् ।। १ ।।नृसिंहावतारकथनम् ।। २ ।। वामनावतारकथनम् ।। ३ ।। दत्तात्रेयावतारकथनम् ।।४।। परशुरामावतारकथा ।। ५ ।। रामावतारकथा ।। ६ ।।

भीष्मः

प्रादुर्भावसहस्राणि समतीतान्यनेकशः ।
यथाशक्ति तु वक्ष्यामि शृणु तान्कुरुनन्दन ।। १ ।।

पुरा कमलनाभस्य स्वपतः सागराम्भसि ।
पुष्करे यत्र सम्भूता देवा ऋषिगणैः सह ।। २ ।।

एष पौष्करिको नाम प्रादुर्भावः प्रकीर्तितः ।

पुराणः कथ्यते यत्र वेदश्रुतिसमाहितः ।
वाराहस्तु श्रुतिमुखः प्रादुर्भावो महात्मनः ।। ३ ।।

लक्षालङ्कारः- पौष्करिक इत्यत्र पौष्करिकः पुष्करसम्बन्धी प्रादुर्भावः पद्मनाभाख्यप्रादुर्भावः।

यत्र विष्णुः सुरश्रेष्ठो वाराहं रूपमास्थितः ।
उज्जहार महीं तोयात्सशैलवनकाननाम् ।। ४ ।।

वेदपादो यूपदंष्ट्रः क्रतुदन्तश्चितीमुखः ।
अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः ।। ५ ।।

अहोरात्रेक्षणो दिव्यो वेदाङ्गः श्रुतिभूषणः ।
आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् ।। ६ ।।(०१)

धर्मसत्यमयः श्रीमान्कर्मविक्रमसत्कृतः।
प्रायश्चित्तनखो धीरः पशुजानुर्महावृषः ।। ७ ।।(०२)

औद्गात्रहोमलिङ्गोऽसौ फलबीजमहौषधिः ।
बाह्यान्तरात्मा मन्त्रास्थिविकृतः सौम्यदर्शनः ।। ८ ।।

वेदिस्कन्धो हविर्गन्धो हव्यकव्यादिवेगवान् ।
प्राग्वंशकायो द्युतिमान्नानादीक्षाभिराचितः ।। ९ ।।(०३)

दक्षिणाहृदयो योगी महाशास्त्रमयो महान् ।
उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्तभूषणः ।। १० ।।(०४)

छायापत्नीसहायो वै मणिशृङ्ग इवोच्छ्रितः ।। ११ ।।

एवं यज्ञवराहो वै भूत्वा विष्णुः सनातनः ।

---

(०१) (३) क- स्रुवस्तुण्डः । क- स्रुवं तुण्डं.

(०२)(२)क- क्रमविक्रमत्कृतः । क- क्रयविक्रम । क- कर्मवित् कर्मसत्कृतः ।.

(०३) (१) क- हविस्कन्धो। क-देवस्कन्धो.

(०४) (२) क- सत्रमयो.

महीं सागरपर्यन्तां सशैलवनकाननाम् ।। १२ ।।

एकार्णवजले भ्रष्टामेकार्णवगतः प्रभुः।
मज्जितां सलिले तस्मिन्स्वदेवीं पृथिवीं तदा।
उज्जहार विषाणेन मार्कण्डेयस्य पश्यतः ।। १३ ।।(०१)

शृङ्गेणेमां समुद्धृत्य लोकानां हितकाम्यया ।
सहस्रशीर्षो देवो हि निर्ममे जगतीं प्रभुः ।। १४ ।।

एवं यज्ञवराहेण भूतभव्यभवात्मना ।
उद्धृता पृथिवी देवी सागराम्बुधरा पुरा ।। १५ ।।

निहता दानवाः सर्वे देवदेवेन विष्णुना ।। १६ ।।

वाराहः कथितो ह्येष नारसिंहमथो शृणु ।
यत्र भूत्वा मृगेन्द्रेण हिरण्यकशिपुर्हतः ।। १७ ।।

## (नृसिंहावतारवर्णनम्)

दैत्येन्द्रो बलवान्राजन्सुरारिर्बलगर्वितः ।
हिरण्यकशिपुर्नाम आसीत्त्रैलोक्यकण्टकः ।। १८ ।।

दैत्यानामादिपुरुषो वीर्यवान्धृतिमान्बली ।
प्रविश्य स वनं राजंश्चकार तप उत्तमम् ।। १९ ।।(०२)

दशवर्षसहस्राणि शतानि दश पञ्च च ।
जपोपवासैस्तस्यासीत्स्थाणुर्मौनव्रतो दृढः ।। २० ।।

लक्षालङ्कारः-जपोपवासैः इत्यत्र तस्य प्रागुक्ततपसः जपोपवासैः तपोनिमित्तजपोपवासैरित्यर्थः । स्थाणुः स्थाणुवन्निश्चल आसीत् मौनव्रतश्चाभवदिति क्रियाद्वयसम्बन्धः ।

ततो दमशमाभ्यां च ब्रह्मचर्येण चानघ ।

(०१) (१) क- मग्नां भ्रष्टामेकार्णवे प्रभुः । क- हृष्टामेकार्णवगतिः.
(०२)(२) क- विर्येणाप्रतिमो.

ब्रह्मा प्रीतमनास्तस्य तपसा नियमेन च ।। २१ ।।

ततः स्वयम्भूर्भगवान्स्वयमागम्य भूपते ।
विमानेनार्कवर्णेन हंसयुक्तेन भास्वता ।। २२ ।।[०१]

आदित्यैर्वसुभिः साध्यैः मरुद्भिर्दैवतैः सह ।
रुद्रैर्विश्वसहायैश्च यक्षराक्षसकिन्नरैः ।। २३ ।।

दिशाभिर्विदिशाभिश्च नदीभिः सागरैस्तथा ।
नक्षत्रैश्च मुहूर्तैश्च खेचरैश्चापरैर्ग्रहैः ।। २४ ।।

देवर्षिभिस्तपोयुक्तैः सिद्धैः सप्तर्षिभिस्तथा ।
राजर्षिभिः पुण्यतमैर्गन्धर्वैरप्सरोगणैः ।। २५ ।।

चराचरगुरुः श्रीमान्वृतः सर्वसुरैस्तथा ।
ब्रह्मा ब्रह्मविदां श्रेष्ठो दैत्यमागम्य चाब्रवीत् ।। २६ ।।

ब्रह्मा

प्रीतोऽस्मि तव भक्तस्य तपसानेन सुव्रत ।
वरं वरय भद्रं ते यथेष्टं काममाप्नुहि ।। २७ ।।

हिरण्यकशिपुः

न देवासुरगन्धर्वा न यक्षोरगराक्षसाः ।
न मानुषाः पिशाचाश्च हन्युर्मां देवसत्तम ।। २८ ।।

ऋषयो वा न मां शापैः क्रुद्धा लोकपितामह ।
शपेयुस्तपसा युक्ता वर एष वृतो मया ।। २९ ।।[०२]

न शस्त्रेण न चास्त्रेण गिरिणा पादपेन च ।
न शुष्केण न चार्द्रेण स्यान्न वान्येन मे वधः ।। ३० ।।

---

(०१) (४) भारत

(०२) (१) क- ऋषयो दानवाश्शापैः क्रुद्धा लोके पितामह ।.

नाकाशे वा न भूमौ वा रात्रौ वा दिवसेऽपि वा ।
नान्तर्वा र्वान र्वापि स्याद्वधो मे पितामह ।। ३१ ।।

पशुभिर्वा मृगैर्न स्यात्पक्षिभिर्वा सरीसृपैः ।
ददासि चेद्वरानेतान्देवदेव वृणोम्यहम् ।। ३२ ।।

ब्रह्मा

एते दिव्या वरास्तात मया दत्तास्तवाद्भुताः ।
सर्वकामान्वरांस्तात प्राप्स्यसे त्वं न संशयः ।। ३३ ।।(०१)

भीष्मः

एवमुक्त्वा स भगवानाकाशेन जगाम ह।
रराजं ब्रह्मलोके स ब्रह्मर्षिगणसेवितः ।। ३४ ।।

ततो देवाश्च नागाश्च गन्धर्वा मुनयस्तथा ।
वरप्रदानं श्रुत्वा ते ब्रह्माणमुपतस्थिरे ।। ३५ ।।

देवाः

वरेणानेन भगवन्बाधिष्यति स नोऽ सुरः ।
तत्प्रसीदस्व भगवन्वधोऽस्य प्रविचिन्त्यताम् ।। ३६ ।।(०२)

भवान्हि सर्वभूतानां स्वयम्भूरादिकृद्विभुः ।
स्रष्टा च हव्यकव्यानामव्यक्तप्रकृतिर्ध्रुव र्धुवम् ः ।। ३७ ।।

भीष्मः

ततो लोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः ।
प्रोवाच भगवान्वाक्यं सर्वदेवगणांस्तदा ।। ३८ ।।

ब्रह्मा

(०१)(३) क- सर्वकामान् वरैस्तात प्राप्स्यसि त्वमसंशयम् । क- यथाकामं.
(०२) (३) क- कालेनापि प्रसीदस्व.

अवश्यं त्रिदशास्तेन प्राप्तव्यं तपसः फलम् ।
तपसोऽन्तेऽस्य भगवान्वधं कृष्णः करिष्यति ।। ३९ ।।

भीष्मः

एतच्छ्रुत्वा सुराः सर्वे ब्रह्मणा तस्य वै वधम् ।
स्वानि स्थानानि दिव्यानि जग्मुस्ते वै मुदान्विताः ।। ४० ।।

लब्धमात्रे वरे चापि सर्वास्ता बाधते प्रजाः ।
हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः ।। ४१ ।।

राज्यं चकार दैत्येन्द्रो दैत्यसङ्घैः समावृतः ।
सप्त द्वीपान्वशे चक्रे लोकान्लोकान्तरान्बलात् ।। ४२ ।।

दिव्यलोकान्समस्तान्वै भोगान्दिव्यानवाप सः ।
देवांस्त्रिभुवनस्थांस्तान्पराजित्य महासुरः ।। ४३ ।।

त्रैलोक्यं वशमानीय स्वर्गे वसति दानवः ।
यदा वरमदोन्मत्तो न्यवसद्दानवो दिवि ।। ४४ ।।

अथ लोकान्समस्तांश्च विजित्य स महाबलः(सुरः) ।
भवेयमहमेवेन्द्रः सोमोऽग्निर्मारुतो रविः ।। ४५ ।।

सलिलं चान्तरिक्षं च नक्षत्राणि दिशो दश ।
अहं क्रोधश्च कामश्च वरुणो वसवोऽर्यमा ।। ४६ ।।[०१]

धनदश्च धनाध्यक्षो यक्षः किम्पुरुषाधिपः ।
एते भवेयमित्युक्त्वा स्वयं भूत्वा बलात्स च ।। ४७ ।।

तेषां गृहीत्वा स्थानानि तेषां कार्याण्यवाप सः ।
इज्यश्चासीन्मखवरैः स तैर्देवर्षिसत्तमैः ।

(०१) (४)क- यमः.

नरकस्थान्समानीय स्वर्गस्थांस्तांश्चकार सः ।। ४८ ।।[०१]

एवमादीनि कर्माणि कृत्वा दैत्यपतिर्बली ।। ४९ ।।

आश्रमेषु महाभागान्मुनीन्वै संशितव्रतान् ।
सत्यधर्मरतान्(परान्)दान्तान्पुरा धषितवांस्तु(श्च) सः ।
या(य)ज्ञीयान्कृतवान्दैत्यानयज्ञीयांश्च देवताः ।। ५०।।[०२]

यत्र यत्र सुरा जग्मुस्तत्र तत्र व्रजत्युत ।
स्थानानि देवतानां तु हृत्वा राज्यमपालयत् ।। ५१ ।।

पञ्च कोट्यश्च वर्षाणि नियुतान्येकषष्टि च ।
षष्टिश्चैव सहस्राणां जग्मुस्तस्य दुरात्मनः ।। ५२ ।।

एतद्वर्षं स दैत्येन्द्रो भोगैश्वर्यमवाप सः ।। ५३ ।।

तेनातिबाध्यमानास्ते दैत्येन्द्रेण बलीयसा ।
ब्रह्मलोकं सुरा जग्मुः सर्वे शक्रपुरोगमाः ।
पितामहं समासाद्य खिन्नाः प्राञ्जलयोऽब्रुवन् ।। ५४ ।।

देवाः

भगवान्भूतभव्येश नस्त्रायस्व इहागतान् ।
भयं दितिसुताद्धोरं भवत्यद्य दिवानिशम् ।। ५५ ।।

भगवन्सर्वभूतानां स्वयम्भूरादिकृद्विभुः ।
स्रष्टा त्वं हव्यकव्यानामव्यक्तप्रकृतिर्ध्रुवः ।। ५६ ।।

ब्रह्मा

श्रूयतां परमं देवैः दुर्विज्ञेया ममा(या)पि च ।। ५७ ।।[०३]

---

(०१) (४)क- देवकिन्नरसत्तमैः ।.

(०२)(४)क- न याज्ञीयाश्च देवताः । क-न याज्ञीयांश्च दैवतान्.

(०३) (१) क- श्रुयतां परमं दैवं दुर्विज्ञेयं मयाऽपि च । क- क्षुयतां परमं दिव्यं दुर्विज्ञेयं । क- श्रूयतामपरं देवै दुर्विज्ञेयं ममापिच ।.(श्रूयतामापदेवं हि).

नारायणस्तु पुरुषो विश्वरूपो महाद्युतिः ।
अव्यक्तः सर्वभूतानामचिन्त्यो विभुरव्ययः।
ममापि स तु युष्माकं व्यसने परमा गतिः ।। ५८ ।।

नारायणः परोऽव्यक्तादहमव्यक्तसम्भवः ।
मत्तो जज्ञुः प्रजा लोकाः सर्वे देवासुराश्च ते ।। ५९ ।।

देवा यथाहं युष्माकं तथा नारायणो मम ।
पितामहोऽहं सर्वस्य स विष्णुः प्रपितामहः ।। ६० ।।

तमिमं विबुधा दैत्यं स विष्णुः संहरिष्यति ।
तस्य नास्ति ह्यशक्यं च तस्माद्व्रजत मा चिरम् ।। ६१ ।।

भीष्मः

पितामहवचः श्रुत्वा सर्वे ते भरतर्षभ ।
विबुधा ब्रह्मणा सार्धं जग्मुः क्षीरोदधिं प्रति ।। ६२ ।।

आदित्या मरुतः साध्या विश्वे च वसवस्तथा ।
रुद्रा महर्षयश्चैव अश्विनौ च सुरूपिणौ ।। ६३ ।।

अन्ये च दिव्या ये राजंस्ते सर्वे सगणाः सुराः ।
चतुर्मुखं पुरस्कृत्य श्वेतद्वीपमुपस्थिताः ।। ६४ ।।(०१)

गत्वा क्षीरसमुद्र तं शाश्वतीं परमां गतिम् ।
अनन्तशयनं देवमनन्तं दीप्ततेजसम् ।। ६५ ।।(०२)

शरण्यं त्रिदशा विष्णुमुपतस्थुः सनातनम् ।। ६६ ।।

देवं ब्रह्ममयं यज्ञं ब्रह्मदेवं महाबलम् ।
भूतं भव्यं भविष्यच्च प्रभुं लोकनमस्कृतम् ।

---

(०१)(४) मुपागताः । क- मुपाद्रवन्.
(०२) (१) क- त श्वेतं मसासाद्य समुद्रं .

नारायणं विभुं देवं शरण्यं शरणं गताः ।। ६७ ।।

देवाः

त्रायस्व नोऽद्य देवेश हिरण्यकशिपोर्वधात् ।
त्वं हि नः परमो धाता ब्रह्मादीनां सुरोत्तम ।। ६८ ।।

उत्फुल्लपद्मपत्राक्ष शत्रुपक्षभयङ्कर ।**
क्षयाय दितिवंशस्य शरण्यस्त्वं भविष्यसि ।। ६९ ।।(०१)

भीष्मः

देवानां वचनं श्रुत्वा तदा विष्णुः शुचिश्रवाः ।
अदृश्यः सर्वभूतानां वक्तुमेवोपचक्रमे ।। ७० ।।

श्रीविष्णुरु(भगवानु)वाच

भयं त्यजध्वममरा अभयं वो ददाम्यहम् ।
तदेवं त्रिदिवं देवाः प्रतिपद्यत मा चिरम् ।। ७१ ।।

एषोऽहं सगणं दैत्यं वरदानेन दर्पितम् ।
अवध्यममरेन्द्राणां दानवेन्द्रं निहन्म्यहम् ।। ७२ ।।

ब्रह्मा

भगवन्भूतभव्येश खिन्ना ह्येते भृशं सुराः ।
तस्मात्त्वं जहि दैत्येन्द्रं क्षिप्रं कालोऽस्य मा चिरम् ।। ७३ ।।

श्रीभगवान्

क्षिप्रं ब्रह्मन्(देवाः) करिष्यामि त्वरया दैत्यनाशनम् ।
तस्मात्त्वं विबुधाश्चैव प्रतिपद्यत वै दिवम् ।। ७४ ।।

भीष्मः

---

(०१) (१) क- त्वं फुल्लाम्बुजपत्राक्ष । क- उत्फुल्लामलपद्मक्ष क- उत्फुल्लामलपत्राक्ष ।.(भवास्य नः).

एवमुक्त्वा स भगवान्विसृज्य त्रिदिवेश्वरान् ।
नरस्यार्धतनुं कृत्वा सिंहस्यार्धतनुं तथा ॥ ७५ ॥

नारसिंहेन वपुषा पाणिं निष्पिष्य पाणिना ।
भीमरूपो महातेजा व्यादितास्य इवान्तकः ॥ ७६ ॥(०१)

हिरण्यकशिपुं राजन्जगाम हरिरीश्वरः ॥ ७७ ॥

दैत्यास्तमागतं दृष्ट्वा नारसिंहं महाबलम् ।
ववर्षुः शस्त्रवर्षैस्ते सुसङ्क्रुद्धास्तदा हरिम् ॥ ७८ ॥

तैः सृष्टान् सर्वशस्त्राणि भक्षयामास वै हरिः ।
जघान च रणे दैत्यान्सहस्राणि बहून्यपि ॥ ७९ ॥(०२)

लक्षालङ्कारः-तैः सृष्टान् इत्यत्र शरानिति योग्यपदाध्याहारः ।

तान्निहत्य च दैत्येन्द्रान्सर्वान् महाबलान्
अभ्यधावत्सुसङ्क्रुद्धो दैत्येन्द्रं बलगर्वितम् ॥ ८० ॥(०३)

जीमूतघनसङ्काशो जीमूतघननिस्वनः ।

जीमूत इव दीप्तौजा जीमूत इव वेगवान् ।

देवारिर्दितिजो दुष्टो नृसिंहं समुपाद्रवत् ॥ ८१ ॥

एवं प्रमथमालन्तमसुरेन्द्रोऽभ्यधावत ।

दैत्यं सोऽतिबलं दृष्ट्वा क्रुद्धशार्दूलविक्रमम् ।
दीप्तैर्दैत्यगणैर्गुप्तं खरैर्नखमुखैरुत ॥ ८२ ॥(०४)

ततः कृत्वा तु युद्धं वै तेन दैत्येन वै हरिः ।

---

(०१) (२)क- संस्पृश्य । क-सङ्गृह्य.

(०२) (१) तैर्विसृष्टानि (२) मोक्षयामास.

(०३) (३) कुद्धान्

(०४)(२)क- दृप्तं शार्दूलसमविक्रमम् । क- दृप्तशार्दूल.

सन्ध्याकाले महातेजाः प्रघाणे च त्वरान्वितः ।। ८३ ।।[०१]

ऊरौ निधाय दैत्येन्द्रं निर्बिभेद नखैर्हि तम् ।
महाबलं महावीर्यं वरदानेन दर्पितम् ।। ८४ ।।

दैत्यश्रेष्ठं सुरश्रेष्ठो जघान तरसा हरिः ।। ८५ ।।

हिरण्यकशिपुं हत्वा सर्वदैत्यांश्च वै तदा ।
विबुधानां प्रजानां च हितं कृत्वा महाद्युतिः ।
प्रमुमोद हरिर्देवः स्थाप्य धर्मं तदा भुवि ।। ८६ ।।

एष ते नारसिंहोऽत्र कथितः पाण्डुनन्दन ।
शृणु त्वं वामनं नाम प्रादुर्भावं महात्मनः ।। ८७ ।।

## (वामनावतारवर्णनम्)

पुरा त्रेतायुगे राजन्बलिर्वैरोचनोऽभवत् ।
दैत्यानां पार्थिवो वीरो बलेनाप्रतिमो बली ।। ८८ ।।

तदा बलिर्महाराज दैत्यसङ्घैः समावृतः ।
विजित्य तरसा शक्रमिन्द्रस्थानमवाप सः ।। ८९ ।।

तेन वित्रासिता देवा बलिनाऽऽखण्डलादयः ।
ब्रह्माणं तु पुरस्कृत्य गत्वा क्षीरोदधिं तदा ।। ९० ।।

तुष्टुवुः सहिताः सर्वे देवं नारायणं प्रभुम् ।
स तेषां दर्शनं चक्रे विबुधानां हरिः स्तुतः ।। ९१ ।।[०२]

प्रसादजं ह्यस्य विभोरदित्यां जन्म चोच्यते ।। ९२ ।।

अदितेरपि पुत्रत्वमेत्य यादवनन्दनः ।
एष विष्णुरिति ख्यात इन्द्रस्यावरजोऽभवत् ।। ९३ ।।

---

(०१)(४) क- भगनान्ते.

(०२)(३) क- तेषां प्रसादं चक्रेऽथ.

तस्मिन्नेव च काले तु दैत्येन्द्रो वीर्यवान्बलिः ।
अश्वमेधं क्रतुश्रेष्ठमाहर्तुमुपचक्रमे ।। ९४ ।।

वर्तमाने तदा यज्ञे दैत्येन्द्रस्य युधिष्ठि ।
स विष्णुर्वामनो भूत्वा प्रच्छन्नो ब्रह्मवेषधृक् ।। ९५ ।।

मुण्डो यज्ञोपवीती च कृष्णाजिनधरः शिखी ।
पलाशदण्डं सङ्गृह्य वामनोऽद्भुतदर्शनः ।। ९६ ।।

प्रविश्य स बलेर्यज्ञे वर्तमाने तु दक्षिणाम् ।
देहीत्युवाच दैत्येन्द्रं विक्रमांस्त्रीन्ममैव ह ।। ९७ ।।

दीयतां त्रिपदीमात्रमित्ययाचन्महासुरम् ।
स तथेति प्रतिश्रुत्य प्रददौ विष्णवे तदा।
तेन लब्ध्वा हरिर्भूमिं जृम्भयामास वै भृशम् ।। ९८ ।।

स शिशुः सदिवं खं च पृथिवीं च विशाम्पते ।
त्रिभिर्विक्रमणैरेतत्सर्वमाक्रमताभिभूः ।। ९९ ।।

बलेर्बलवतो यज्ञे बलिना विष्णुना पुरा ।
विक्रमैस्त्रिभिरक्षोभ्याः क्षोभितास्ते महासुराः ।। १०० ।।

विप्रचित्तिमुखाः क्रुद्धा दैत्यसङ्घा महाबलाः ।
नानावक्त्रा महाकाया नानावेषधरा नृप ।। १०१ ।।

नानाप्रहरणा रौद्रा नानामाल्यानुलेपनाः ।
स्वान्यायुधानि सङ्गृह्य प्रदीप्ता इव तेजसा ।। १०२ ।।
क्रममाणं हरिं तत्र उपावर्तन्त भारत ।। १०३ ।।

प्रमथ्य सर्वान्दैतेयान्पादहस्ततलैस्तु तान् ।

रूपं कृत्वा महाभीमं महदादिसमेदिनीम् ।। १०४ ।।(०१)

लक्षालङ्कारः-महदादिसमेदिनीम् इत्यत्र महदादिलोकैः सहितमेदिनी ।

सम्प्राप्य पादमाकाशमादित्यसदने स्थितः ।
अत्यरोचत भूतात्मा भास्करं स्वेन तेजसा ।। १०५ ।।(०२)

प्रकाशयन्दिशः सर्वाः प्रदिशश्च महाबलः ।
शुशुभे स महाबाहुः सर्वलोकान्प्रकाशयन् ।। १०६ ।।

तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे।
नभः प्रक्रममाणस्य नाभ्यां किल तदा स्थितौ ।
परमाक्रममाणस्य जानुभ्यां तौ व्यवस्थितौ ।। १०७ ।।

विष्णोरमितवीर्यस्य वदन्त्येवं द्विजातयः ।। १०८ ।।

अथासाद्य कपालं स अण्डस्य तु युधिष्ठिर ।
तच्छिद्रात्स्यन्दिनी तस्य पादाद्भ्रष्टा तु निम्नगा ।
ससार सागरं साऽऽशु पावनी सागरङ्गमा ।। १०९ ।।

जहार मेदिनीं सर्वां हत्वा दानवपुङ्गवान् ।। ११० ।।

आसुरीं श्रियमाहृत्य त्रींल्लोकान्स जनार्दनः ।
सपुत्रदारानसुरान्पाताले तानपातयत् ।। १११ ।।

नमुचिः शम्बरश्चैव प्रह्लादश्च महामनाः ।
पादपाताभिनिर्धूताः पाताले विनिपातिताः ।। ११२ ।।

महाभूतानि भूतात्मा स विशेषेण वै हरिः ।
कालं च सकलं राजन्गात्रभूतान्यदर्शयत् ।। ११३ ।।(०३)

---

(०१) (२) जहाराशु

(०२) (१) क- दिवं । ग- दिशं.

(०३)(२) क- सविशेषाणि.

तस्य गात्रे जगत्सर्वमानीतमिव दृश्यते ।
न किञ्चिदस्ति लोकेषु नाप्तं महात्मना ।। ११४ ।।(०१)

तद्धि रूपं महेशस्य देवदानवमानवाः ।
दृष्ट्वा तं मुमुहुः सर्वे विष्णुतेजोऽभिपीडिताः ।। ११५ ।।

बलिर्बद्धोऽभिमानी च यज्ञवाटे महात्मना ।
विरोचनकुलं सर्वं पाताले विनिपातितम् ।। ११६ ।।(०२)

एवंविधानि कर्माणि कृत्वा गरुडवाहनः ।
न विस्मयमुपागच्छत्पारमेष्ठ्येन तेजसा ।। ११७ ।।

स सर्वममरैश्वर्यं सम्प्रदाय शचीपतेः।
त्रैलोक्यं च ददौ शक्रे विष्णुर्दानवसूदनः ।। ११८ ।।

एष ते वामनो नाम प्रादुर्भावो महात्मनः।
वेदविद्भिर्द्विजैरेतत्कथ्यते वैष्णवं यशः ।
मानुषेषु यथा विष्णोः प्रादुर्भावं तथा शृणु ।। ११९ ।।

## (दत्तात्रेयावतारवर्णनम्)

विष्णोः पुनर्महाराज प्रादुर्भावो महात्मनः ।
दत्तात्रेय इति ख्यात ऋषिरासीन्महायशाः ।। १२० ।।

तेन नष्टेषु वेदेषु क्रियासु च मखेषु च ।
चातुर्वर्ण्ये च सङ्कीर्णे धर्मे शिथिलतां गते ।। १२१ ।।

अभिवर्धति चाधर्मे सत्ये नष्टे स्थितेऽनृते ।
प्रजासु क्षीयमाणासु धर्मे चाकुलतां गते ।। १२२ ।।

सयज्ञाः सक्रिया वेदाः प्रत्यानीताश्च तेन वै ।

---

(०१)(२) क- मधिपश्यति । क- मधिद्दश्यते.
(०२)(४) क- वेशितम्.

चातुर्वर्ण्यमसङ्कीर्णं कृतं तेन महात्मना ।। १२३ ।।

स एष, वै यदा प्रादहैहयाधिपतेर्वरम् ।
तं हैहयानामधिपस्त्वर्जुनोऽभिप्रसादयत् ।। १२४ ।।

वने पर्यचरत्सम्यक्शुश्रूषुरनसूयकः ।
निर्ममो निरहङ्कारो दीर्घकालमतोषयत् ।। १२५ ।।

आराध्य दत्तात्रेयं हि अगृह्णात्स वरानिमान् ।
आप्तादाप्ततराद्विप्राद्विद्वान्विद्वन्निषेवितात् ।। १२६ ।।

ऋतेऽमरत्वं विप्रेण दत्तात्रेयेण धीमता ।
वरैश्चतुर्भिः प्रवृत इमांस्तत्राभ्यनन्दत ।। १२७ ।।

श्रीमान्मनस्वी बलवान्सत्यवागनसूयकः ।
सहस्रबाहुर्भूयासमेष मे प्रथमो वरः ।। १२८ ।।

जरायुजाण्डजं सर्वं सर्वं चैव चराचरम् ।
प्रशास्तुमिच्छामि(च्छे) धर्मेण द्वितीयस्त्वेष मे वरः ।। १२९ ।।

पितन्देवानृषीन्विप्रान्यजेयं विपुलैर्मखैः।
अमित्रान्निशितैर्बाणैस्तृतीयो वर एष मे ।
अमित्रान्निशितैर्बाणैर्घातयेयं रणाजिरे ।। १३० ।।

दत्तात्रयेह भगवंस्तृतीयो वर एष मे ।। १३१ ।।(०१)

यस्य नासीन्न भविता न चास्ति सदृशः पुमान् ।
इह वा दिवि वा लोके स मे हन्ता भवेदिति ।। १३२ ।।

सोऽर्जुनः कृतवीर्यस्य वरः पुत्रोऽभवद्युधि ।
स सहस्रं सहस्राणां माहिष्मत्यामवर्धत ।। १३३ ।।(०२)

---

(०१) (१) क- कोश इदमर्धं नास्ति.

(०२)(२) क- महाबलः.

पृथिवीमखिलां जित्वा द्वीपांश्चापि समुद्रिणः ।
नभसीव ज्वलन्सूर्यः पुण्यैः कर्मभिरर्जुनः ।। १३४ ।।

इन्द्रद्वीपं कशेरुं च ताम्रद्वीपं गभस्तिमत्।
गान्धर्वं वारुणं द्वीपं सौम्याक्षमिति च प्रभुः ।
पूर्वैरजितपूर्वांश्च द्वीपानजयदर्जुनः ।। १३५ ।।(०१)

सौवर्णं सर्वमप्यासीद्विमानवरमुत्तमम् ।
चतुर्धाव्यभजद्राष्ट्रं तद्विभज्यान्वपालयत् ।। १३६ ।।

एकांशेनाहरत्सेनामेकांशेनावसद्गृहान्।
यस्तु तस्य तृतीयांशो राजाऽऽसीज्जनसङ्ग्रहे ।। १३७ ।।

आप्तः परमकल्याणस्तेन यज्ञानकल्पयत् ।। १३८ ।।

ये दस्यवो ग्रामचरा अरण्ये च वसन्ति ये ।
चतुर्थेन च सोंऽशेन तान्सर्वान्प्रत्यषेधयत् ।। १३९ ।।

सर्वेभ्यश्चान्तवासिभ्यः कार्तवीर्योऽहरद्बलिम् ।
आहृतं स्वबलैर्यत्तदर्जुनश्चादम मन्यते ।। १४० ।।

काको वा मूषिको वापि तं तमेव न्यबर्हयत् ।
द्वाराणि नापिधीयन्ते राष्ट्रेषु नगरेषु च ।। १४१ ।।

स एव राष्ट्रपालोऽभूत्स्त्रीपालोऽभवदर्जुनः ।
स एवासीदजापालः स गोपालो विशाम्पते ।। १४२ ।।

स स्मारण्ये मनुष्याणां राजा क्षेत्राणि रक्षति ।
इदं तु कार्तवीर्यस्य बभूवासदृशं जनैः ।। १४३ ।।

न पूर्वे नापरे तस्य गमिष्यन्ति गतिं नृपाः ।

---

(०१)(२)क- ताम्रपर्णि गभस्तिमान् । क- ताम्रपर्णमगास्तिमत् (३) गन्धर्ववारुणद्वीपं सामयं नाग इति प्रभुः। क- सौम्यमार्षमिति प्रभुः । क- सौम्यार्षमिति च प्रभुः ।.

यदर्णवे प्रयातस्य वस्त्रं न परिषिच्यते ॥ १४४ ॥

शतं वर्षसहस्राणामनुशिष्यार्जुनो महीम् ।
दत्तात्रेयप्रसादेन एवं राज्यं चकार सः ॥ १४५ ॥

एवं बहूनि कर्माणि चक्रे लोकहिताय सः।
दत्तात्रेय इति ख्यातः प्रादुर्भावस्तु वैष्णवः ।
कथितो भरतश्रेष्ठ शृणु भूयो महात्मनः ॥ १४६ ॥

यदा भृगुकुले जन्म यदर्थं च महात्मनः ।
जामदग्न्य इति ख्यातः प्रादुर्भावस्तु वैष्णवः ॥ १४७ ॥

जमदग्निसुतो राजन्रामो नाम स वीर्यवान् ।
हैहयान्तकरो राजन्स रामो बलिनां वरः ॥ १४८ ॥

कार्तवीर्यो महावीर्यो बलेनाप्रतिमस्तथा ।
रामेण जामदग्न्येन हतो विषममाचरन् ॥ १४९ ॥

तं कार्तवीर्यं राजानं हेहयानामरिन्दमम् ।
रथस्थं पार्थिवं रामः पातयित्वावधीद्रणे ॥ १५० ॥

जम्भस्य यज्ञे हन्ता स ऋत्विजं चैव संस्तरे।
जम्भस्य मूर्ध्नि भेत्ता च हन्ता च शतदुन्दुभेः ॥ १५१ ॥

स एष कृष्णो गोविन्दो जातो भृगुषु वीर्यवान् ।
सहस्रबाहुमुद्धर्तुं सहस्रजितमाहवे ॥ १५२ ॥

क्षत्रियाणां चतुष्षष्टिमयुतानां महायशाः ।
सरस्वत्यां समेतानि एष वै धनुषाजयत् ॥ १५३ ॥

ब्रह्मद्विषां वधे तस्मिन्सहस्राणि चतुर्दश ।
पुनर्जग्राह शूराणामन्तं चक्रे नरर्षभः ॥ १५४ ॥

ततो दशसहस्रस्य हन्ता पूर्वमरिन्दमः ।

सहस्रं मुसलेनाहन्सहस्रमुदकृन्तत ।। १५५ ।।

लक्षालङ्कारः-उदकृन्तत 'कृन्त च्छेदने' इति धातोः परशुना चिच्छेद। चतुर्दशसहस्राणि उक्तविधया त्रिसहस्रन्यूनचतुर्दशसहस्राणि कणधूमं तृणकणैः मृत्तिकाकणैश्च सहकृतधूमं, 'सुड्डमण्णु' इत्यपभ्रंशभाषा । तमपाययत् एकवारं कृतशिक्षां त्रिसहस्रामपि अपाययदिति वा चतुर्दशसहस्राणि ।

चतुर्दश सहस्राणि कणधूममपातयत् ।
शिष्टान्ब्रह्मद्विषश्छित्त्वा ततोऽस्नायत भार्गवः ।। १५६ ।।

रामरामेत्यभिक्रुष्टैः ब्राह्मणैः क्षत्रियार्दितैः ।
निघ्नन् शतसहस्राणि रामः परशुनाभिभूः ।। १५७ ।।

लक्षालङ्कारः-रामराम इत्यत्र अभिक्रुष्टैः अभितः क्रुष्टं आक्रोशनं येषां ते तथोक्ताः।

न ह्यमृष्यत तां वाचमार्तैर्भृशमुदीरिताम् ।
भृगो रामाभिधावेति यदान्क्रन्दन्द्विजातयः ।। १५८ ।।

काश्मीरान् दरदान्कुन्तीन्क्षुद्रकान्मालवाञ्छकान् ।
चेदिकाशिकरूषांश्च मलदान् क्रथकैशिकान् ।। १५९ ।।[०१]

अङ्गान्वङ्गान्कलिङ्गांश्च मागधान्काशिकोसलान् ।
शास्त्रयणान्वीतिहोत्रान्किरातान्प्राणिहिंस्रकान् ।। १६० ।।[०२]

एतानन्यांश्च राजेन्द्रान्देशे देशे सहस्रशः ।
निकृत्त्य निशितैर्बाणैः सम्प्रदाय विवस्वते ।। १६१ ।।

कीर्णा क्षत्रियकोटीभिः मेरुमन्दरभूषणा ।
त्रिःसप्तकृत्वः पृथिवी तेन निःक्षत्रिया कृता ।। १६२ ।।

कृत्वा निःक्षत्रियां चैव भार्गवस्समहायशाः ।

---

(०१) (३) ऋषिकान्
(०२)(४) क- कार्तिकेयवान् । क- कार्ति.

इन्द्रगोपकवर्णस्य जीवञ्जीवनिभस्य च ।। १६३ ।।(०१)

लक्षालङ्कारः-जीवञ्जीवनिभस्य च इत्यत्र 'जीवञ्जीवश्चकोरक' इति वचनात् रक्तवर्णचकोराख्य-पक्षिसदृशस्य ।

पूरयामास सरितः क्षतजस्य सरांसि च ।
चकार तर्पणं वीरः पितृणां तासु तेषु च ।। १६४ ।।(०२)

सर्वानष्टादश द्वीपान्वशमानीय भार्गवः ।
सोऽश्वमेधसहस्राणि नरमेधशतानि च ।। १६५ ।।(०३)

इष्ट्वा सागरपर्यन्तां काश्यपाय महीं ददौ ।
तस्याग्रेणानुपर्येति भूमिं कृत्वा विपांसुलाम् ।। १६६ ।।(०४)

ततः कलकृतां सत्यां भार्गवाय महात्मने ।
गाथामप्यत्र गायन्ति ये पुराणविदो जनाः ।। १६७ ।।(०५)

वेदिमष्टादशोत्सन्धां हिरण्यस्यातिपौरुषीम् ।
रामेण जामदग्न्येन प्रतिजग्राह जग्राह काश्यपः ।। १६८ ।।(०६)

लक्षालङ्कारः-वेदिमष्टादशोत्सन्धाम् इत्यत्र अष्टादशोत्सन्धां सप्तद्वीपाः सप्तसमुद्राः मेरुः काञ्चनभूमिः वज्रलेपः लोकालोकश्चेति अष्टादशोत्सन्धाः उत्कृष्टाः सन्धयो यस्याः सा तां, अतिपौरुषीं बहुशः क्षत्रियाणां संहृतत्वात्, हिरण्यस्य क्षत्रियकुलादार्जितनानासुवर्णराशेः सम्बन्धिनीं वेदिं 'वेदिः परिष्कृता भूमिः' इति वचनात् अलङ्कृतभूमिं काश्यपाय ददौ ।

एवमिष्ट्वा महाबाहुः क्रतुभिर्भूरिदक्षिणैः ।

---

(०१) (४) क- बन्धुञ्जीव.

(०२) (१) पूरयित्वा च(३) क- केश इदमर्धं नास्ति ।.

(०३) (४)वाजपेयशतानि

(०४) (१) रामस्तु वसुपूर्णां वै तदा (२) विपाण्डुराम्

(०५) (२) महात्मनः

(०६) (१) वेदिमष्टादशोत्सेधाम्

अन्यद्वर्षशतं रामः सौभे शाल्वमयोधयत् ।। १६९ ।।[०१]

ततः स भृगुशार्दूलस्तं सौभं योधयन्प्रभुः ।
सुबन्धुरं रथं राजन्नास्थाय भरतर्षभ ।। १७० ।।

नग्निकानां कुमारीणां गायन्तीनामुपाशृणोत् ।। १७१ ।।

लक्षालङ्कारः-नग्निकानां कुमारीणाम् इत्यत्र 'नग्निकाऽनागतार्तवा' इत्यभिधानात् नग्निकानां रजोदर्शनरहितानाम् ।

राम राम महाबाहो भृगूणां कीर्तिवर्धन ।
त्यज शस्त्राणि सर्वाणि न त्वं सौभं वधिष्यसि ।। १७२ ।।

चक्रहस्तो गदापाणिर्भीतानामभयङ्करः ।
युधि प्रद्युम्नसाम्बाभ्यां कृष्णः सौभं वधिष्यति ।। १७३ ।।[०२]

तच्छ्रुत्वा पुरुषव्याघ्रस्तत एव वनं ययौ ।
न्यस्य सर्वाणि शस्त्राणि कालकाङ्क्षी महायशाः ।। १७४ ।।

रथं वर्मायुधं चैव शरान्परशुमेव च ।
धनूंष्यप्सु प्रतिष्ठाप्य राजंस्तेपे परं तपः ।। १७५ ।।

ह्रियं प्रज्ञां श्रियं कीर्तिं लक्ष्मीं चामित्रकर्शनः ।
पञ्चाधिष्ठाय धर्मात्मा तं रथं विससर्ज ह ।। १७६ ।।

आदिकाले प्रवृत्तं हि विभजन्कालमीश्वरः ।
नाहनच्छ्रद्धया सौभं न ह्यशक्तो महायशाः ।। १७७ ।।[०३]

लक्षालङ्कारः-आदिकाल इत्यत्र कालं कश्चित्कालपर्यन्तं प्रकृष्टतपआदिसत्कर्माणि विभजन् विशेषेण भजन् श्रद्धया कुमारीणां वाक्येषु श्रद्धया ।

---

(०१) (४) क- सौभं। क- सौभं साङ्क्य.

(०२) (२) क- दीनानां.

(०३) (२) करमीश्वरः (३) नाघ्नत् तं

जामदग्न्य इति ख्यातो यस्त्वसौ भगवानृषिः ।
सोऽस्य भागस्तपस्तेपे भार्गवो लोकविश्रुतः ।। १७८ ।।

लक्षालङ्कारः-सोऽस्य भाग इत्यत्र अस्य कृष्णस्य भागः स्वरूपांशभूतः।

श्रीभीष्मः

शृणु राजंस्तथा विष्णोः प्रादुर्भावं महात्मनः ।
चतुर्विंशे युगे चापि पुण्यश्लोकस्य पाण्डव ।। १७९ ।।(०१)

तिथौ नावमिके जज्ञे तथा दशरथादपि ।
कृत्वाऽऽत्मानं महाबाहुश्चतुर्धा विष्णुरव्ययः ।। १८० ।।

लक्षालङ्कारः-तिथौ नावमिक इत्यत्र नावमिके नवमीसम्बन्धिनि ।

लोके राम इति ख्यातस्तेजसा भास्करोपमः ।
प्रसादनार्थं लोकस्य विष्णुस्तस्य सनातनः ।
कर्मार्थमेव कौन्तेय जज्ञे तत्र महायशाः ।। १८१ ।।(०२)

लक्षालङ्कारः-कर्मार्थमेव इत्यत्र कर्मार्थमेव राक्षसहननाख्यकर्मार्थमेव ।

तमप्याहुर्मनुष्येन्द्रं सर्वभूतपतेस्तनुम् ।। १८२ ।।

यज्ञविघ्नं तदा कृत्वा विश्वामित्रस्य भारत ।
सुबाहुर्निहतस्तेन मारीचस्ताडितो भृशम् ।। १८३ ।।

तस्मै दत्तानि शस्त्राणि विश्वामित्रेण धीमता ।
वधार्थं देवशत्रूणां दुर्वाराणि सुरैरपि ।। १८४ ।।

वर्तमाने महायज्ञे जनकस्य महात्मनः ।

---

(०१) (४) मार्कण्डेयपुरःसरः

(०२) (६) धर्मार्थमेव.

भग्नं माहेश्वरं चापं क्रीडया लीलया परम् ।। १८५ ।।[०१]

लक्षालङ्कारः-भग्नं माहेश्वरम् इत्यत्र 'हेला लीलेत्यमी भावाः क्रियाः शृङ्गारभावजाः' इत्यभिधानात् आ ईषत् लीला शृङ्गाररसजातमन्दहासऋषिमुखनिरीक्षणादिलीला यस्यां सा तया क्रीडया ।

ततो विवाहं सीतायाः कृत्वा स रघुवल्लभः ।
नगरीं पुनरासाद्य मुमुदे तत्र सीतया ।। १८६ ।।[०२]

कस्यचित्त्वथ कालस्य पित्रा तत्राभिचोदितः ।
कैकेय्याः प्रियमन्विच्छन्वनमभ्यवपद्यत ।। १८७ ।।

यः समाः सर्वधर्मज्ञश्चतुर्दश वने वसन् ।
लक्ष्मणानुचरो रामः सर्वभूतहिते रतः ।
चतुर्दश वने तप्त्वा तपो वर्षाणि भारत ।। १८८ ।।

रूपिणी यस्य पार्श्वस्था सीतेत्यभिहिता जनैः ।
पूर्वोचितत्वात् सा लक्ष्मीर्भर्तारमनुशोचती ।। १८९ ।।[०३]

लक्षालङ्कारः-भर्तारमनुशोचती इत्यत्र लोकविडम्बकं भर्तारमनुसृत्य शिलाकण्टकादिषु गमने सति शोचन्ती शोकं दर्शयन्ती ।

जनस्थाने वसन्कार्यं त्रिदशानां चकार सः ।। १९० ।।

मारीचं दूषणं हत्वा खरं त्रिशिरसं तथा ।
चतुर्दश सहस्राणि रक्षसां घोरकर्मणाम् ।
जघान रामो धर्मात्मा प्रजानां हितकाम्यया ।। १९१ ।।

विराधं च कबन्धं च राक्षसौ क्रूरकर्मिणौ ।
जघान च तदा रामो गन्धर्वौ शापविक्षतौ ।। १९२ ।।

---

(०१) (१) तदा यज्ञे (४) क्रीडता

(०२) (१) क- ततस्तु सीतां जग्राह भार्यार्थे जानकिं विभुः ।।

(०३) (२) मनुगच्छति

स रावणस्य भगिनीनासाच्छेदं चकार यत् ।
भार्यावियोगं तं प्राप्य मृगयन्व्यचरद्वनम् ।। १९३ ।।

ततस्तमृष्यमूकं स गत्वा पम्पामतीत्य च ।
सुग्रीवं मारुतिं दृष्ट्वा चक्रे मैत्रीं तयोः स वै ।। १९४ ।।

अथ गत्वा स किष्किन्धां सुग्रीवेण तदा सह ।
निहत्य वालिनं युद्धे वानरेन्द्रं महाबलम् ।। १९५ ।।

अभ्यषिञ्चत्तदा रामः सुग्रीवं वानरेश्वरम ।। १९६ ।।

ततः स वीर्यवान्राजंस्त्वरयन्वै समुत्सुकः ।
विचित्य वायुपुत्रेण लङ्कादेशं निवेदितम् ।। १९७ ।।

सेतुं बद्ध्वा समुद्रस्य वानरैः सहितस्तदा ।
सीतायाः पदमन्विच्छन्रामो लङ्कां विवेश ह ।। १९८ ।।

देवोरगगणानां हि यक्षराक्षसपक्षिणाम् ।
तत्रावध्यं राक्षसेन्द्रं रावणं युधि दुर्जयम् ।। १९९ ।।

युक्तं राक्षसकोटीभिर्भिन्नाञ्जनचयोपमम्।
दुर्निरीक्ष्यं सुरगणैर्वरदानेन दर्पितम् ।
जघान सचिवैः सार्धं सान्वयं रावणं रणे ।। २०० ।।(०१)

त्रैलोक्यकण्टकं वीरं महाकायं महाबलम् ।
रावणं सगणं हत्वा रामो भूतपतिः पुरा ।। २०१ ।।

लङ्कायां तं महात्मानं राक्षसेन्द्रं विभीषणम् ।
अभिषिच्य च तत्रैव अमरत्वं ददौ तदा ।। २०२ ।।

आरुह्य पुष्पकं रामः सीतामादाय पाण्डव ।
सबलः स्वपुरं गत्वा धर्मराज्यमपालयत् ।। २०३ ।।

---

(०१) (१) क- गुप्तं.

दानवो लवणो नाम मधोः पुत्रो महाबलः ।
शत्रुघ्नेन हतो राजंस्ततो रामस्य शासनात् ।। २०४ ।।

एवं बहूनि कर्माणि कृत्वा लोकहिताय सः।
राज्यं चकार विधिवद्रामो धर्मभृतां वरः ।। २०५ ।।

दशाश्वमेधानाजह्रे जारुध्यां [०१]स निरर्गलान् ।। २०६ ।।[०२]

लक्षालङ्कारः-दशाश्वमेधान् इत्यत्र जारुधिर्नाम सरयूतीरदेशविशेषः । निरर्गलान् निष्प्रत्यूहान्।

लक्षालङ्कारपुस्तके ज्योतिरुक्थ्यान् निरर्गलान् इति पाठमादृत्य एतत्प्रतीकं श्लोकेषु न पठ्यते इत्युक्तम् । मातृकालब्धपाठोयम् ।।

नाश्रूयन्ताशुभा वाचो नात्ययः प्राणिनां तदा ।
न वित्तजं भयं चासीद्रामे राज्यं प्रशासति ।। २०७ ।।

प्राणिनां च भयं नासीज्जलानलविधानजम्।
पर्यदेवं न विधवा नानाथाः काश्चनाभवन् ।
सर्वमासीत्तदा तृप्तं रामे राज्यं प्रशासति ।। २०८ ।।

लक्षालङ्कारः-पर्यदेवम् इत्यत्र परितः अदेवं देवरहितगृहं न ।

न सङ्करकरा वर्णा नाकृष्टाकरको जनः ।
न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते ।। २०९ ।।[०३]

लक्षालङ्कारः-नाकृष्टाकरक इत्यत्र अकृष्टे अकर्षणे सति आ समन्तात् करः द्रव्यदानं यस्य सः अकृष्टाकरकः तादृशो जनो न नास्ति ।

---

(०१) (२) लक्षालङ्कारपुस्तके ज्योतिरुक्थ्यान् निरर्गलान् इति पाठमादृत्य 'एतत्प्रतीकं श्लोकेषु न पठ्यते 'इत्युक्तम् । मातृकालब्धपाठोयम् -सम्पादकमण्डली ।।

(०२) (१) क- शताश्व (२) क- मुक्ताश्वान् सन्निरर्गलान् । क- सानुक्थ्यान् सनिरर्गलान् । क- जाह्नव्यां स निरर्गलान् ।.

(०३) (२) न कृष्टकृज्जनः, नाकृष्टकरकृज्जनः

विशः पर्यचरन्क्षत्रं क्षत्रं नापीडयद्विशः ।
नरा नात्यचरन्भार्या भार्या नात्यचरन्पतीन् ।। २१० ।।
नासीदपकृषिर्लोके रामे राज्यं प्रशासति ।। २११ ।।[०१]

लक्षालङ्कारः-नासीत् इत्यत्र योगे योगाभ्यासे अपगता कृषिः प्रयत्नः यस्य स तथोक्तः।

सर्वबीजान्यरोहन्त निर्दस्युः पृथिवी तदा ।
राम एवाभवद्धर्ता रामः पालयिता भवत् ।।

आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः ।
अरोगाः प्राणिनोऽप्यासन्रामे राज्यं प्रशासति ।। २१२ ।।

ऋषीणां देवतानां च मनुष्याणां तथैव च ।
पृथिव्यां सहवासोऽभूद्रामे राज्यं प्रशासति ।। २१३ ।।

सर्वे ह्यासंस्तृप्तरूपास्तदा तस्मिन्विशाम्पते ।
धर्मेण पृथिवीं सर्वामनुशासति भूमिपे ।। २१४ ।।

तपस्तपस्येवाभूच्च धर्मो धर्ममनुव्रतः ।
पृथिव्यां धार्मिके तस्मिन्रामे राज्यं प्रशासति ।। २१५ ।।[०२]

लक्षालङ्कारः-तपः धर्मश्चाभवतामिति सम्बन्धः ।

नाधर्मिष्ठो नरः कश्चिद्बभूव प्राणिनां क्वचित् ।
प्राणापानौ समावास्तां रामे राज्यं प्रशासति ।
गाथामप्यत्र गायन्ति ये पुराणविदो जनाः ।। २१६ ।।

श्यामो युवा लोहिताक्षो मातङ्गानामिवर्षभः ।
आजानुबाहुः सुमुखः सिंहस्कन्धो महाबलः ।। २१७ ।।

---

(०१) (१) नासीदल्पकृषि-

(०२) (१) तपस्येवाभवन् सर्वे सर्वे धर्म०

दश वर्षसहस्राणि दश वर्षशतानि च ।
राज्यं भोगं च सम्प्राप्य शशास पृथिवीमिमाम् ॥ २१८ ॥

रामो रामो राम इति प्रजानामभवन्कथाः ।
रामभूतं जगदिदं रामे राज्यं प्रशासति ॥ २१९ ॥

ऋग्यजुःसामहीनाश्च न तदासन्द्विजातयः ।
उषित्वा दण्डके कार्यं त्रिदशानां चकार सः ॥ २२० ॥

पूर्वापकारिणं सङ्ख्ये पौलस्त्यं मनुजर्षभः ।
देवगन्धर्वनागानामरिं स निजघान ह ॥ २२१ ॥

सत्त्ववान्गुणसम्पन्नो दीप्यमानः स्वतेजसा ॥ २२२ ॥

एवमेव महाबाहुरिक्ष्वाकुकुलवर्धनः ।
रावणं सगणं हत्वा दिवमाक्रमताभिभूः ।
इति दाशरथेः ख्यातः प्रादुर्भावो महात्मनः ॥ २२३ ॥

## (कृष्णावतारवर्णनम्)

ततः कृष्णो महाबाहुर्भीतानामभयङ्करः ।
अष्टाविंशे युगे राजञ्जज्ञे श्रीवत्सलक्षणः ॥ २२४ ॥

पेशलश्च वदान्यश्च लोके बहुमतो नृषु ।
स्मृतिमान्देशकालज्ञः शङ्खचक्रगदाधरः ॥ २२५ ॥[०१]

वासुदेव इति ख्यातो लोकानां हितकृत्सदा ।
वृष्णीनां च कुले जातो भूमेः प्रियचिकीर्षया ॥ २२६ ॥

स नृणामभयं दाता मधुहेति स विश्रुतः।
यमलार्जुनभेत्ता स रिपुस्थानान्यसूदयत् ।

---

(०१) (४) गदासिधृक्

स शक्रोऽर्जुनरामाणां किल स्थानान्यसूदयत् ।। २२७ ।।[०१]

लक्षालङ्कारः-शक्रोऽर्जुन इत्यत्र स्थानानि प्रतिस्थानानि ।

कंसादीन्निजघानाजौ दैत्यान्मानुषविग्रहान् ।
अयं लोकहितार्थाय प्रादुर्भावो महात्मनः ।। २२८ ।।

## ( कल्क्यवतारवर्णनम् )

कल्की विष्णुयशा नाम भूयश्चोत्पत्स्यते हरिः ।
कलेर्युगान्ते सम्प्राप्ते धर्मे शिथिलतां गते ।। २२९ ।।

पाषण्डिनां गणानां हि वधार्थं भरतर्षभः ।
धर्मस्य च विवृद्ध्यर्थ विप्राणां हितकाम्यया ।। २३० ।।

एते चान्ये च बहवो दिव्या देवगणैर्युताः ।
प्रादुर्भावाः पुराणेषु गीयन्ते ब्रह्मवादिभिः ।। २३१ ।।

अस्मिन् पर्वणि ३५अध्याये २३१श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(५) पश्चमोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अर्घाभिहरणपर्वणि शिशुपालक्रोधे पश्चस्त्रिंशोऽध्यायः।। ३५।।

# ३६. षट्त्रिंशोऽध्यायः

## 02-05-36

वैशम्पायनः

एवमुक्तोऽथ कौन्तेयस्ततः पौरवनन्दनः ।

(०१) शकटार्जुनरामाणां (२) कीलस्था

आबभाषे पुनर्भीष्मं धर्मराजो युधिष्ठिरः ॥ १ ॥

युधिष्ठिरः

भूय एव मनुष्येन्द्र उपेन्द्रस्य यशस्विनः ।
जन्म वृष्णिषु विज्ञातुमिच्छामि वदतां व ॥ २ ॥

यथैव भगवाञ्जातः क्षिताविह जनार्दनः ।
माधवेषु महाबुद्धिस्तन्मे ब्रूहि पितामह ॥ ३ ॥

यदर्थं च महातेजा गास्तु गोवृषणेक्षणः ।
ररक्ष कंसस्य वधाल्लोकानामभिरक्षिता ॥ ४ ॥

क्रीडता चैव यद्बाल्ये गोविन्देन विचेष्टितम् ।
तदा मतिमतां श्रेष्ठ तन्मे ब्रूहि पितामह ॥ ५ ॥

वैशम्पायनः

एवमुक्तस्ततो भीष्मः केशवस्य महात्मनः ।
माधवेषु तदा जन्म कथयामास वीर्यवान् ॥ ६ ॥

भीष्मः

हन्त ते कथयिष्यामि युधिष्ठिर यथातथम् ।
यतो नारायणस्येह जन्म वृष्णिषु कौरव ॥ ७ ॥

पुरा लोके महाराज वर्तमाने कृते युगे।
अजातशत्रो जातस्तु यथैष भुवि भूमिपः ।
कीर्त्यमानं मया तात निबोध भरतर्षभ ।
आसीत्त्रैलोक्यविख्यातस्सङ्ग्रामस्तारकामयः ॥ ८ ॥

विरोचनो मयस्तारो वराहश्श्वेत एव च
लम्बः किशोरस्स्वर्भानुररिष्टो राक्षसाश्च वै ॥ ९ ॥

विप्रचित्तिः प्रलम्बश्च वृत्रजम्भवलादयः।
नमुचिः कालनेमिश्च प्रह्लाद इति विश्रुतः ।। १० ।।

एते चान्ये च बहवो दैत्यसङ्घास्सहस्रशः ।
नानाशस्त्रधरा राजन्नानाभूषणवाहनाः ।
देवतानामभिमुखास्तस्थुर्दैतेयदानवाः ।। ११ ।।

देवास्तु युध्यमानास्ते दानवानभियू रणे ।। १२ ।।(०१)

लक्षालङ्कारः-अभियू रण इत्यत्र 'बहुलं छन्दस्यमाङ्योगे' इति वचनात् अभि आभिमुख्येन युः अयुरिति लङि रूपम् ।

आदित्यावसवो रुद्रास्साध्या विश्वेमरुद्गणाः ।
इन्द्रो यमश्च चन्द्रश्च वरुणोत्थ धनेश्वरः ।। १३ ।।

अश्विनौ च महावीर्यौ ये चान्ये देवतागणाः ।
चक्रुर्युद्धमभूद्घोरं दानवैश्च यथाक्रमम्। ।। १४ ।।

युध्यमानास्समेयुश्च देवा दैतेयदानवैः ।
तद्युद्धमवभद्घोरं देवदानवसङ्कुलम् ।। १५ ।।

ताभ्यां बलाभ्यां सञ्जज्ञे तुमुलो विग्रहस्तदा ।
तीक्ष्णशस्त्रैः किरन्तोऽथ अभ्ययुर्देवदानवाः ।। १६ ।।

अघ्नन्देवान्सगन्धर्वान्स यक्षोरगचारणान्।
दुद्रुवुस्सम्परिश्रान्ताः क्षीणप्रहरणा रणे ।। १७ ।।

ते वध्यमाना दैतेयैर्देवसङ्घास्तदा रणे ।
त्रातारं मनसा जग्मुर्देवं नारायणं प्रभुम् ।। १८ ।।

एतस्मिन्नन्तरे तत्र जगाम हरिरीश्वरः ।
दीपयन्ज्योतिषाभूमिं शङ्खचक्रगदाधरः ।। १९ ।।

---

(०१) (२) ०नभ्ययू रणे

तमागतं सुवर्णस्थं विष्णुं लोकगुरुं तदा।
दृष्ट्वा मुदा युतास्सर्वे भयं त्यज्य रणे सुराः ।
चक्रुर्युद्धं पुनस्सङ्ख्ये देवादैतेयदानवैः ।। २० ।।[०१]

तद्युद्धमभवद्धोरमचिन्त्यं रोमहर्षणम् ।। २१ ।।

जघ्नुर्दैत्यान्रणे देवाः सर्वे शक्रपुरोगमाः ।
ते वध्यमाना विबुधैः दुद्रुवुर्दैत्यदानवाः ।। २२ ।।

विद्रुतान्दानवान्दृष्ट्वा तदा भरतसंपुगे ।
कालनेमिरिति ख्यातो दानवः प्रत्यदृश्यत ।। २३ ।।

शतप्रहरणो घोरश्शतबाहुश्शताननः ।
शतशीर्षास्थितश्श्रीमान्शतश्शृङ्ग इवाचलः ।। २४ ।।

भास्कराकारमकुटश्शिञ्जिताभरणाङ्गदः।
धूम्रकेशो हरिश्मश्रुलिर्दष्ट्रोष्टपुटाननः ।। २५ ।।[०२]

त्रैलोक्यान्तरविस्तारि धारयन्विपुलं वपुः ।
तर्जयन्वै रणे देवान्च्छादयन्स दिशो दश ।
अभ्यधावत्सु सङ्क्रुद्धो व्यादितास्य इवान्तकः ।। २६ ।।

ततश्शस्त्रप्रतापैश्च देवान्धर्षितवान्रणे ।। २७ ।।[०३]

अथाम्ययुस्सुरान्सर्वान्पुनस्ते दैत्यदानवाः ।
आपीडयन्रणे क्रुद्धास्ततो देवान्युधिष्ठिर ।। २८ ।।**

ते वध्यमाना विबुधास्समरे कालनेमिना ।
दैत्यैश्चेमे महाराज दुद्रुवुस्सहिता दिशः ।। २९ ।।

विद्रुतान्विबुधान्दृष्ट्वा कालनेमिर्महासुरः ।

---

(०१)(२)क- नमस्कृतम्.

(०२)(३)क- धुम्रकेतुर्हरि । क- धूमकेशो । क- ताम्रकेशो.

(०३) (१) क- प्रतापैश्च.

इन्द्रं यमाग्निवरुणान्वायुं च धनदं रविम् ।
एतांश्चान्यान्बलाज्जित्वा तेषां कार्याण्यवाप सः ।। ३० ।।

तान्सर्वास्तरसा जित्वा कालनेमिर्महासुरः ।
ददर्श गगने विष्णुं सुपर्णस्थं महाद्युतिम् ।। ३१ ।।

तं दृष्ट्वा क्रोधताम्राक्षस्तर्जयन्नभ्ययात्तदा ।। ३२ ।।

स बाहुशतमुद्यम्य सर्वास्त्रग्रहणं रणे ।
रोषाषादारत त्येन्द्रो विष्णो रुरसि पातयत् ।। ३३ ।।
दैत्याश्च दानवाश्चैव सर्वे मयपुरोगमाः ।। ३४ ।।

स्वान्यायुधानि सङ्गृह्य सर्वे विष्णुमताडयन् ।
स ताड्यमानोऽतिबलैः दैत्यैस्सर्वायुधोद्यतैः ।
न चचाल हरिर्युद्धे कम्प्यमान इवाचलः ।। ३५ ।।

पुनरुद्यम्य सङ्क्रुद्धः कालनेमिदृढाम् गदां ।
जघान संयुगे राजन्स विष्णुं गरुडं च वै ।। ३६ ।।

स दृष्ट्वा गरुडं श्रान्तं चक्रमुद्यम्य वै हरिः ।
रातं शिरांसि च बाहूंश्च सोऽच्छिनत्कालनेमिनः ।
जघानान्यांश्च तान्सर्वान्समरे दैत्यदानवान् ।। ३७ ।।

तस्मिन्राजन्रणे दैव्यास् त्रय, विनिसृता : य एवावशेषिताः ।
विरोचनो मयश्चैव स्वर्भानुश्च महासुरः ।। ३८ ।।

सर्वानशेषान्हत्वा तु विष्णुर्वै दैत्यदानवान् ।
विबुधानां ऋषीणां च स्वानि स्थानानि वै ददौ ।। ३९ ।।

दत्वा सुराणां सम्प्रीतिं प्राप्य सर्वाणि भारत ।
जगाम ब्रह्मणा पार्थ ब्रह्मलोकं तदा हरिः ।। ४० ।।(०१)

---

(०१)(२)क- व्याप्तसर्वाणि। क- स्थाप्य धर्मांश्च.

ब्रह्मलोकं प्रविश्याथ तत्र नारायणः प्रभुः ।
पुराणं दिव्यसदनं स्वेन पूर्वं समाश्रिम् ॥ ४१ ॥[०१]

सम्प्रविश्य तदा देवस्स्तूयमानो महर्षिभिः ।
सहस्रशीर्षा भूत्वाथ शयनायोपचक्रमे ॥ ४२ ॥

आदिदेवः पुराणात्मा निद्रावशमुपागतः ।
शेते सुखं सदा विष्णुर्मोहयन्जगदव्ययः ॥ ४३ ॥

जग्मुस्तस्याथ वर्षाणि शयानस्य महात्मनः ।
षट्टिं शच्छठत साहस्रं मानुषेणोह सङ्ख्यया ॥ ४४ ॥

ततः कृतयुगे त्रेताद्वापरान्ते बुबोध सः ॥ ४५ ॥

ब्रह्मादिभिस्सुरैश्चासौ स्तूयमानो महर्षिभिः ।
उत्पत्य शयनाद्विष्णुर्ब्रह्मणा सह भारत।
क्यदेवानां च हितार्थाय ययौ देवसभाम्प्रति ॥ ४६ ॥[०२]

मेरोश्शिखरविन्यस्तां ज्वलन्तीं तां शुभां सभाम् ।
विविशुस्तां सुरास्सर्वे ब्रह्मणा सह भारत ॥ ४७ ॥

ततस्तत्र निषेदुस्ते सा निश्शब्दमभूत्सभा ।
तत्र भूमिरुवाचाथ खेदात्करुणभाषिणी ॥ ४८ ॥

भूमिः-

राज्ञां बलैर्बलवतां खिन्नास्मि भृशपीडिता ।
नित्यं भारपरिश्रान्ता दुःखाज्जीवाभि वैसुराः ॥ ४९ ॥

पुरे पुरे नृपतिः कोटिसङ्ख्यैर्बलैवृतः ।
राष्ट्रे राष्ट्रे च शतशो ग्रामाः कुलसहस्रिणः ॥ ५० ॥

---

(०१)(३)क- रूपमास्थाय स्वंलोकं प्राप्य भास्वरम् । (४)क- नारायणाश्रमम् ।.
(०२)(३)क- उत्पत्य.

भूमिपानां सहस्रैश्च तेषां च बलिनां बलैः ।
ग्रामायुताढ्यै राष्ट्रैश्च अहं प्रशिथिलीकृता ॥ ५१ ॥

केचिद्दैत्येषु चोत्पन्ना केचिद्राक्षसयोनिषु ॥ ५२ ॥

दैत्यैश्च बाध्यमानास्ताः प्रजा नित्यं दुरात्मभिः।
तांस्तान्धारयितुं शक्त्या न शक्ष्यामि जनानहम् ॥ ५३ ॥

भीष्मः

भूमे स्तद्वचनं श्रुत्वा देवो नारायणस्तदा ।
व्यादिश्यतान्सुरान्सर्वान्क्षितौ वस्तुं मनो दधे ॥ ५४ ॥

भीष्मः

यच्चक्रे भगवान्विष्णुः वसुदेवकुलोवहः ।
तत्तेऽहं नृप वक्ष्यामि शृणु सर्वमशेषतः ।
वासुदेवस्य माहात्म्यं चरितं च महाद्युतेः ॥ ५५ ॥

हितार्थं सुरमर्त्यानां लोकानां च हिताय च ।
यदा दिवि विभुः स्थातुं नरे मे भगवानसौ ॥ ५६ ॥

ततो व्यादिश्य भूतानि भुवि भौमसुखावहः ।
निग्रहार्थाय दैत्यानां चोदयामास वै तदा ॥ ५७ ॥

मरुतश्च वसूंश्चैव सूर्याचन्द्रमसावुभौ ।
गन्धर्वाप्सरसश्चैव रुद्रादित्यां स्तथाश्विनौ ॥ ५८ ॥

जायध्वं मानुषे लोके सर्वलोकमहेश्वराः ।
जङ्गमानि विशालाक्षोह्यात्मानं त्यात्मना ऽसृजत् ः ॥ ५९ ॥

जायतामिति गोविन्दस्तिर्यग्योनिशतैरपि ।
तानि सर्वाणि सर्वज्ञस्ससुराणि सुरेश्वर ः ॥ ६० ॥

त एवमुक्ताः कृष्णे न सर्व एव दिवौकसः ।

दैत्यदानवहन्तारस्सम्भूता भुवनेश्वराः ।। ६१ ।।

ययातिवंशजस्याथ वसुदेवस्य धीमतः ।।
कुलं पुण्ययशः कर्म भेजे नारायणः प्रभुः ।। ६२ ।।

आज्ञापयित्वा सत्यर्थमजायत यदोः कुले ।। ६३ ।।

आत्मानमात्मना तात कृत्वा बहुविधं हरिः ।
रत्यर्थमेव गास्तास्तु ररक्ष पुरुषोत्तमः ।। ६४ ।।

अजातशत्रो जातस्तु यथैष भुवि भूमिप ।
कीर्त्यमानं मया तात निबोध भरतर्षभ ।। ६५ ।।

भीष्मः

सागराः समकम्पन्त मुदा चेलुश्च पर्वताः ।
जज्वलुश्चाग्नयः शान्ता जायमाने जनार्दने ।। ६६ ।।

शिवाः सम्प्रववुर्वाताः प्रशान्तमभवद्रजः ।
ज्योतींषि सम्प्रकाशन्ते जायमाने जनार्दने ।। ६७ ।।

देवदुन्दुभयश्चापि सस्वनुर्भृशमम्बरे ।
अभ्यवर्षंस्तदाऽऽगम्य नारदः(देवताः) पुष्पवृष्टिभिः ।। ६८ ।।(०१)

गीर्भिर्मङ्गलयुक्ताभिरस्तुवन्मधुसूदनम् ।
उपतस्थुस्तदा प्रीताः प्रादुर्भावे महर्षयः ।। ६९ ।।

ततस्तानभिसम्प्रेक्ष्य नारदप्रमुखानृषीन् ।
उपानृत्यन्नुपजगुर्गन्धर्वाप्सरसां गणाः ।। ७० ।।

उपतस्थे च गोविन्दं सहस्राक्षः शचीपतिः ।
अभ्यभाषत तेजस्वी महर्षीन्पूजयंस्तदा ।। ७१ ।।

इन्द्रः

(०१)(३)क- नारदं.

कृत्यानि देवकार्याणि कृत्वा लोकहिताय च ।
स्वलोकं लोककृद्देव पुनर्गश्चस्वतेजसा ।

भीष्मः

इत्युक्त्वा मुनिभिः सार्धं जगाम त्रिदिवेश्वरः ।। ७२ ।।

अभ्यनुज्ञाय तान्सर्वान्छादयन्प्रकृतिं पराम् ।। ७३ ।।

वसुदेवस्ततो जातं बालमादित्यसन्निभम् ।
नन्दगोपकुले राजन्भया प्रच्छादयद्धरिम्दयद्धरिम् ।
नन्दगोपकुले कृष्ण उवास बहुलाः समाः ।। ७४ ।।

ततः कदाचित्सुप्तं तं शकटस्य त्वधः शिशुम् ।
यशोदा सम्परित्यज्य जगाम यमुनां नदीम् ।। ७५ ।।

शिशुलीलां ततः कुर्वन्स्वहस्तचरणौ क्षिपन् ।
रुरोद मधुरं कृष्णः पादावूर्ध्वं प्रसारयन् ।। ७६ ।।

पादाङ्गुष्ठेन शकटं धारयन्नथ केशवः ।
तत्राथैकेन पादेन पातयित्वा तथा शिशुः ।। ७७ ।।(०१)
दूरे निक्षिप्य शकटं भिन्न भाण्डघतीकटम् ।

न्युब्जः पयोधराकाङ्क्षी चकार च रुरोद च ।। ७८ ।।(०२)

लक्षालङ्कारः-न्युब्जः पयोधराकाङ्क्षी इत्यत्र 'न्युब्जं विद्यादधोमुखम्' इति निघण्टोः अधोमुखो न्युब्जः ।

पातितं शकटं दृष्ट्वा भिन्नभाण्डघटीघटम् ।
जनास्ते शिशुना तेन विस्मयं परमं ययुः ।

---

(०१) (३) दूरे निक्षिप्य शकटं भिन्नभाण्डधजाधटम् ।.
(०२) (१) मातुः (२) ससार च

प्रत्यक्षं शूरसेनान्यं दृश्यते महदद्भुतम् ।। ७९ ।।[०१]

लक्षालङ्कारः-शूरसेनान्यम् इत्यत्र शूरसेनानीः कंसः तत्कृतं कर्म शूरसेनान्यम् । अद्भुतं शकटादिरूपेण दैत्यप्रेषणम् ।

पातितं शकटं दृष्ट्वा भ्रष्टशक्त्यष्टितोमरौ ।
गातप्राणौ महाकायावसुराविक्ष्य दुद्रुवुः ।[०२]

शयानेन हतः पक्षी शिशुना तिग्मतेजसा ।
पूतना चापि निहता महाकाया महास्तनी ।। ८० ।।[०३]

लक्षालङ्कारः-पक्षी कंसपक्षपातवान् ।

पश्यतां सर्वदेवानां वासुदेवेन भारत ।। ८१ ।।

ततः काले महाराज संसक्तौ रामकेशवौ ।
विष्णुः सङ्कर्षणश्चोभौ रिङ्गिणौ समपद्यताम् ।। ८२ ।।

अन्योन्यकिरणग्रस्तौ चन्द्रसूर्याविवाम्बरे ।
समर्पयन्तो सर्वत्र सर्पभोगभुजौ तदा ।
रेजतुः पांसुदिग्धाङ्गौ रामकृष्णौ तदा नृप ।। ८३ ।।[०४]

क्वचिच्च जानुभिस्पृष्टौ क्रीडमानौ क्वचिद्वने ।
पिबन्तौ दधिकुल्याश्च मथ्यमाने च भारत ।। ८४ ।।

ततः स बालो गोविन्दो नवनीतं तदा क्षये ।
ग्रसमानस्तु तत्रायं गोपीभिर्दृश्यते तदा ।। ८५ ।।[०५]

दाम्नाथोलूखले कृष्णो गोपस्त्रीभिश्च बन्धितः ।। ८६ ।।

---

(०१) (१) शूरसेनानां
(०२) (३)क- जनास्ततोपि सम्भ्रान्ता विस्मयं प्रतिपेदिरे ।.
(०३) (१) क- हतौ यक्षि शिशुनानिजतेजसा ।.
(०४) (३) विसर्पयेताम्
(०५) (४) (र्ददृशेऽथ वै)

(१) क-(अधिकः पाठः)

ततस्त्वसहमानास्ता विषमं गोपयोषितः ।

महतोलूखलेनैव दामभिस्तमबन्धयन् ।

तदाथ शिशुना तेन राजंस्तावर्जुनावुभौ ।
समूलविटपौ भग्नौ तदद्भुतमिवाभवत् ।
तत्रासुरौ महाकायौ गतप्राणौ बभूवतुः ।। ८७ ।।

ततस्तौ बाल्यमुत्तीर्णौ कृष्णसङ्कर्षणावुभौ ।
तस्मिन्नेव व्रजस्थाने सप्तवर्षौ बभूवतुः ।। ८८ ।।

नीलपीताम्बरधरौ पीतश्वेतानुलेपनौ ।
बभूवतुर्वत्सपालौ काकपक्षधरावुभौ ।। ८९ ।।

पर्णवाद्यं श्रुतिसुखं वादयन्तौ वराननौ ।
शुशुभाते वनगतावुदीर्णाविव पन्नगौ ।। ९० ।।

मयूराङ्गजकर्णौ तौ पल्लवापीडधारिणौ ।
वनमालापरिक्षिप्तौ सालपोताविवोद्गतौ ।। ९१ ।।

अरविन्दकृतापीडौ रज्जुयज्ञोपवीतिनौ ।
सुशिक्यतुम्बुरुकरौ वीरौ गोपवेणुप्रवादकौ ।। ९२ ।।[०१]

लक्षालङ्कारः-अरविन्दकृतापीडौ इत्यत्र आपीडं शिरोलङ्कारः । सशिक्यतुम्बुरुकरौ इत्यत्र पाथेयस्थापनाय कम्बलतन्तुकृतशीलविशेषः शिक्यं, दारुकृततन्त्रीवाद्यविशेषः तुम्बुरुः, शिक्यसहिततुम्बुरुः करे ययोस्तौ ।

क्वचिद्धसन्तावन्योन्यं क्रीडमानौ क्वचिद्वने ।
पर्णशय्यासु संसुप्तौ क्वचिन्निद्रान्तरैषिणौ ।। ९३ ।।

तौ वत्सान्पालयन्तौ हि शोभयन्तौ महद्वनम् ।

(०१)(३) क- सशिक्यतुम्बुधरौ.

चश्चूर्यन्तौ रमन्तौ स्म राजन्नेवं तदा शुभौ ।। ९४ ।।

ततो वृन्दावनं गत्वा वसुदेवसुतावुभौ ।
गोकुलाः तत्र कौन्तेय चारयन्तौ विजह्रतुः ।। ९५ ।।(०१)

अस्मिन् पर्वणि ३६ अध्याये ९५ श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(६) षष्ठोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अर्घाभिहरणपर्वणि शिशुपालक्रोधे षट्त्रिंशोऽध्यायः।। ३६ ।।

# ३७. सप्तत्रिंशोऽध्यायः

## 02-05-37

कृष्णेन कालियमर्दनम् ।।१ ।। बलरामेण धेनुकासुरहननम् ।। २ ।। कृष्णेन अरिष्टासुरकंसादिहननम् ।।३ ।। रामकृष्णायोर्विद्याभ्यासः ।। ४ ।। कृष्णेन गुरुदक्षिणात्वेन स्वेनोज्जीवितस्य पुत्रस्य समर्पणम् ।। ५ ।।

भीष्मः

ततः कदाचिद्गोविन्दो ज्येष्ठं सङ्कर्षणं विना ।
चचार तद्वनं रम्यं सर्व(रम्य)रूपो वराननः ।। १ ।।

काकपक्षधरः श्रीमान्(ञ्छ्यामः) पद्मपत्र(पद्म)निभेक्षणः ।
श्रीवत्सेनोरसा युक्तः शशाङ्क इव लक्ष्मणा ।। २ ।।

लक्षालङ्कारः-श्रीवत्सेनोरसा इत्यत्र श्रीर्वसत्यस्मिन्निति श्रीवत्सम् ।

रज्जुयज्ञोपवीती स पीताम्बरधरो युवा।
गोकुलं मेघकाले तु चचार द्युतिमान्प्रभुः ।

(०१) (३) गोव्रजं

श्वेतगन्धेन लिप्ताङ्गो नीलकुञ्चितमूर्धजः ।। ३ ।।

राजता बर्ह(र्हि)पत्रेण मन्दमारुतकम्पिना।
क्वचिद्गायन्क्वचित्क्रीडन्क्वचिन्नृत्यन्क्वचिद्धसन् ।। ४ ।।
गोपवेणः सुमधुरं कामं तमभिवादयन् ।

गोपवेषः स मधुरं गायन्वेणुं च वादयन् ।
प्रह्लादनार्थँ च युवा विचरन्वनगो यथा ।। ५ ।।
(तु गवां क्वचिद्वनगतो युवा) ।

गोकुले मेघकाले तु चचार द्युतिमान्प्रभुः ।
बहुरम्येषु देशेषु वनस्य वनराजिषु ।। ६ ।।

तासु कृष्णो मुदं लेभे क्रीडया भरतर्षभ ।
स कदाचिद्वने तस्मिन्गोभिः सह परिव्रजन् ।। ७ ।।

भाण्डीरं नाम दृष्ट्वाथ न्यग्रोधं केशवो महान् ।
तस्य च्छायानि वासाय निवासाय मतिं चक्रे तदा प्रभुः ।। ८ ।।(०१)

स तत्र वयसा तुल्यैः वत्सपालैः सहानघ ।
रेमे स दिवसान्कृष्णः पुरा स्वर्गपुरे तथा ।। ९ ।।

तं क्रीडमानं गोपालाः कृष्णं भाण्डीरवासिनः ।
रमयन्ति स्म बहवो मान्यैः क्रीडनकैस्तदा ।। १० ।।

अन्ये च(स्म) परिगायन्ति गोपा मुदितमानसाः ।
गोपालाः कृष्णमेवान्ये गायन्ति स्म वनप्रियाः ।। ११ ।।

तेषां सङ्गायतामेव वादयामास केशवः ।
पुनर्वाद्यान्तरे वेणुं तुम्बवीणां च तत्र वै ।

---

(०१)(३)क- तस्य च्छाये मर्ति चक्रे निवासाय तदा प्रभुः । क- तच्छायायां मर्ति चके निवासाय.

एतैः(वं) क्रीडान्तरैः कृष्णो गोपालैर्विजहार सः ।। १२ ।।[०१]

लक्षालङ्कारः-पुनर्वाद्यान्तरे वेणुम् इत्यत्र तुम्बवीणा अलाबुकृतवीणा ।

तेन बालेन कौन्तेय कृतं लोकहितं तदा ।
पश्यतां सर्वभूतानां वासुदेवेन भारत ।। १३ ।।

ह्रदे नीपवने तत्र क्रीडितं नागमूर्धनि ।
शासचित्वा तुकालीयं सर्वलोकस्य पश्यतः ।। १४ ।।

विजहार ततः कृष्णो बलदेवसहायवान् ।। १५ ।।

धेनुको दारुणो दैत्यो राजन्रासभविग्रहः ।
तदा तालवने राजन्बलदेवेन वै हतः ।। १६ ।।

ततः कदाचित् कौन्तेय रामकृष्णौ वनं गतौ ।
चारयन्तौ प्रवृद्धानि गोधनानि शुभाननौ ।। १७ ।।

लक्षालङ्कारः-एवञ्चप्रक्रान्तकथाभ्यन्तरेकथान्तरमप्यारभमाणोभीष्मःसरससुन्दरीभिरितस्ततो विकृष्यमाणः कामुक इव कृष्णकथायाः पदे पदे स्वादुतां स्वस्य हरिकथारसिकतां च दर्शयन्नास्ते । पुनरपि प्रागुक्तबाललीलाविशेषं वर्णयति – ततः कदाचित् इत्यादिना।

विहरन्तौ मुदा युक्तौ वीक्षमाणौ वनानि वै ।
क्ष्वेलयन्तौ प्रगायन्तौ विचिन्वन्तौ च पादपान् ।। १८ ।।

नामभिर्व्याहरन्तौ च वत्सान्गाश्च परन्तपौ ।
चेरतुर्लोकसिद्धाभिः क्रीडाभिरपराजितौ ।। १९ ।।

तौ देवौ मानुषीं दीक्षां वहन्तौ सुरपूजितौ ।
तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेरतुर्वनम् ।
ततः कृष्णो महातेजास्तदा गत्वा तु गोव्रजम् ।। २० ।।

गिरियज्ञं तमेवैष प्रकृतं गोपदारकैः ।

(०१)(४)क- तुम्बं वीणां.

बुभुजे पायसं शौरिरीश्वरः सर्वभूतकृत् ।। २१ ।।

तं दृष्ट्वा गोपकाः सर्वे कृष्णमेव समर्चयन् ।
पूज्यमानस्ततो गोपैर्दिव्यं वपुरधारयत् ।। २२ ।।

धृतो गोवर्धनो नाम सप्ताहं पर्वतस्तदा ।
शिशुना वासुदेवेन गवार्थमरिमर्दन ।। २३ ।।(०१)

क्रीडमानस्तदा कृष्णः कृतवान्कर्म दुष्करम् ।
तदद्भुतमिवात्रासीत्सर्वलोकस्य भारत ।। २४ ।।

देवदेवः क्षितिं गत्वा कृष्णं दृष्ट्वा मुदान्वितः ।
गोविन्द इति तं ह्युक्त्वा अभिश्चत्पुरन्दरः ।। २५ ।।*
ततस्त्वाऽऽश्लिष्य गोविन्दं पुरुहूतोऽभ्ययाद्दिवम् ।। २६ ।।(०२)

अथारिष्ट इति ख्यातं दैत्यं वृषभविग्रहम् ।
जघान तरसा कृष्णः पशूनां हितकाम्यया ।। २७ ।।

केशिनं नाम दैतेयं राजन्वै हयविग्रहम् ।
तथा वनगतं पार्थ गजायुतबलं रिपुम्।(०३)
प्रगृह्य भुजदण्डेन जघान पुरुषोत्तमः ।। २८ ।।(०४)

अथ(आन्ध्रं)मल्लं तु(च) चाणूरं निजघान महासुरम् ।। २९ ।।

सुनामानममित्रघ्नं सर्वसैन्यपुरस्कृतम् ।
मृगरूपेण गोविन्दो निजघान च भारत ।। ३० ।।(०५)

लक्षालङ्कारः-मृगरूपेण गोविन्द इत्यत्र मृगरूपेण सिंहरूपेण ।

---

(०१) (२)क- सर्वते महान् । क- पर्वते महान्.

(०२) (१) इत्युक्त्वा

(०३) (४) हयम्

(०४) (१) प्रहितं भोजपुत्रेण

(०५)(३)क- (१) बालरूपेण, गजरूपेण गोविन्दस्त्रासयामास भारत ।

बलदेवेन चायत्तः समाजे मुष्टिको हतः ।
त्रासितश्च तदा कंसः स हि कृष्णेन भारत ।। ३१ ।।

ऐरावतं युयुत्सन्तं मातङ्गानामिवर्षभम् ।
कृष्णः कुवलयापीडं हतवांस्तस्य पश्यतः ।। ३२ ।।

हत्वा कंसममित्रघ्नः सर्वेषां पश्यतां तदा ।
अभिषिच्योग्रसेनं तं पित्रोः पादमवन्दत ।। ३३ ।।

एवमादीनि कर्माणि कृतवान्वै जनार्दनः ।।
उवास कतिचित्तत्र दिनानि सहलायुधः ।
ततस्तौ जग्मतुस्तात गुरुं सान्दीपिनिं पुनः ।। ३४ ।।

कदाचित्कौन्तेय रामकृष्णौ वनं गतौ ।
चारयन्तौ प्रवृद्धानि गवां बृन्दानि तत्र वै ।
विहरन्तौ मुदा युक्तौ वीक्षमाणौ वनानि च ।
क्ष्वोलयन्तौ प्रगायन्तौ विचिन्वन्तौ च पादपान् ।
नामभिर्व्याहरन्तौ तौ वत्सान्गाश्च परन्तपौ ।
चेरतुर्लोकसिद्धाभिः क्रीडाभिरतदेतरम् ।
तदैवं मानुषीं दीक्षां वहन्तौ सुरपूजितौ।
तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेततुर्वनम् ।
एवंविधाभिर्गोपालक्रीडाभिस्तौ विजह्रतुः ।

भीष्मः

गुरुशुश्रूषया युक्तौ धर्मज्ञौ धर्मचारिणौ ।
व्रतमुग्रं महात्मानौ विचरन्तावनन्तिषु(तिष्ठताम्) ।। ३५ ।।(०१)

---

ख-वृकरूपेण गोविन्दं त्रासयानं तु भारत ।

(०१) (४)क- वान्तषु.

अहोरात्रचतुष्षष्ट्या षडङ्गं वेदमापतुः ॥ ३६ ॥

लेख्यं च गणितं चोभौ प्राप्नुतां यदुनन्दनौ ।
गान्धर्ववेदं चित्रं(वैद्यं) च सकलं समवापतुः ॥ ३७ ॥

हस्तिशिक्षामश्वशिक्षां द्वादशाहेन चाप्नुताम्(पतुः) ।

तावुभौ जग्मतुर्वीरौ गुरुं सान्दीपिनिं पुनः ।
धनुर्वेदचिकीर्षार्थं धर्मज्ञौ धर्मचारिणौ ॥ ३८ ॥

ताविष्वस्त्रवराचार्यमभिगम्य प्रणम्य च ।
तेन तौ सत्कृतौ राजन्विचरन्तौ अवन्तिषु ॥ ३९ ॥

पञ्चाशद्भिरहोरात्रैर्दशाङ्गं सुप्रतिष्ठितम् ।
सरहस्यं धनुर्वेदं सकलं ताववाप्नुताम्(पतुः) ॥ ४० ॥

दृष्ट्वा कृतास्त्रौ विप्रेन्द्रो गुर्वर्थे तावचोदयत् ।
अयाचतार्थं गोविन्दं ततः सान्दीपनिर्विभुः ॥ ४१ ॥

सान्दीपनिः

मम पुत्रः समुद्रेऽस्मिंस्तिमिना चापवाहितः ।
पुत्रमानय भद्रं ते भक्षितं तिमिना मम ॥ ४२ ॥(०१)

भीष्मः

आर्ताय गुरवे तत्र प्रतिशुश्राव दुष्करम्
अशक्यं त्रिषु लोकेषु कर्तुमन्येन केनचित् ॥ ४३ ॥(०२)

यश्च सान्दीपनेः पुत्रं जघान भरतर्षभ ।
सोऽसुरः समरे ताभ्यां पाताले(समुद्रे) विनिपातितः ॥ ४४ ॥(०३)

---

(०१) (४)क- कृतकृत्योऽस्मि तेन वै ।.

(०२) (३)क- सर्वभूतेषु.

(०३)(४)क- पाताले । क- पाताले विनिवेशितः.

ततः सान्दीपनेः पुत्रः प्रसादादमितौजसः ।
दीर्घकालं ततः(गतः) प्रेतं पुनरासीच्छरीरवान् ॥ ४५ ॥

तदशक्यमचिन्त्यं च दृष्ट्वा तु महाद्भुतम्(सुमहदद्भुतम्) ।
सर्वेषामेव भूतानां विस्मयः समजायत ॥ ४६ ॥

आसनानि(ऐश्वर्याणि) च सर्वाणि गवाश्वं च धनानि च
सर्वं तदुपजह्राते गुरवे रामकेशवौ ॥ ४७ ॥

गदापरिघयुद्धे च सर्वास्त्रेषु च केशवः ।
परमां मुख्यतां प्राप्तस्सर्वलोकेषु विश्रुतः ।
कश्च नारायणादन्यस्सर्वरत्नविभूषितम् ।
रथमादित्य सङ्काशमातिष्ठेत्विशाम्पते ।
कस्यचाप्रतिमो यन्ता वज्रपाणेः प्रियस्सखा।
मातलिस्सङ्गृहीतास्यादन्यत्र पुरुषोत्तमात् ।

ततस्तं पुत्रमादाय ददौ च गुरवे प्रभुः ॥ ४८ ॥(०१)

तं दृष्ट्वा पुत्रमायान्तं सान्दीपिनिपुरे जनाः ।
अशक्यमेतत्सर्वेषामचिन्त्यमिति मेनिरे ।
कश्च नारायणादन्यश्चिन्तयेदिदमद्भुतम् ॥ ४९ ॥

लक्षालङ्कारः-प्राक् सङ्कोचेनोक्तं कंसयुद्धं पुनर्विस्तरेणाह – कश्च नारायणादन्य इत्यादिना।

गदापरिघयुद्धेषु सर्वास्त्रेषु च केशवः ।
परमां मुख्यतां प्राप्तः सर्वलोकेषु विश्रुतः ॥ ५० ॥

कश्च नारायणादन्यः सर्वरत्नविभूषितम् ।
रथमादित्यसङ्काशमातिष्ठेत शचीपतेः ॥ ५१ ॥

ततः पार्थिवमायान्तं सहितं सर्वराजभिः ।

---

(०१) (१) क- कोशेषु श्लोकद्वयं नास्ति.

सरस्वत्यां जरासन्धमजयत् पुरुषोत्तमः ।

कस्य चाप्रतिमो यन्ता वज्रपाणेः प्रियस्सखा ।
मातलिस्सङ्गृहीता स्यादन्यत्र पुरुषोत्तमात् ॥ ५२ ॥

भोजराजतनूजोऽपि कंसस्तात युधिष्ठि ।
अस्त्रज्ञाने बले वीर्ये कार्तवीर्यसमोऽभवत् ॥ ५३ ॥

तस्य भोजपतेः पुत्राद्भोजराजस्य शासनात्(ज्यविवर्धनात्) उद्विजन्ते स्म राजानः सुपर्णादिव पन्नगाः ॥ ५४ ॥

चित्रकार्मुकनिस्त्रिंशविमलप्रासयोधिनः ।
शतं शतसहस्राणि पादातीनां तु(तास्तस्य) भारत ॥ ५५ ॥

अष्टौ शतसहस्राणि शूराणामनिवर्तिनाम् ।
अभवन्भोजराजस्य जाम्बूनदमयध्वजाः ॥ ५६ ॥

रुक्म(स्फुर)त्काञ्चनकक्ष्यास्तु गजास्तस्य युधिष्ठिर ।
तावन्त्येव सहस्राणि गजानामनिवर्तिनाम् ॥ ५७ ॥

ते च पर्वतसङ्काशाश्चित्रध्वजपताकिनः ।
बभूवुर्भोजराजस्य नित्यं प्रमुदिता गजाः ॥ ५८ ॥

स्वलङ्कृतानां शीघ्राणां करेणूनां युधिष्ठिर ।**
अभवद्भोजराजस्य द्विस्तावद्धि महद्बलम् ॥ ५९ ॥(०१)

षोडशाश्वसहस्राणि किंशुकाभानि तस्य वै ॥ ६० ॥

अपरस्तु महाव्यूहः किशोराणां युधिष्ठिर ।
आरोहवरसम्पन्नो दुर्धर्षः केनचिद्बलात् ॥ ६१ ॥

स च षोडशसाहस्रः कंसभ्रातृपुरस्सरः ।
आसन्वैश्यावर्णास्तु हयास्तस्यामिताः प्रभो ।

(०१) (१) क- दीप्तानां.

सगणोमिश्रको नाम षष्टि सहस्र उच्यते ।

सुनामा सर्वतस्त्वेनं कंसं वै(सदृशस्तेन स कंसं) पर्यपालयत् ।
य आसन्सर्ववर्णासु हयास्तस्य युधिष्ठिर ।। ६२ ।।

स गणो मिश्रको नाम षष्टिसाहस्र उच्यते ।। ६३ ।।

कंसरोषमहावेगां ध्वजानूपमहाद्रुमाम् ।
पत्ति(मत्त)द्विपमहाग्राहां वैवस्वतवशानुगाम् ।। ६४ ।।

शस्त्रजालमहाफेनां सादिवेगमहाजलाम् ।
गदापरिघपाठीनां नानाकवचशैवलाम् ।। ६५ ।।

लक्षालङ्कारः-गदापरिघ इत्यत्र पाठीनो मत्स्यः । 'मीनः पाठीन एव च' इत्यमरः ।

रथनागमहावर्तां नानारुधिरकर्दमाम्।
चित्रकार्मुक निस्त्रिशंरथाश्वस लिलह्रदाम् ।। ६६ ।।(०१)

महामृधनदीं घोरां योधावर्तननिःस्वनाम् ।
कोऽन्योनारायणादेत्य कंसहन्ता युधिष्ठिर ।। ६७ ।।(०२)

एष शक्ररथे तिष्ठंस्तान्यनीकानि भारत ।
व्यधमद्भोजराजस्य(पुत्रस्य) महाभ्राणीव मारुतः ।। ६८ ।।

तं सभास्थं सहामात्यं हत्वा कंसं सहान्वयम् ।
मानयामास मानार्हां देवकीं ससुहृद्गणाम् ।। ६९ ।।

यशोदां रोहिणीं चैव ह्य(अ)भिवाद्य पुनः पुनः ।
उग्रसेनं च राजानमभिषिच्य जनार्दनः ।
अर्चितो यदुमुख्येषु(ख्यैश्च) भगवान्वासवानुजः ।। ७० ।।

ततः पार्थिवमायान्तं सहितं सर्वराजभिः ।

---

(०१) (२) कल्लोलां रथाश्वक०

(०२) (३) को वा नारायणादन्यः

सरस्वत्यां जरासन्धमजयत्पुरुषोत्तमः ।। ७१ ।।

लक्षालङ्कारः-सरस्वत्यां जरासन्धम् इत्यत्र सरांसि अस्यां वर्तन्त इति सरस्वती यमुना ।

अस्मिन् पर्वणि ३७अध्याये ७१श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(७) सप्तमोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अर्घाभिहरणपर्वणि शिशुपालक्रोधे सप्तत्रिंशोऽध्यायः।। ३७।।

# ३८. अष्टात्रिंशोऽध्यायः

## 02-05-38

नरकासुरविक्रमः । इन्द्रस्यागमनं च ।

भीष्मः

शूरसेनपुरं त्यक्त्वा ततो(सर्व)यादवनन्दनः ।
द्वारकां भगवान्कृष्णः प्रत्यपद्यत भारत(केशवः) ।। १ ।।

ततो महात्मा(प्रत्यपद्यत) यानानि रत्नानि विविधानि(च बहूनि) च ।
यथार्हं पुण्डरीकाक्षो नैरृतान्प्रत्यपद्यत(प्रतिपालयन्) ।। २ ।।(०१)

येच(तत्र) विघ्नं चरन्ति स्म दैतेयाः सह दानवैः ।
ताञ्जघान महाबाहुः परमात्मा(वरमत्तान्) महासुरान् ।। ३ ।।

स विघ्नमकरोत्तत्र नरको नाम नैरृतः ।
त्रासनः सुरसङ्घानां विदितो वः प्रभावतः ।। ४ ।।

(०१)(४)क- नैर्ऋतान् प्रत्यपादयत् । क- नैर्ऋतात् प्रत्यपद्यत । क- नैर्ऋतान् प्रत्यपद्यत।.

स भूम्यां मूर्तिलिङ्गस्थः सर्वदेवासुरान्तकः(०१) ।
मानुषाणामृषीणां च प्रतीपमकरोत्तदा ।। ५ ।।

लक्षालङ्कारः-स भूम्याम् इत्यत्र मूर्ध्नि लिङ्गं स्थं स्थितं यस्य सः मूर्ध्निलिङ्गस्थः।

त्वष्टुर्दुहितरं भौमः कशेरुमगमत्तदा ।
गजरूपेण जग्राह रुचिराङ्गीं चतुर्दशीम् ।। ६ ।।(०२)

प्रमथ्य च जहारैतां हत्वा च नरकोऽब्रवीत् ।
नष्टशोकभयाबाधः प्राग्ज्योतिषपतिस्तदा ।। ७ ।।

नरकः

यानि देवमनुष्येषु रत्नानि विविधानि च ।
बिभर्ति च मही कृत्स्ना सागरेषु च यद्वसु ।। ८ ।।

अद्यप्रभृति तद्देवि सहिताः सर्वनैरृताः ।
तवैवोपहरिष्यन्ति दैत्याश्च सह दानवैः ।। ९ ।।

भीष्मः

एवमुत्तमरत्नानि बहूनि विविधानि च ।
स जहार तदा भौमः स्त्रीरत्नानि जहारह(च भारत) ।
गन्धर्वाणां च याः कन्या जहार नरको बलात् ।। १० ।।

यानि(श्च) देवमनुष्याणां स्त्रीरत्नानि तथैव च ।
चतुर्दशसहस्राणां शतानां चैव विंशतिः ।। ११ ।।(०३)

एकवेणीधराः सर्वाः सतां मार्गमनुव्रताः ।। १२ ।।

तासामन्तःपुरं भौमोऽकारयन्मणिपर्वते ।

---

(०१) स भूम्यास्तनयो राजन्नरकस्तु सुरान्तकः-पां (१) मूर्ध्नि लिङ्गस्थः

(०२)(२)क- कुशेशयगतस्तदा । क- क्रीडारामगतां तदा ।.

(०३) (२) सप्त चाप्सरसां गणाः, (४) चैकविंशच्छतानि च

औदकायां विरूपाक्षं जघान मधुसूदनः ।। १३ ।।[०१]

लक्षालङ्कारः-औदकायाम् इत्यत्र औदकायां परितः उदकेनावृतत्वात् औदकेति च तां पुरीं वदन्ति ।

ताश्च प्राग्ज्योतिषो राजा मुरस्य दश चात्मजाः ।
नैरृताश्च यथा मुख्याः पालयन्त उपासते ।। १४ ।।[०२]

स एष तपसां पारे वरदत्तो महासुरः ।
अदितिं धर्षयामास कुण्डलार्थं युधिष्ठिर ।। १५ ।।[०३]

न चासुरगणैः सर्वैः सहितैः कर्म तत्पुरा ।
कृतपूर्वं महाघोरं यदकार्षीन्महासुरः ।। १६ ।।

यं मही सुषुवे देवी यस्य प्राग्ज्योतिषं पुरम् ।
श्रीमन्तपालाश्चत्वारो यस्यासन्युद्धदुर्मदाः ।। १७ ।।[०४]

आदेवयानमावृत्य पन्थानं पर्यवस्थिताः ।
त्रासनाः सुरसङ्घानां विरूपै राक्षसैः सह ।। १८ ।।

लक्षालङ्कारः-आदेवयानम् इत्यत्र आदेवयानं देवविमानपर्यन्तम् ।

हयग्रीवो निशुम्भश्च घोरः पञ्चजनस्तथा ।
मुरः पुत्रसहस्रैश्च वरदत्तो महासुरः ।। १९ ।।

तद्वधार्थं महाबाहुरेष चक्रगदासिधृक् ।
जातो वृष्णिषु देवक्यां वासुदेवो जनार्दनः ।। २० ।।

तस्यास्य पुरुषेन्द्रस्य लोकप्रथिततेजसः ।

---

(०१) औदकायामदीनात्मा मुरस्य विषयं प्रति -पां
(०२) (४) बोधयन्त
(०३) (१) तपसश्चारे (२) महीसुतः
(०४) (३)विषयान्तपाला

निवासो द्वारका तात विदितो वः प्रधानतः ।। २१ ।।(०१)

अतीव हि पुरी रम्या द्वारका वासवक्षयात् ।(०२)
अति वैराज्यमप्यद्धा प्रत्यक्षं ते युधिष्ठिर ।। २२ ।।(०३)

लक्षालङ्कारः- अति वैराज्यम् इत्यत्र वैराज्यं पाताळलोकम् ।

तस्मिन्देवपुरप्रख्ये सा सभा वृष्ण्युपाश्रया ।(०४)
सुधर्मा इति विख्याता योजनायतविस्तृता ।। २३ ।।

तत्र वृष्ण्यन्धकाः सर्वे रामकृष्णपुरोगमाः ।
लोकयात्रामिमां कृत्स्नां परिरक्षन्त आसते ।। २४ ।।

तत्रासीनेषु सर्वेषु कदाचिद्भरतर्षभ ।
दिव्यगन्धा ववुर्वाताः कुसुमानां च वृष्टयः ।। २५ ।।

ततः सूर्यसहस्राभस्तेजोराशिर्महाद्भुतः ।
मुहूर्तमन्तरिक्षेऽभूत्ततो भूमौ प्रतिष्ठितः ।। २६ ।।

मध्ये तु तेजसस्तस्य पाण्डरं गजमास्थितः ।
वृतो देवगणैः सर्वैर्वासवः प्रत्यदृश्यत ।। २७ ।।

रामकृष्णौ च राजा च वृष्ण्यन्धकगणैः सह ।
उपेत्य(उत्पत्य) सहसा तस्मै नमस्कारमकुर्वत ।। २८ ।।

सोऽवतीर्य गजात्तूर्णं परिष्वज्य जनार्दनम् ।
सस्वजे बलदेवं च राजानं च तमाहुकम् ।। २९ ।।

उद्धवं वसुदेवं च विकद्रुं च महाद्यु(म)तिम् ।

---

(०१) (४)क- प्रभावतः.

(०२) (३)क- अतिवैसान्दमा वृद्धाः। क- अतीव राजते.

(०३) अति वै राजते पृथ्व्यां प्रत्यक्षं ते तु तत्पुरम्(युधिष्ठिर)-पां

(०४) (१) तस्मिन्नेव पुरश्रेष्ठे (३)०या दाशार्हीति

प्रद्युम्नसाम्बनिशठाननिरुद्धं ससात्यकिम् ।। ३० ।।

गदं सारणमक्रूरं भानुझिल्लिवाडूरथान्(कृतवर्माणमेव च)।

चारुदेष्णं सुदेष्णं च अन्यानपि यथोचितम् ।। ३१ ।।

तथैव कृतवर्माणं चारुधेष्णं महाबलम्।

देवकल्पान्महाराजान्दाशार्हपुरोगमान् ।

परिष्वज्य च दृष्ट्वा च भगवान्भूतभावनः ।
वृष्ण्यन्धकमहामात्रान्परिष्वज्याथ वासवः ।
प्रगृह्य पूजां तैर्दत्ताभगवान्पाकशासनः ।। ३२ ।।(०१)

इन्द्रः

अदित्या चोदितः कृष्ण तव मात्राहमागतः
कुण्डलेऽपहृते तात भौमेन नरकेण च ।। ३३ ।।

निदेशशब्दवाच्यस्त्वं लोकेऽस्मिन्मधुसूदन ।
तस्माज्जहि महाभाग भूमिपुत्रं नरेश्वर ।। ३४ ।।

भीष्मः

तमुवाच महाबाहुः प्रीयमाणो जनार्दनः ।
निर्जित्य नरकं भौममाहरिष्यामि कुण्डले ।। ३५ ।।

एवमुक्त्वा तु गोविन्दो राममेवाभ्यभाषत ।
प्रद्युम्नमनिरुद्धं च साम्बं चाप्रतिमं बले ।। ३६ ।।

एतांश्चोक्त्वा तदा तत्र वासुदेवो महायशाः ।
अथारुह्य सुपर्णं वै शङ्खचक्रगदासिधृत् ।। ३७ ।।

ययौ तदा हृषीकेशो देवानां हितकाम्यया ।। ३८ ।।

तं प्रयान्तममित्रघ्नं देवाः सहपुरन्दराः ।

---

(०१) (४) मुवाचावनताननः

पृष्ठतोऽनुययुः प्रीताः स्तुवन्तो विष्णुमच्युतम् ।। ३९ ।।

सोऽग्र्यान्रक्षोगणान्हत्वा नरकस्य महासुरान् ।
क्षुरान्तान्मौरवान्पाशान्षट्सहस्रं ददर्श सः ।। ४० ।।

सञ्छिद्य पाशांस्त्वस्त्रेण मुरं हत्वा सहान्वयम् ।
शिलासङ्घानतिक्रम्य निसुम्भमवपोथयत् ।। ४१ ।।

यः सहस्रसमस्त्वेकः सर्वान्देवानयोधयत् ।
तं जघान महावीर्यं हयग्रीवं महाबलम् ।। ४२ ।।

अपारतेजा दुर्धर्षः सर्वयादवनन्दनः ।
मध्ये लोहितगङ्गायां भगवान्देवकीसुतः ।। ४३ ।।(०१)

औदकायां विरूपाक्षं जघान भरतर्षभ ।
पञ्च पञ्चजनान्घोरान्नरकस्य महासुरान् ।। ४४ ।।

ततः प्राग्ज्योतिषं नाम दीप्यमानमिव श्रिया ।
पुरमासादयामास तत्र युद्धमवर्तत ।। ४५ ।।

महद्दैवासुरं युद्धं यद्वृत्तं भरतर्षभ ।
युद्धं न स्यात्समं तेन लोकविस्मयकारकम् ।। ४६ ।।(०२)

चक्रलाञ्छनसञ्छिन्नाः शक्तिखड्गहतास्तदा ।
निपेतुर्दानवास्तत्र समासाद्य जनार्दनम् ।। ४७ ।।

अष्टौ शतसहस्राणि दानवानां परन्तप ।
निहत्य पुरुषव्याघ्रः पातालविवरं ययौ ।। ४८ ।।

त्रासनं सुरसङ्घानां नरकं पुरुषोत्तमः ।
योधयत्यतितेजस्वी मधुवन्मधुसूदनः ।। ४९ ।।

---

(०१) (१) क- अपरान्तेषु दुर्धर्षं । क-अपरान्ते तु दुर्धर्षं.
(०२)(३)क- तत्स्यात्.

तद्युद्धमभवद्घोरं तेन भौमेन भारत ।
कुण्डलार्थे सुरेशस्य नरकेण महात्मना ।। ५० ।।

मुहूर्तं लालयित्वाथ नरकं मधुसूदनः ।
प्रवृत्तचक्रं चक्रेण प्रममाथ बलाद्बली ।। ५१ ।।(०१)

लक्षालङ्कारः-प्रवृत्तचक्रम् इत्यत्र प्रकर्षेण वर्तमानं सेनाचक्रं यस्य तम् ।

चक्रप्रमथितं तस्य पपात सहसा भुवि ।
उत्तमाङ्गं हताङ्गस्य वृत्रे वज्रहते यथा ।। ५२ ।।

भूमिस्तु पतितं दृष्ट्वा प्रायच्छत् कुण्डले सुतम् ।
प्रदाय च महाबाहुमिदं वचनमब्रवीत् ।। ५३ ।।(०२)

लक्षालङ्कारः-सुतं तत्सुतं भगदत्तम् ।

भूमिः

सृष्टस्त्वयैव मधुमंस्त्वयैव निहतः प्रभो ।
यथेच्छसि तथा क्रीडन्प्रजास्तस्यानुपालय ।। ५४ ।।(०३)

लक्षालङ्कारः-सृष्ट इत्यत्र मधुमन् मधुकुलवन् ।

श्रीभगवान्

देवानां च मुनीनां च पितणां च महात्मनाम् ।
उद्वेजनीयो भूतानामभवद्(नां ब्रह्मद्विट्) पुरुषाधमः ।। ५५ ।।

लोकद्विष्टः सुतस्ते तु देवारिर्लोककण्टकः ।
सर्वलोकनमस्कार्यामदितिं बाधते बली ।

---

(०१)(४)क- महान् बली.

(०२) प्रादात् च कुण्डले शुभे

(०३) (१) क- नरकः., मधुहन् (२) विनिपातितः (३) तथा क्रीड

कुण्डले दर्पसम्पूर्णस्ततो मे निहतोऽसुरः ।। ५६ ।।[०१]

लक्षालङ्कारः-ततो म इत्यत्र मे मया ।

नैव मन्युस्त्वया कार्यो यत्कृतं मयि भामिनि ।
मत्प्रभावाच्च ते पुत्रो लब्धवान्गातिमुत्तमाम् ।। ५७ ।।[०२]

तस्माद्गच्छ महाभागे भारावतरणं कृतम् ।। ५८ ।।

भीष्मः

निहत्य नरकं भौमं वासवेन पुरस्कृतः।[०३]
सहितो लोकपालैश्च ददर्श नरकालयम् ।। ५९ ।।[०४]

अथास्य गृहमासाद्य नरकस्य यशस्विनः ।
ददर्श धनमक्षय्यं रत्नानि विविधानि च ।। ६० ।।

मणिमुक्ताप्रवालानि वैडूर्यविकृतानि च ।
विस्तारकल्पार्कमणीन्विमलान्स्फाटिकानपि ।। ६१ ।।[०५]

लक्षालङ्कारः-विस्तारकल्प इत्यत्र विस्तारेण कल्पः कल्पना येषां ते तथोक्ताः अर्कमणयः सूर्यकान्तमणयः ।

जाम्बूनदमयान्येव शातकुम्भमयानि च ।

प्रदीप्तज्वलनाभानि शीतरश्मिप्रभाणि च ।
हिरण्यवर्णं रुचिरं श्वेतमभ्यन्तरं गृहम् ।। ६२ ।।

यदक्षयं गृहे दृष्टं नरकस्य धनं बहु ।

---

(०१) (२) ततो मे

(०२) (३)क- त्वत्प्रतापाश्च । क-त्वत्प्रभावाश्च.

(०३) (२) सत्यभामासहायवान्

(०४) (२)क- वासवेन पुरस्कृतः ।.

(०५) (३)क-महासारान् नवमणीन् , महा(अश्म)सारान्

न हि राज्ञः कुबेरस्य तावद्धनसमुच्छ्रयः ।। ६३ ।।[०१]

दृष्टपूर्वः पुरा साक्षान्महेन्द्रसदनेष्वपि ।। ६४ ।।

हते भौमे निसुम्भे च वासवस्सगणोऽब्रवीत्।

दाशार्हपतिमासीनमाहृत्यमणिकुण्डले ।

इन्द्रः

इमानि मणिरत्नानि विविधानि वसूनि च ।। ६५ ।।

हेमसूत्रा महाकक्ष्यास्तोमरैर्वीर्यशालिनः ।

भीमरूपाश्च मातङ्गाः प्रवालविकृताः कुथाः ।। ६६ ।।

लक्षालङ्कारः-प्रवालविकृता इत्यत्र कुथाः गजास्तरणकम्बलविशेषाः ।

विमलाभिः पताकाभिर्वासांसि विविधानि च ।

ते च विंशतिसाहस्रा द्विस्तावत्यः करेणवः ।। ६७ ।।

अष्टौ शतसहस्राणि देशजाश्चोत्तमा हयाः।

गोभिश्चाविकृतैर्यान्यैः कामं तव जनार्दन ।। ६८ ।।[०२]

लक्षालङ्कारः-यान्यैः यानवाहकैः ।

एतत्ते प्रापयिष्यामि वृष्ण्यावासमरिन्दम ।

आविकानि च सूक्ष्माणि शयनान्यासनानि च ।

क्रम(काम)व्याहारिणश्चैव पक्षिणः प्रियदर्शनाः ।। ६९ ।।

लक्षालङ्कारः-आविकानि इत्यत्र (आवासानि) आ समन्ताद्वसन्ति येषु तानि, चित्रकम्बलादि-कृतमन्दिराणि ।

चन्दनागुरुमिश्राणि यानानि विविधानि च ।

---

(०१) (१) क- यत्तदर्थं । क- यावदर्थगृहे.

(०२) (१) क-अष्टादशसहस्राणि.

एतत् ते प्रापयिष्यामि वृष्ण्यावासमरिन्दम ॥ ७० ॥

वसु यत् त्रिषु लोकेषु धर्मेणैवार्जितं त्वया।
एतत्ते प्रापयिष्यामि वृष्ण्यावासमरिन्दम ॥ ७१ ॥

भीष्मः

देवगन्धर्वरत्नानि दैतेयासुरजानि च ।
यानि सन्तीह रत्नानि नरकस्य निवेशने ॥ ७२ ॥

एतत्तु गरुडे सर्वं क्षिप्रमारोप्य वासवः ।
दाशार्हपतिना सार्धमुपायान्मणिपर्वतम् ॥ ७३ ॥

तत्र पुण्या ववुर्वाताः प्रभाश्चित्राः समुज्ज्वलाः ।
प्रेक्षतां सुरसङ्घानां विस्मयः समजायत(पद्यत) ॥ ७४ ॥

त्रिदशा ऋषयश्चैव चन्द्रादित्यौ यथा दिवि ।
प्रभया तस्य शैलस्य निर्विशेषमिवाभवत् ॥ ७५ ॥

अनुज्ञातस्तु रामेण वासवेन च केशवः ।
प्रीयमाणो महाबाहुर्विवेश मणिपर्वतम् ॥ ७६ ॥

तत्र वैडूर्यवर्णानि ददर्श मधुसूदनः ।
सतोरणपताकानि द्वाराणि शरणानि च ॥ ७७ ॥

चित्रग्रथितमेघाभः प्रबभौ मणिपर्वतः ।
हेमचित्रपताकैश्च प्रासादैरुपशोभितः ॥ ७८ ॥

हर्म्याणि च विशालानि मणिसोपानवन्ति च ॥ ७९ ॥

तत्रस्था वरवर्णाभा ददृशुर्मधुसूदनम् ।
गन्धर्वसुरमुख्यानां प्रिया दुहितरस्तदा ॥ ८० ॥

त्रिविष्टपसमे देशे तिष्ठन्तमपराजितम् ।
परिवव्रुर्महाबाहुमेकवेणीधराः स्त्रियः ॥ ८१ ॥

सर्वाः काषायवासिन्यः सर्वाश्च नियतेन्द्रियाः ।
व्रतसन्तापजः शोको नात्र काश्चिदपीडयत् ।। ८२ ।।

अरजांसि च वासांसि बिभ्रत्यः कौशिकान्यपि ।
संहत्य यदुसिंहस्य चक्रुर्धाराञ्जलिं स्त्रियः ।
ऊचुश्चैनं हृषीकेशं सर्वास्ताः कमलेक्षणाः ।। ८३ ।।(०१)

लक्षालङ्कारः-चक्रुर्धाराञ्जलिम् इत्यत्र मोदाश्रुधारया सह अञ्जलिम् ।

कन्यकाः

नारदेन समाख्यातमस्माकं पुरुषोत्तम ।
आगमिष्यति गोविन्दः सुरकार्यार्थसिद्धये ।। ८४ ।।

सोऽसुरं नरकं हत्वा निशुम्भं मुरमेव च ।
भौमं च सपरीवारं हयग्रीवं च दानवम् ।। ८५ ।।

तथा पञ्चजनं चैव प्राप्स्यते धनमक्षयम् ।
सोऽचिरेणैव कालेन युष्मन्मोक्ता भविष्यति ।। ८६ ।।(०२)

एवमुक्त्वागमद्धीमान् देवर्षिर्नारदस्तथा ।। ८७ ।।

त्वां चिन्तयानाः सततं तपो घोरमुपास्महे ।
कालेऽतीते महाबाहुं कदा द्रक्ष्याम माधवम् ।। ८८ ।।

इत्येवं हृदि सङ्कल्पं कृत्वा पुरुषसत्तम ।
तपश्चराम सततं रक्ष्यमाणा हि दानवैः ।
गान्धर्वेण विवाहेन विवाहं कुरु नः प्रियम् ।। ८९ ।।

ततोऽस्मत्प्रियकामार्थं भगवान्मारुतः स्वयम् ।

---

(०१) (१) समेत्य ,(२) चक्रुरस्याञ्जलिं
(०२)(४)क-युष्मद्भर्ता। क- युष्मद्भर्त्त्या.

यथोक्तं नारदेनाथ न चिरात्तद्भविष्यति ।। ९० ।।(०१)

लक्षालङ्कारः-मारुतः स्वयम् इत्यत्र इत्युवाचेति क्रियाध्याहारेण योजना ।

भीष्मः

तासां परमनारीणामृषभाक्षं पुरस्कृतम् ।
ददृशुर्देवगन्धर्वा गृष्टीनामिव गोपतिम् ।। ९१ ।।(०२)

तस्य चन्द्रोपमं वक्त्रमुदीक्ष्य मुदिताः प्रियाः ।
सम्प्रहृष्टा महाबाहुमिदं वचनमब्रुवन् ।। ९२ ।।(०३)

कन्यकाः

सत्यं बत पुरा वायुरिदमस्मानिहाब्रवीत् ।
सर्वभूतकृतज्ञश्च महर्षिरपि नारदः ।। ९३ ।।

विष्णुर्नारायणो देवः शङ्खचक्रगदासिधृक् ।
स भौमं नरकं हत्वा भर्ता वो भविता ह्यतः ।। ९४ ।।

दिष्ट्या तस्यर्षिमुख्यस्य नारदस्य महात्मनः ।
वचनं दर्शनादेव सत्यं भवितुमर्हति ।। ९५ ।।(०४)

यत्प्रियं बत पश्याम वक्त्रं चन्द्रोपमं तु ते ।
दर्शनेन कृतार्थाः स्मो वयमद्य महात्मनः ।। ९६ ।।

भीष्मः

उवाच स यदुश्रेष्ठः सर्वास्ता जातमन्मथाः।

श्रीभगवान्

---

(०१) मारुतोब्रवीत्

(०२)(४)क- वृष्टिभामिव गोपतिम्। क- गोष्पतिम्.

(०३) (२) प्रियतेन्द्रियाः

(०४)(३)क- वचनादेव सत्यं लो भर्ता भवितुमर्हसि । क- दिष्ट्या तद्वचनं कृष्ण सत्यं भवितुमर्हति ।.

यथा ब्रूत विशालाक्ष्यस्तत्सर्वं वो भविष्यति ॥ ९७ ॥

भीष्मः

तानि सर्वाणि रत्नानि गमयित्वाथ किङ्करैः ।
स्त्रियश्च गमयित्वाथ देवर्षिनृपकन्यकाः ॥ ९८ ॥(०१)

वैनतेयं समारुह्य(यभुजे कृष्णो) मणिपर्वतमुत्तमम् ।
क्षिप्रमारोपयाश्चक्रे भगवान्देवकीसुतः ॥ ९९ ॥

सपक्षिगणमातङ्गं सव्यालमृगपन्नगम् ।
शाखामृगगणैर्जुष्टं सप्रस्तरशिलातलम् ॥ १०० ॥

न्यङ्कुभिश्च वराहैश्च रुरुभिश्च निषेवितम् ।
सप्रपातमहासानुं विचित्रशिखिसङ्कुलम् ॥ १०१ ॥(०२)

लक्षालङ्कारः-न्यङ्कुभिश्च इत्यत्र न्यङ्कुः कृष्णसारमृगः । 'रङ्कुस्तथा न्यङ्कुरिति प्रसिद्धा वातप्रमीशम्बर-कृष्णसारा' इति हलः ।

तं महेन्द्रानुजः शौरिश्चकार गरुडोपरि ।
पश्यतां सर्वभूतानामुत्पाट्य मणिपर्वतम् ॥ १०२ ॥

उपेन्द्रं बलदेवं च वासवं च महाबलम् ।
तं च रत्नौघमतुलं पर्वतं च महाबलः ॥ १०३ ॥

वरुणस्यामृतं दिव्यं छत्रं चन्द्रोपमं शुभम् ॥ १०४ ॥

स्वपक्षबलविक्षेपैर्महाद्रिशिखरोपमः ।
दिक्षु सर्वासु संरावं स चक्रे गरुडो वहन् ॥ १०५ ॥

आरुजन्पर्वताग्राणि पादपांश्च समुत्क्षिपन् ।
सञ्जहार महावेगो(भ्राणि) वैश्वानरपथं गतः ॥ १०६ ॥

---

(०१) (१) क- ततस्ता गरुडे सर्वास्सरत्रधनसञ्चयाः ।.

(०२) (१) सिंहैरपि

ग्रहनक्षत्रताराणां सप्तर्षीणां स्वतेजसा ।
प्रभाजालमतिक्रम्य चन्द्रसूर्यपथं ययौ ।। १०७ ।।[०१]

मेरोः शिखरमासाद्य मध्यमं मधुसूदनः ।
देवस्थानानि सर्वाणि ददर्श भरतर्षभ ।। १०८ ।।

विश्वेषां मरुतां चैव साध्यानां च युधिष्ठिर ।
भ्राजमानान्यतिक्रम्य अश्विनोश्च परन्तप ।। १०९ ।।[०२]

प्राप्य पुण्यतमं स्थानं देवलोकमरिन्दमः ।
शक्रसद्म समासाद्य चावरुह्य जनार्दनः ।। ११० ।।

सोऽभिवाद्यादितेः पादावर्चितः सर्वदैवतैः ।
ब्रह्मदक्षपुरोगैश्च प्रजापतिभिरेव च ।। १११ ।।

अदितेः कुण्डले दिव्ये ददावथ तदा विभुः ।
रत्नानि च परार्घ्याणि रामेण सह केशवः ।। ११२ ।।

प्रतिगृह्य च तत्सर्वमदितिर्वासवानुजम् ।
पूजयामास दाशार्हं रामं च विगतज्वरा ।। ११३ ।।

शची महेन्द्रमहिषी कृष्णस्य महिषीं तदा ।
सत्यभामां तु सङ्गृह्य अदित्यै वै न्यवेदयत् ।। ११४ ।।

सा तस्याः सत्यभामायाः कृष्णप्रियचिकीर्षया ।
वरं प्रादाद्देवमाता कुतूहल समन्विता ।। ११५ ।।[०३]

अदितिः

स्नुषे(जरां) न यास्यसि जरां यावत्कृष्णोऽस्तिभूतले ।

---

(०१) (२)क- सप्तर्षिगणतेजसाम्.

(०२) (२)क- अश्विलौ च परन्तपः । क- अर्चितस्सर्वदैवतैः। क- अश्विनौ च परन्तप.

(०३) (४) (सत्यायै विगतज्वरा)

सर्वगन्धगुणोपेता भविष्यसि वरानने ।। ११६ ।।(०१)

भीष्मः

विहृत्य सत्यभामा वै सह शच्या सुमध्यमा ।
शच्यापि समनुज्ञाता ययौ कृष्णनिवेशनम् ।। ११७ ।।(०२)

सम्पूज्यमानस्त्रिदशैर्महर्षिगणसेवितः ।
द्वारकां प्रययौ कृष्णो देवलोकादरिन्दमः ।। ११८ ।।

सोऽतिपत्य महाबाहुर्दीर्घमध्वानमच्युतः ।
वर्धमानपुरद्वारमाससाद पुरोत्तमम् ।। ११९ ।।

अस्मिन् पर्वणि ३८अध्याये ११९श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(८) अष्टमोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अर्घाभिहरणपर्वणि शिशुपालक्रोधे अष्टत्रिंशोऽध्यायः।। ३८।।

# ३९.एकोनचत्वारिंशोऽध्यायः

## 02-05-39

द्वारकावर्णनम् ।। १ ।। रुक्मिणीसत्यभामादिगृहवर्णनम् ।। २।। रामकृष्णयोर्द्वारिकाप्रवेशः ।। ३ ।।

भीष्मः

तां पुरीं द्वारकां दृष्ट्वा विभुर्नारायणो हरिः ।
दृष्टः सर्वार्थसम्पन्नां प्रवेष्टुमुपचक्रमे ।। १ ।।

---

(०१) (२) वधूर्यावद्वै कृष्णमानुषम्

(०२) (१) क- विसृष्टा सत्यभामा वैपौलोभ्या च सुमध्यमा ।.

सोऽपश्यद्वृक्षषण्डांश्च रम्यानारामजान्बहून् ।
समन्ततो द्वारवत्यां नानापुष्पफलान्वितान् ।। २ ।।

अर्कचन्द्रप्रतीकाशैर्मेरुकूटनिभैर्गृहैः ।
द्वारका रचिता रम्यैः सुकृता विश्वकर्मणा ।। ३ ।।[०१]

पद्मषण्डाकुलाभिश्च विलसद्भं स राजि भिः(हंससेवितवारिभिः) ।
गङ्गासिन्धुप्रकाशाभिः परिखाभिरलङ्कृता ।। ४ ।।[०२]

प्राकारेणार्कवर्णेन पाण्डरेण विराजिता ।
वियन्मूर्ध्नि निविष्टेन द्यौरिवाभ्रपरिच्छदा ।। ५ ।।[०३]

नन्दनप्रतिमैश्चापि मिश्रकप्रतिमैर्वनैः ।
वैभ्राजप्रतिमैश्चैव सर्वर्तुकुसुमोत्कटैः ।
भाति चैत्ररथं दिव्यं पितामहवनं यथा ।। ६ ।।

सा पुरीस्फटिकैर्गेहैस्सर्वतस्समलङ्कृता ।
भाति तारापरिक्षिप्ता द्वारका द्यौरिवाम्बरे ।। ७ ।।

भाति रैवतकः शैलो रम्यसानुर्महाजिरः ।
पूर्वस्यां दिशि रम्यायां द्वारकायां विभूषणम् ।। ८ ।।
(२)क- रत्नसानुशुभाचितः । क- महागिरिः

दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते ।
इन्द्रकेतुप्रतीकाशः पश्चिमां दिशमाश्रिः ।। ९ ।।

सुकक्षो राजतः शैलश्चित्रपुष्पमहावनः ।
उत्तरस्यां दिशि तथा वेणुमन्तो विराजते ।

---

(०१) (३)क- द्वारकामाचितां सभ्यैस् सुकृतां विश्वकर्मणा । क-द्वारकामाचितां सम्यांसुकृतां । क-द्वारकामर्चितां काम्यैस् सुकृतां.

(०२)(२)क- हंसकारण्डवासिभिः.

(०३)(३)क- दिवि मूर्ध्नि । क- मेरुमूर्ध्नि । क- यस्य मूर्ध्नि.

मन्दराद्रिप्रतीकाशः पाण्डरः पाण्डवर्षभ ।। १० ।।

चन्द्र(चित्र)कम्बलवर्णाभं पाञ्चजन्यवनं तथा ।
सर्वर्तुकवनं चैव भाति रैवतकं प्रति ।। ११ ।।

लतावेष्टं समन्तात्तु मेरुप्रभवनं महत् ।
भाति तालवनं चैव पुष्पकं पुण्डरीकवत् ।। १२ ।।[०१]

सुकक्षं परिवार्यैनं चित्रपुष्पं महावनम् ।
शतपत्रवनं चैव करवीरकुसुम्भि च ।। १३ ।।

भाति चैत्ररथं चैव नन्दनं च महावनम् ।
रमणं भावनं चैव वेणुमन्तं समन्ततः ।। १४ ।।

भाति पुष्करिणी रम्या पूर्वस्यां दिशि भारत ।
धनुःशतपरीणाहा केशवस्य महात्मनः ।। १५ ।।

महापुरीं द्वारवतीं पञ्चाशद्भिर्मुखैर्युताम् ।
प्रविष्टा विमलां(ष्टो द्वारकां) रम्यां भासयन्तीं समन्ततः ।। १६ ।।

अप्रमेयां महोत्सेधां महागाधपरिप्लवाम् ।
प्रासादवरसम्पन्नां मणिकुट्टिम(श्वेतप्रासाद)शालिनीम् ।। १७ ।।

तीक्ष्णयन्त्रशतघ्नीभिर्यन्त्रजालैः समन्विताम् ।
आयसैश्च महाचक्रैर्ददर्श द्वारकां पुरीम् ।। १८ ।।

अष्टौ रथसहस्राणि प्राकारे सन्ति तत्पुरः(किङ्किणीकिनः) ।
समुच्छ्रितपताकानि यथा देवपुरे तथा ।। १९ ।।

अष्टयोजनविस्तीर्णामचलां द्वादशायताम्।
सर्वसम्पत्समायुक्तामिन्द्राद्या ददृशुः पुरीम् ।। २० ।।
(द्विगुणोपनिवेशां च ददर्श द्वारकां पुरीम्) ।

---

(०१)(४)क- पुण्डरीक च.

अष्टमार्गां महाकक्ष्यां महाषोडशचत्वराम् ।
एवं मार्गपरिक्षिप्तां साक्षादुशनसा कृताम् ॥ २१ ॥

व्यूहानामन्तरा मार्गाः सप्त चैव महापथाः ॥ २२ ॥

तत्र सा विहिता साक्षान्नगरी विश्वकर्मणा ।
काञ्चनैर्मणिसोपानैरुपेता जनहर्षिणी ।
गीतघोषमहाघोषैः प्रासादप्रवरैः शुभा ॥ २३ ॥(०१)

तस्मिन्पुरवरश्रेष्ठे दाशार्हाणां यशस्विनाम् ।
वेश्मानि जहृषे दृष्ट्वा भगवान्पाकशासनः ॥ २४ ॥

समुच्छ्रितपताकानि पारिप्लवनिभानि च ।
काञ्चनाभानि भास्वन्ति मेरुकूटनिभानि च ॥ २५ ॥(०२)

लक्षालङ्कारः-समुच्छ्रितपताकानि इत्यत्र परितः प्लवन्तीति परिप्लवा मेघाः ।

स्फाटिकान्तरशृङ्गैश्च शातकुम्भपरिच्छदैः ।
रत्नसानुगुहाशृङ्गैः सर्वरत्नविभूषितैः ॥ २६ ॥(०३)

सहर्म्यैः सार्धचन्द्रैश्च सनिर्व्यूहैः सदन्तुरैः ।
सयन्त्रगृहसम्बाधैः सधातुभिरिवाद्रिभिः ॥ २७ ॥(०४)

लक्षालङ्कारः-सनिर्यूहैः सदन्तुरैः इत्यत्र 'दन्त उन्नत उरच्' इति वचनात् दन्तुरा उन्नतदन्ता गजाः तत्सहितैः ।

मणिकाञ्चनभौमैश्च सुधामृष्टतलैस्तथा ।
जाम्बूनदमयैर्द्वारैर्वैडूर्यखचिता(विकृता)र्गलैः ॥ २८ ॥(०५)

---

(०१)(६)क- प्रासादवरचत्वरैः । क-प्रासादगृहपाटलैः ।.

(०२) (२) विमानैश्शोभितानि च

(०३) (१) सुधापाण्डुर

(०४) (१) सुहर्म्यैः (२) सनिर्यूहैः सपञ्जरैः

(०५) (१) क- भीत्तीभिस्सुधामृष्टकुथैस्तथा.

सर्वर्तुगुणसम्पन्नै(सुखसंस्पर्शै)र्महाधनपरिच्छदैः ।
रत्न(म्य)सानुगुहै(हा)श्शृङ्गैर्विचित्रैरिव पर्वतैः ॥ २९ ॥

पञ्चवर्णसुवर्णैश्च पुष्पवृष्टिसमप्रभैः ।
तुल्यपर्जन्यनिर्घोषैर्नानावर्णैरिवाम्बुदैः ॥ ३० ॥

महेन्द्रशिखरप्रख्यैर्विहितैर्विश्वकर्मणा ।
आलिखद्भिरिवाकाशमतिचन्द्रार्कभास्वरैः ॥ ३१ ॥

तैर्दाशार्हमहाना(भा)गैर्बभासे भवनह्रदैः ।
चण्डनागातु(कु)लैर्घोरैर्ह्रदैर्भोगवती यथा ॥ ३२ ॥

कृष्णध्वजोपवाह्यैश्च दाशार्हायुधरोहितैः ।
वृष्णिमत्तमयूरैश्च स्त्रीसहस्रप्रजा(भा)कुलैः ॥ ३३ ॥

वासुदेवेन्द्रपर्जन्यैर्गृहमेघैरलङ्कृता।
ददृशे द्वारकातीव मेघैर्द्यौरिव संवृता ॥ ३४ ॥

साक्षाद्भगवतो वेश्म विहितं विश्वकर्मणा ।
ददृशुर्देवदेवस्य चतुर्योजनमायतम् ॥ ३५ ॥

तावदेव च विस्तीर्णमप्रमेयं महाधनैः ।
प्रासादवरसम्पन्नं तस्यां पुरि मुदा युताः ॥ ३६ ॥(०१)

यं चकार महाबाहुस्त्वष्टा वासव चोदितः ।
प्रासादं हेमनाभस्य सर्वतो योजनायतम् ॥ ३७ ॥

लक्षालङ्कारः-हेमनाभः पद्मनाभः

मेरोरिव गिरेः शृङ्गमुच्छ्रितं काञ्चनायुतम् ।
रुक्मिण्याः प्रवरो वासो विहितः सुमहात्मना ॥ ३८ ॥

सत्यभामा पुनर्वेश्म सदा वसति पाण्डरम् ।

---

(०१) (४)युक्तं जगति पर्वतैः

विचित्रमणिसोपानं यं विदुः शीतवानिति ।। ३९ ।।

विमलादित्यवर्णाभिः पताकाभिरलङ्कृतम् ।
व्यक्तबद्धं वनोद्देशे चतुर्दिशि महाध्वजम् ।। ४० ।।(०१)

स च प्रासादमुख्योऽत्र जाम्बवत्या विभूषितः ।
प्रभया भूषणैश्चित्रैस्त्रैलोक्यमिव भासयन् ।। ४१ ।।

यस्तु पाण्डरवर्णाभस्तयोरन्तरमाश्रिः ।
विश्वकर्माकरोद्यं वै(देनं) कैलासशिखरोपमम् ।। ४२ ।।

जाम्बूनदप्रदीप्ताग्रः प्रदीप्तज्वलनोपमः ।
सागरप्रतिमोऽतिष्ठत्सर्वरत्न समुच्ययैः ।। ४३ ।।(०२)

तस्मिन्गान्धारराजस्य दुहिता कुलशालिनी ।
सुकेशी नाम विख्याता केशवेन निवेशिता ।। ४४ ।।

पद्मकूट इति ख्यातः पद्मवर्णो महाप्रभः ।
सुप्रभामा(या) महाबाहो निवासः परमोच्छ्र(मार्चि)तः ।। ४५ ।।(०३)

यस्तु सूर्यप्रभो नाम प्रासादवर उच्यते ।
लक्ष्मणायाः कुरुश्रेष्ठ स दत्तः शार्ङ्गधन्वना ।। ४६ ।।

वैडूर्यवरवर्णाभः प्रासादो हरितप्रभः।
सेतुजालाभिरत्रैव तत्रैव च निवेशिता ।। ४७ ।।(०४)

यं विदुः सर्वभूतानि हरिरित्येव भारत ।
सभित्र विन्दायावासी देवर्षिगणपूजितः ।। ४८ ।।(०५)

---

(०१)(३)क- व्यक्तं बद्धं वलोद्देशैश्चतुर्देशे महाध्वजैः । क-व्यक्तसर्जवलोपेतः चतुर्दशमहाध्वजः।.

(०२)(३)क- कोशे इदमर्धं नास्ति.(४)(न्मेरुरित्यभिविश्रुतः)

(०३)(३)क- सुस्मिताया महाबाहो हासस्स परमोच्छ्रितः । क-सुभीमाया। क-स भामाया.

(०४)(३)क- कोशेषु इदमर्धं नास्ति.

(०५) (३)(वासः स मित्रविन्दाया)

महिष्या वासुदेवस्य भूषणं सर्ववेश्मनाम् ।। ४९ ।।

यस्तु प्रासादमुख्योऽत्र विहितः सर्वशिल्पिभिः ।
अतीव रूपः(रम्यः) सोऽप्यत्र प्रहसन्निव तिष्ठति ।। ५० ।।

सुदत्तायाः सुवासस्तु पूजितः सर्वशिल्पिभिः ।
महिष्या वासुदेवस्य केतुमानिति विश्रुतः ।। ५१ ।।

प्रासादो विरजो नाम विरजस्को महात्मनः ।
उपस्थानगृहं तात केशवस्य महात्मनः ।। ५२ ।।

यस्तु प्रासादमुख्योऽत्र यं त्वष्टा व्यदधात्स्वयम् ।
योजनायतविष्कुम्भं सर्वरत्नमयं विभोः ।। ५३ ।।

तेषां तु विहिताः सर्वे रुक्मदण्डाः पताकिनः ।
सदने वासुदेवस्य मार्गसञ्जनना ध्वजाः ।। ५४ ।।

घण्टाजालानि तत्रैव सर्वेषां च निवेशने ।
आहृत्य यदुसिंहेन वैजयन्त्यचलो महान् ।। ५५ ।।

हंसकूटस्य यच्छृङ्गमिन्द्रद्युम्नसरो महत् ।
षष्टितालसमुत्सेधमर्धयोजनविस्तृतम् ।। ५६ ।।

सकिन्नरमहानादं तदप्यमिततेजसः ।
पश्यतां सर्वलोकानां हृद्यं(भूतानां त्रिषु) लोकेषु विश्रुतम् ।। ५७ ।।

आदित्यपथगं यत्तन्मेरोः शिखरमुत्तमम् ।
जाम्बूनदमयं दिव्यं त्रिषु लोकेषु विश्रुतम् ।। ५८ ।।

तदप्युत्पाट्य कृष्णेन(च्छ्रेण) स्वं निवेशनमाहृतम् ।
भ्राजमानं पुरा तत्र सिद्धौषध(सर्वौषधि)विभूषितम् ।। ५९ ।।

यमिन्द्रभवनाच्छौरिराजहार परन्तपः ।
पारिजातः स तत्रैव केशवेन निवेशितः ।। ६० ।।

सदा देवदणैर्जुष्टस्तथैवाप्सरसां गणैः।

लेपहस्तशतैर्जुष्टो विमानैश्च हिरण्मयैः ।
विहिता वासुदेवेन तत्रैव च(ब्रह्मस्थल)महाद्रुमाः ।। ६१ ।।
शालतालाश्वकर्णाश्च शतशाखाश्च रोहिणाः ।

सालतालाश्च कर्णाश्च शतशाखाश्चरोहिणः ।
भल्लातककपित्थाश्च चन्द्रवृक्षाश्च चम्पकाः ।
खर्जूराः केतकाश्चैव समन्तात्परिरोपिताः ।। ६२ ।।(०१)

पद्माकुलजलोपेता रक्ताः सौगन्धिकोत्पलाः ।
मणिमौक्तिकवालूकाः पुष्करिण्यः सरांसि च ।। ६३ ।।

तासां परमकूलानि शोभयन्ति महाद्रुमाः ।। ६४ ।।

ये च हैमवता वृक्षा ये च नन्दनजास्तथा ।
आहृत्य यदुसिंहेन तेऽपि तत्र निवेशिताः ।। ६५ ।।

रक्तपीतारुणप्रख्याः सितपुष्पाश्च पादपाः ।
सर्वर्तुफलपूर्णास्ते तेषु काननसन्धिषु ।। ६६ ।।

सहस्रपत्रपद्माश्च मन्दराश्च सहस्रशः।
अशोकाः कर्णिकाराश्च तिलका नागमल्लिकाः ।। ६७ ।।

कुरवा नागपुष्पाश्च चम्पकास्तृणगगुल्मकाः ।
सप्तपर्णाः कदम्बाश्च नीपाः कुरुवकास्तथा ।। ६८ ।।(०२)

केतक्यः केसराश्चैव हिन्तालाश्च सहस्रशः(लतलताटकाः) ।
तालाः प्रियङ्गुवकुलाः बदरी(पिण्डिका) बीजपूरकाः ।। ६९ ।।(०३)

---

(०१)(३)क-शोभिताः. क- रोहिणः (४)क- इन्द्र । क- चन्द्रशास्वाश्च.
(०२) (१) क- तूर्यगा नागपुष्पाश्च चम्पकासितमल्लिकाः। क-कुब्जाका नागवृक्षाश्च चम्पकास्तृणचुल्लिकाः.
(०३)(३)क- लताः प्रलाम्भ्वा वकुलाः पिण्डिमा बीजपूरकाः । क- दाडिमा.

द्राक्षामलकखर्जूरा मृद्वीका जम्बुकास्तथा ।
आर्द्राः(म्राः) पनसवृक्षाश्च अङ्कोलाबिल्व(स्तिल)तिन्दुकाः ।। ७० ।।

लिकुचाम्रातकाश्चैव वक्षुरिकाश्च निशाचराः(क्षीरिका कण्टकी तथा) ।
नालिकेरेङ्गुदाश्चैव उत्क्रोशकवनानि च ।
वनानि च कदल्याश्च जातिमल्लिकपाटलाः ।। ७१ ।।

भल्लातककपित्थाश्च तैतभा बन्धुजीवकाः ।
प्रवालाशोककाश्मर्यः प्राचीनाश्चैव सर्वशः ।। ७२ ।।

(१) क-(अधिकः पाठः)

कुमुदोत्पलपूर्णाश्च वाप्यःकूपास्सहस्रशः ।

प्रियङ्गुबदरीभिश्च यवैः स्पन्दनचन्दनैः ।
शमीबिल्वपलाशैश्च पाटलावटपिप्पलैः ।। ७३ ।।[०१]

उदुम्बरैश्च द्विदलैः पालाङ्गैः(शैः) पारिभद्रकैः ।
इन्द्रवृक्षार्जुनैश्चैव अश्वत्थैश्चिरबिल्वकैः ।। ७४ ।।

सौभञ्जनकवृक्षैश्च भल्लटैरश्वसाह्वयैः ।
सर्जैस्ताम्बूलवल्लीभिर्लवङ्गैः क्रमुकैस्तथा ।। ७५ ।।

वंशैश्च विविधैस्तत्र समन्तात्परिरोपितैः ।। ७६ ।।

ये च नन्दनजा वृक्षा ये च चैत्ररथे वने ।
सर्वे ते यदुनाथेन समन्तात्परिरोपिताः ।। ७७ ।।

(१) क- कोशे इदमर्धद्वयं नास्ति

कुमुदोत्पलपूर्णाश्च वाप्यः कूपाः सहस्रशः ।
समाकुलमहावाप्यः पद्मैस्ताः पीत(पीता लोहित)वालुकाः ।। ७८ ।।

---

(०१)(३)क शमीपीलूपलाशैश्य पलाशधवबिल्वकैः । क-पीलुपलाशैश्च लवङ्गवट ।.

तस्मिन्गृहवने नद्यः प्रसन्नसलिला ह्रदाः ।
फुल्लोत्पलजलोपेता नानाद्रुमसमाकुलाः ।। ७९ ।।

तस्मिन्गृहवने नद्यो मणिशर्करवालुकाः ।
मत्तबर्हिणसङ्घाश्च कोकिलाश्च मदोद्वहाः ।
बभूवुः परमोपेताः सर्वे जगतिपर्वताः ।। ८० ।।

(३)क- (अधिकः पाठः)

चकोरनकुला यूथः पोत्रिणश्शुकशारिकाः ।

तत्रैव गजयूथानि तत्र गोमहिषास्तथा ।
निवासाश्च कृतास्तत्र वराहमृगपक्षिणाम् ।। ८१ ।।

विश्वकर्मकृतः शैलः प्राकारस्तस्य वेश्मनः ।
व्यक्तं किष्कुशतोद्यामः सुधाकरसमप्रभः ।। ८२ ।।

तेन ते च महाशैलाः सरितश्च सरांसि च ।
परिक्षिप्तानि हर्म्यस्य वनान्युपवनानि च ।। ८३ ।।

एवं तच्छिल्पिवर्येण विहितं विश्वकर्मणा ।
प्रविशन्नेव गोविन्दो ददर्श परितो मुहुः ।। ८४ ।।

मुमुदे विश्वकर्माणं प्राञ्जलिं प्रणतननम्
इन्द्रः सहामरैः श्रीमांस्तत्र तत्रावलोकयत् ।। ८५ ।।

एवमालोकयाश्चक्रुर्द्वारकां वै मुदान्विताः(कामृषभास्त्रयः) ।
उपेन्द्रबलदेवौ च वासवश्च महायशाः ।। ८६ ।।

ततस्तं पाण्डरं शौरिर्मूर्ध्नि तिष्ठन्गरुत्मतः।
प्रीतः शङ्खमुपादध्मौ जनानां(विद्विषां) रोमहर्षणम्।। ८७ ।।

तस्य शङ्खस्य शब्देन सागरश्चुक्षुभे भृशम्।

ररास च नभः सर्वं तच्चित्रमभवत्तदा ।। ८८ ।।

पाञ्चजन्यस्य निर्घोषं निशम्य कुकुरान्धकाः।
विशोकाः समपद्यन्त गरुडस्य च दर्शनात् ।। ८९ ।।

शङ्खचक्रगदापाणिं सुपर्णशिरसि स्थितम् ।
दृष्ट्वा जहृषिरे कृष्णं भास्करोदयतेजसम् ।। ९० ।।

ततस्तूर्यप्रणादश्च भेरीनां च महास्वनः ।
सिंहनादश्च सञ्जज्ञे सर्वेषां पुरवासिनाम् ।। ९१ ।।

ततस्ते सर्वदाशार्हाः सर्वे च कुकुरान्धकाः ।
प्रीयमाणाः समाजग्मुरालोक्य मधुसूदनम् ।। ९२ ।।

वासुदेवं पुरस्कृत्य वेणुशङ्खरवैः सह ।
उग्रसेनो ययौ राजा वासुदेवनिवेशनम् ।। ९३ ।।(०१)

आनन्दितुं पर्यचरन्स्वेषु वेश्मसु देवकी ।
रोहिणी च यथोद्देशमाहुकस्य च याः स्त्रियः ।। ९४ ।।(०२)

हता ब्रह्मद्विषः सर्वे जयन्त्यन्धकवृष्णयः ।
एवमुक्तः स ह स्त्रीभिरीक्षितो मधुसूदनः ।। ९५ ।।

ततः शौरिः सुपर्णेन स्वं निवेशनमभ्ययात् ।
चकाराथ यथोद्देशमीश्वरो मणिपर्वतम् ।। ९६ ।।

ततो धनानि रत्नानि सभायां मधुसूदनः ।
निधाय पुण्डरीकाक्षः पितुर्दर्शनलालसः ।। ९७ ।।

ततः सान्दीपनिं पूर्वमुपस्पृष्ट्वा महायशाः ।
ववन्दे पृथुताम्राक्षः प्रीयमाणो महाभुजः ।। ९८ ।।

---

(०१) (१) क - वसुदेवं.
(०२)(३)क- यदा देशं.

(१) क-(अधिकः पाठः)

कोशे-कपूर्वं ब्राह्मणानां च भारत ।

यथान्यायं वासुदेवः पादौ स्पृष्ट्वा महायशाः ।।

तथाश्रुपरिपूर्णाक्षमानन्दगतचेतसम् ।
ववन्दे सह रामेण पितरं वासवानुजः ।। ९९ ।।

यथाश्रेष्ठमुपागम्य सात्वतान्यदुनन्दनः ।

रामकृष्णौ समाश्लिष्य सर्वे चान्धकवृष्णयः ।
प्रीताः प्रीततमास्सर्वे वसुदेव सुतौ प्रति ।। १०० ।।

(१) क-(अधिकः पाठः)

ताभ्यां च मूर्ध्न्युपाघ्रातः केशवः परवीरहा ।

तं तु कृष्णः समाहृत्य रत्नौघधनसञ्चयम् ।
व्यभजत्सर्ववृष्णिभ्य आदध्वमिति चाब्रवीत् ।। १०१ ।।

यथाश्रेष्ठमुपागम्य सात्वतान्यदुनन्दनः।
सर्वेषां नाम जग्राह दाशार्हाणामधोक्षजः ।। १०२ ।।

ततः सर्वानवद्यानि(णि वित्तानि) सर्वरत्नमयानि च ।

व्यभजत्सर्ववृष्णिभ्य अदध्वमितिचाब्रवीत् ।।

ततस्सर्वानवद्यानि सर्वरत्नमयानि च ।

व्यभजत्तानि तेभ्योऽथ सर्वेभ्यो यदुनन्दनः ।। १०३ ।।

सा केशवमहामात्रैर्महेन्द्रप्रमुखैः सभा(सह) ।
शुशुभे वृष्णिवीरैश्च(शार्दूलैः) सिंहैरिव गिरेर्गुहा ।। १०४ ।।

अथासनगतान्सर्वानुवाच विबुधाधिपः ।
शुभया हर्षयन्वाचा महेन्द्रस्तान्महायशाः ।। १०५ ।।

कुकुरान्धकमुख्यांश्च तं च राजानमाहुकम् ।। १०६ ।।

इन्द्रः

यदर्थं जन्म कृष्णस्य मानुषेषु महात्मनः ।
यत्कृतं वासुदेवेन तद्वक्ष्यामि समासतः ॥ १०७ ॥

अयं शतसहस्राणि दानवानामरिन्दमः ।
निहत्य पुण्डरीकाक्षः पातालविवरं ययौ ॥ १०८ ॥

यच्च नाधिगतं पूर्वैः प्रह्लादबलिशम्बरैः ।
तदिदं शौरिणा वित्तं प्रापितं भवतामिह) ॥ १०९ ॥(०१)

सपाशं मुरमाक्रम्य पाञ्चजन्यं च धीमता।
शिलासङ्घानतिक्रम्य निशुम्भः सगणो हतः ॥ ११० ॥

हयग्रीवश्च विक्रान्तो निहतो दानवो बली ।
मथितश्च मृधे भौमः कुण्डले चाहृते पुनः ।
प्राप्तं च देवदेवेन(दिवि देवेषु) केशवेन महद्यशः ॥ १११ ॥

वीतशोकभयापायाः(बाधाः) कृष्णबाहुबलाश्रयाः ।
यजन्तु विविधैः सोमैर्मखैरन्धकवृष्णयः ॥ ११२ ॥

पुनर्बाणवधे शौरिमादित्या वसुभिः सह ।
मन्मुखा हि गमिष्यन्ति साध्याश्च मधुसूदनम् ॥ ११३ ॥(०२)

भीष्मः

एवमुक्त्वा ततः सर्वानामन्त्र्य कुकुरान्धकान् ।
सस्वजे रामकृष्णौ च वसुदेवं च वासवः ॥ ११४ ॥

प्रद्युम्नसाम्बनिशठाननिरुद्धं च सारणम् ।
बभ्रुं च विगदं(झल्लि गदं) भानुं चारुदेष्णं च वृत्रहा ॥ ११५ ॥

---

(०१) (४) प्राप्तं वै प्रापितं च वः

(०२)(३)क- मन्मुखान्निगमिष्यन्ति क- तन्मुखामभि ।.

सत्कृत्य प्रीतितोऽक्रूरं(सारणाक्रूरौ) पुनराभाष्य सात्यकिम् ।
सस्वजे वृष्णिराजानमाहुकं कुकुराधिपम् ॥ ११६ ॥[०१]

भोजं च कृतवर्माणमन्यांश्चान्धकवृष्णिषु ।
आमन्त्र्य देवप्रवरो वासवो वासवानुजम् ॥ ११७ ॥

ततः श्वेताचलप्रख्यं गजमैरावतं प्रभुः ।
पश्यतां सर्वभूतानामारुरोह शचीपतिः ॥ ११८ ॥

पृथिवीं चान्तरिक्षं च दिवं च वरवारणम् ।
मुखाडम्बरनिर्घोषैः पूरयन्तमिवासकृत् ॥ ११९ ॥

हैमयन्त्रमहाकक्ष्यं हिरण्मयविषाणिनम् ।
मनोहरकुथास्तीर्णं सर्वरत्नविभूषितम् ॥ १२० ॥

अनेकशतरत्नाभिः पताकाभिरलङ्कृतम् ।
नित्यस्रुतमदस्रावं क्षरन्तमिव तोयदम् ॥ १२१ ॥

दिशागजं महामात्रं काञ्चनस्रजमास्थितः ।
प्रबभौ मन्दराग्रस्थः प्रतपन्भानुमानिव ॥ १२२ ॥

ततो वज्रमयं भीमं प्रगृह्य परमाङ्कुशम् ।
ययौ बलवता सार्धं पावकेन शचीपतिः ॥ १२३ ॥

तं करेणुगजव्रातैर्विमानैश्च मरुद्गणाः ।
पृष्ठतोऽनुययुः प्रीताः कुबेरवरुणग्रहाः ॥ १२४ ॥

स वायुपथमास्थाय वैश्वानरपथं गतः ।
प्राप्य सूर्यपथं देवस्तत्रैवान्तरधीयत ॥ १२५ ॥

भीष्मः

ततः सर्वदशार्हाणामाहुकस्य च याः स्त्रियः ।

---

(०१) (१) कसत्कृत्याशावहाक्रूरौ.

नन्दगोपस्य महिषी यशोदा लोकविश्रुता ।। १२६ ।।

रेवती च महाभागा रुग्मिणी च पतिव्रता ।
सत्या जाम्बवती चोभे गान्धारी शिशुमा अपि या ।। १२७ ।।(०१)

लक्षालङ्कारः-शिशुमा या इत्यत्र शिशुमेति कृष्णमहिष्या नामान्तरम् ।

विशोका लक्ष्मणा साध्वी सुमित्रा केतुमा तथा ।
वासुदेवमहिष्योऽन्याः श्रिया सार्धं ययुस्तदा ।। १२८ ।।

विभूतिं द्रष्टुमनसः केशवस्य वराङ्गनाः ।
प्रीयमाणाः समा जग्मुस्सर्वाभरणभूषिताः ।। १२९ ।।(०२)

देवकी सर्वयोषिद्भी(देवीनां) रोहिणी च पुरस्कृता ।
ददृशुर्देवमासीनं कृष्णं हलभृता सह ।। १३० ।।(०३)

तौ तु पूर्वमुपक्रम्य रोहिणीमभिवाद्य च ।
अभ्यवादयतां देवौ देवकीं रामकेशवौ ।। १३१ ।।(०४)
यथा श्रैष्ठ्यन्ततस्त्वन्या मातश्च नरकान्तकृत्

देवकीं सप्तदेवीनां यथाश्रेष्ठं च मातरः।
ववन्दे सह रामेण भगवान्वासवानुजः ।। १३२ ।।

अथासनवरं प्राप्य वृष्णिदारपुरस्कृता ।
उभावङ्कगतौ चक्रे देवकी रामकेशवौ ।। १३३ ।।

सा ताभ्यामृषभाक्षाभ्यां पुत्राभ्यां शुशुभे तदा ।
देवकी देवमातेव मित्रेण वरुणेन च ।। १३४ ।।

---

(०१) (२) विशोका लक्ष्मणा तथा
(०२) (२) सभां जग्मुरालोकयितुमच्युतम्
(०३) (१) क- सत्यदेवीनां । क- सप्तदेवीनां .(३) सभां जग्मुः
(०४) (१) क- मभिक्रम्य.

ततः प्राप्ता यशोदाया दुहिता वै क्षणेन हि ।
जाज्वल्यमाना वपुषा प्रभयातीव भारत ।। १३५ ।।

एकानङ्गेति यामाहुः कन्यां वै(तां) कामरूपिणीम् ।
यत्कृते सगणं कंसं जघान पुरुषोत्तमः ।। १३६ ।।

ततः स भगवान्रामस्तामुपाक्रम्य भामिनीम् ।
मूर्ध्न्युपाघ्राय सव्येन परिजग्राह पाणिना ।। १३७ ।।

तां च तत्रोपसम्प्राप्य प्रियां नन्दस्य पुत्रिकाम्
दक्षिणेन कराग्रेण परिजग्राह माधवः ।। १३८ ।।

ददृशुस्तां तदा(सभा)मध्ये भगिनीं रामकृष्णयोः ।
रुक्मपद्मशयां पद्मां श्रीमिवोत्तमनागयोः ।। १३९ ।।(०१)

अथाक्षतमहावृष्ट्या लाजपुष्पैश्शुभै(ष्पघृतै)रपि ।
वृष्णयोऽवाकिरन्प्रीताः सङ्कर्षणजनार्दनौ ।। १४० ।।(०२)

सबालाः सहवृद्धाश्च सज्ञातिकुलबान्धवाः ।
तदो(उपो)पविविशुः प्रीता वृष्णयो मधुसूदनम् ।। १४१ ।।

पूज्यमानो महाबाहुः पौराणां रतिवर्धनः ।
विवेश पुरुषव्याघ्रः स्ववेश्म मधुसूदनः ।। १४२ ।।
रुक्मिण्या सहितो देव्या प्रमुमोद सुखी सुखम् ।। १४३ ।।

अनन्तरं च सत्याया जाम्बवत्याश्च भारत ।
सर्वासां च यदुश्रेष्ठः गेहे गेहे(सर्वकाल)विहारवान् ।
जगाम च हृषीकेशो रुक्मिण्याः सदनं पुनः ।। १४४ ।।(०३)

---

(०१)(३)क- पद्माशयां पद्मां श्रीरिवो, क- पत्रशयां पद्मा श्रीरिवो ।.
(०२)(२)क- वृतैरपि.
(०३) (४) स्वं निवेशनम्

एष तात महाबाहो विजयः शार्ङ्गधन्वनः ।
एतदर्थं च जन्माहुर्मानुषेषु महात्मनः ।। १४५ ।।

अस्मिन् पर्वणि ३९अध्याये १४५श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(९) नवमोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि

अर्घाभिहरणपर्वणि शिशुपालक्रोधे सप्तत्रिंशोऽध्यायः।। ३९।।

# ४०. चत्वारिंशोऽध्यायः

## 02-05-40

रुद्रवरगर्वितेन बाणासुरेण स्वतनूजया उषया सह गूढं रममाणस्य अनिरूद्धस्य कारागृहप्रापणम् ।। १ ।। नारदाद्विदितपौत्रवृत्तान्तेन कृष्णेन बाणं निर्जित्य उषया सह अनिरूद्धानयनम् ।। २ ।। भीष्मेण कृष्णमाहात्म्योपसंहारः ।। ३ ।।

भीष्मः

द्वारकायां ततः कृष्णः स्वदारेषु दिवानिशम् ।
सुखं लब्ध्वा महाराज प्रमुमोद महायशाः ।। १ ।।

पौत्रस्य कारणाच्चक्रे विबुधानां हितं तदा ।
सवासवैः सुरैः सर्वैर्दुष्करं भरतर्षभ ।। २ ।।[०१]

बाणो नामाभवद्राजा बलेर्ज्येष्ठसुतो बली ।
वीर्यवान्भरतश्रेष्ठ स च बाहुसहस्रवान् ।। ३ ।।

ततश्चक्रे तपस्तीव्रं सत्येन मनसा नृप ।

(०१)(४)क- दुस्तरं.

रुद्रमाराधयामास स च बाणः समा बहूः ।
तस्मै बहुवरा दत्ताः शङ्करेण महात्मना ॥ ४ ॥[०१]

तस्माल्लब्ध्वा वरान्बाणो दुर्लभान्ससुरैरपि ।
स शोणितपुरे राज्यं चकाराप्रतिमो बली ॥ ५ ॥

त्रासिताश्च सुराः सर्वे तेन बाणेन पाण्डव ॥ ६ ॥

विजित्य विबुधान्सर्वान्सेन्द्रान्बाणः समा बहूः ।
अशासत महद्राज्यं कुबेर इव भारत ।
ऋद्ध्यर्थं कुरुते यत्नं तस्य चैवोशना कविः ॥ ७ ॥

ततो राजनुषा नाम बाणस्य दुहिता तथा ।
रूपेणाप्रतिमा लोके मेनकायाः सुता यथा ॥ ८ ॥

अथोपायेन कौन्तेय ह्य(अ)निरुद्धो महाद्युतिः ।
प्राद्युम्निस्तामुषां प्राप्य प्रच्छन्नः प्रमुमोद ह ॥ ९ ॥

अथ बाणो महातेजास्तदा तत्र युधिष्ठिर ।
तं गुह्यनिलयं ज्ञात्वा प्राद्युम्निं सुतया सह ॥ १० ॥

गृहीत्वा कारयामास वस्तुं कारागृहे बलात् ॥ ११ ॥

सुकुमारः सुखार्होऽथ तदा दुःखमवाप सः ।
बाणेन खेदितो राजन्ननिरुद्धो मुमोह च ॥ १२ ॥

एतस्मिन्नेव काले तु नारदो मुनिपुङ्गवः ।
द्वारकां प्राप्य कौन्तेय कृष्णं दृष्ट्वा वचोऽब्रवीत् ॥ १३ ॥

नारदः

कृष्ण कृष्ण महाबाहो यदूनां कीर्तिवर्धन ।
त्वत्पौत्रो बाध्यतेऽत्यर्थं(बाध्यमानोऽथ) बाणेनामिततेजसा ।

---

(०१)(२)क- सत्त्वेन.

कृच्छ्रं प्राप्तोऽनिरुद्धो वै शेते कारागृहे सदा ।। १४ ।।(०१)

भीष्मः

एवमुक्त्वा सुरर्षिश्च(र्वै) बाणस्याथ पुरं ययौ
नारदस्य वचः श्रुत्वा ततो राजञ्जनार्दनः ।। १५ ।।

आहूय बलदेवं वै प्रद्युम्नं च महाद्युतिम् ।
आरुरोह गरुत्मन्तं ताभ्यां सह जनार्दनः ।। १६ ।।

ततः सुपर्णमारुह्य त्रयस्ते पुरुषर्षभाः ।
जग्मुः क्रुद्धा महावीर्या बाणस्य नगरं प्रति ।। १७ ।।

अथासाद्य महाराज तत्पुरीं ददृशुश्च ते ।
ताम्रप्राकारसंवीतां रूप्यद्वारैश्च शोभिताम् ।। १८ ।।

हेमप्रासादसम्बाधां मुक्तामणिविचित्रिताम् ।
उद्यानवनसम्बाधां(सम्पन्नां) नृत्तगीतैश्च शोभिताम् ।। १९ ।।

तोरणैः पक्षिभिः कीर्णां तटाकैश्चाभि(पुष्करिण्या) च शोभिताम्
तां पुरीं स्वर्गसङ्काशां हृष्टपुष्टजनाकुलाम् ।। २० ।।

दृष्ट्वा मुदा युतां हैमां विस्मयं परमं ययुः ।। २१ ।।

तस्य बाणपुरस्याथ(सन्) द्वारस्था देवताः सदा ।
महेश्वरो गुहश्चैव भद्रकाली विनायकः(च पावकः) ।
एता वै देवता राजन्नरक्षुस्तां पुरीं सदा ।। २२ ।।

(१) क-(अधिकः पाठः)

एकस्मिन्नग्रयो राजन्नन्यस्मिन् ग्रोश्वदर्पहा ।

महेश्वरस्स्वयं राजन् दक्षिणद्वारि तस्थिवान् ।।

संस्थिताः पचिमद्वरि रुद्राः भूतगणाः स्वगाः ।।

---

(०१)(६)क- कन्यागृहे.

अथ कृष्णो बलाज्जित्वा द्वारपालान्युधिष्ठिर ।
सुसङ्क्रुद्धो महातेजाः शङ्खचक्रगदाधरः ।। २३ ।।

आससादोत्तरद्वारं शङ्करेणाभिपालितम् ।। २४ ।।

तत्र तस्थौ महातेजाः शूलपाणिर्महेश्वरः ।
पिनाकं सशरं गृह्य बाणस्य हितकाम्यया ।। २५ ।।

ज्ञात्वा तमागतं कृष्णं व्यादितास्यमिवान्तकम् ।
महेश्वरो महाबाहुः कृष्णाभिमुखमाययौ ।। २६ ।।(०१)

ततस्तौ चक्रतुर्युद्धं वासुदेवमहेश्वरौ ।
तद्युद्धमभवद्धोरमचिन्त्यं रोमहर्षणम् ।। २७ ।।
ततक्षतुस्तावन्योन्यं शस्त्रैर्विजयकाङ्क्षिणौ
दिव्यास्त्राणि च तौ देवौ क्रुद्धौ मुमुचतुस्तदा ।। २८ ।।(०२)

स कृष्णोऽथ(ततः कृष्णो) रणं कृत्वा मुहूर्तं शूलपाणिना ।
विजित्य तं महादेवं ततो युद्धे जनार्दनः ।
अन्यांश्च जित्वा द्वारस्थान्प्रविवेश पुरोत्तमम् ।। २९ ।।

प्रविश्य बाणमासाद्य स तत्राथ जनार्दनः ।
चक्रे युद्धं महाक्रुद्धस्तेन बाणेन पाण्डव ।। ३० ।।

बाणोऽपि सर्वशस्त्राणि शितानि भरतर्षभ ।
सुसङ्क्रुद्धस्तदा युद्धे पातयामास केशवे ।। ३१ ।।

पुनरुद्यम्य शस्त्राणां सहस्रं सर्वबाहुभिः ।
मुमोच बाणः सङ्क्रुद्धः कृष्णं प्रति रणाजिरे ।। ३२ ।।

ततः कृष्णस्तु सञ्छिद्य तानि सर्वाणि भारत ।

---

(०१)(३)क- कोशेषु इदमर्धं नास्ति.
(०२) (१) अन्योन्यं तौ ततक्षाते अन्योन्यजयकाङ्क्षिणौ ।-पां

कृत्वा मुहूर्तं बाणेन युद्धं राजन्नधोक्षजः ।। ३३ ।।(०१)

चक्रमुद्यम्य राजन्वै दिव्यं शस्त्रोत्तमं ततः ।
सहस्रबाहूंश्चिच्छेद बाणस्यामिततेजसः ।। ३४ ।।(०२)

ततो बाणो महाराज कृष्णेन भृशपीडितः ।
छिन्नबाहुः पपाताशु विशाख इव पादपः ।। ३५ ।।

स पातयित्वा बालेयं बाणं कृष्णस्त्वरान्वितः ।
प्राद्युम्निं मोक्षयामास क्षिप्तं कारागृहे तदा ।। ३६ ।।(०३)

मोक्षयित्वाथ कृष्णश्च(गोविन्दः) प्राद्युम्निं सह भार्यया ।
बाणस्य सर्वरत्नानि असङ्ख्यानि जहार सः ।। ३७ ।।

गोधनान्यथ सर्वस्वं स बाणस्यालये बलात् ।
जहार च हृषीकेशो यदूलां किर्तिवर्धनः ।। ३८ ।।

ततः स सर्वरत्नानि चाहृत्य मधुसूदनः ।
क्षिप्रमारोपयाश्चक्रे तत्सर्वं गरुडोपरि ।। ३९ ।।

त्वरयाथ स कौन्तेय बलदेवं महाबलम्।
प्रद्युम्नं च महावीर्यमनिरुद्धं महाद्युतिम् ।। ४०।।(०४)

उषां च सुन्दरीं राजन्भृत्यदासीगणैः सह ।। ४१ ।।

सर्वानेतान्समारोप्य रत्नानि विविधानि च ।
मुदा युक्तो महातेजाः पीताम्बरधरो बली ।। ४२ ।।

दिव्याभरणचित्राङ्गः शङ्खचक्रगदासिभृत्।

---

(०१) (१) क- ततः कृष्णस्तथा च्छित्त्वा तानि शस्त्राणि भारत । क- स्तदा च्छित्वा सर्वशस्त्राणि .
(०२) (१) क- रोषाद्वै.
(०३)(४)क- क्षिप्तं राजग-हे । क- क्षिप्र राजगृहात्.
(०४)(३)क प्रद्युम्नं च.

आरुरोह गरुत्मन्तमुदयं भास्करो यथा।
अथारुह्य सुपर्णं स प्रययौ द्वारकां प्रति ।। ४३ ।।

प्रविश्य स्वपुरं कृष्णो यादवैः सहितस्ततः ।
प्रमुमोद तदा राजन्स्वर्गस्थो वासवो यथा ।। ४४ ।।

भीष्मः

सूदिता मौरवाः पाशा निशुम्भनरकौ हतौ।
कृतक्षेमः पुनः पन्थाः पुरं प्राग्ज्योतिषं प्रति ।। ४५ ।।

शौरिणा पृथिवीपालास्त्रासिता भरतर्षभ।
धनुषश्च प्रणादेन पाञ्चजन्यस्वनेन च ।। ४६ ।।

मेघप्रख्यैरनीकैश्च दाक्षिणात्याहि साम्प्रतम्(त्यैः सुसंवृतम्)।
रुक्मिणं त्रासयामास केशवो भरतर्षभ ।। ४७ ।।

ततः पर्जन्यघोषेण रथेनादित्यवर्चसा।
उवाह महिषीं भोज्यामेष चक्रगदाधरः ।। ४८ ।।

आरथ्यामहतः क्रोधः शिशुपालश्च निर्जितः ।(०१)
वक्रश्च सह शैब्येन शतधन्वा च क्षत्रियः ।। ४९ ।।

लक्षालङ्कारः-आरथ्यामाहत इत्यत्र आ समन्ताद्रथिनो यत्र गच्छन्ति सा वीथी आरथी ।

इन्द्रद्युम्नो हतः क्रोधाद्यवनश्च कशेरुकः ।
हतस्सौभपतिस्साल्ववस्सहैव शतधन्वना ।। ५० ।।(०२)

पर्वतानां सहस्रं च चक्रेण पुरुषोत्तमः ।
विभिद्य पुण्डरीकाक्षो द्युमत्सेनमयोधयत् ।। ५१ ।।

---

(०१) (१) तृणावर्तो हतो राजन् -पां (१) क- जारूथ्यामाहतः क्रोधः क- जारूथ्यां क-जाग्रम्यां

(०२) (३)क-क्रथकौशिकौ क- हतस्सौभपतिश्चैव राप्वश्चैव पतो बली क- क्रोधधन्वना.

महेन्द्रशिखरे चैव निमेषान्तरचारिणौ।
जग्राह भरतश्रेष्ठ वानरान(वरुणस्या)भितश्चरौ ।। ५२ ।।(०१)

इरावत्यामुभौ तात ह्य(चैताव)ग्निसूर्यसम प्रभौ(समौ बले)।
गोपतिस्तालकेतुश्च निहतौ शार्ङ्गधन्वना ।। ५३ ।।

अक्षप्रपतने चैव नेमिहंसपदेषु च।
उभौ तावपि कृष्णेन स्वराष्ट्रे विनिपातितौ ।। ५४ ।।(०२)

लक्षालङ्कारः-नेमिहंसपदेषु देशेषु ।

गोमन्तशिखरे केचित् केचिद् द्यूतेऽथ सूदिताः ।
पाण्ड्याः पौण्ड्राश्च राजानो ह्यङ्गवङ्गकलिङ्गपाः ।।
निमिर्हंसपतिश्चैव कृष्णेन हपवान् पुरा ।(०३)

दग्धा वाराणसी तात केशवेन महात्मना।
सानुबन्धस्सराष्ट्रश्च काशीदेशाधिपो हतः ।। ५५ ।।

प्राग्ज्योतिषं पुरश्रेष्ठमसुरैर्बहुभिर्वृतम्।
प्राप्य लोहितकूटानि कृष्णेन वरुणो जितः ।। ५६ ।।(०४)

लक्षालङ्कारः-प्राप्य लोहितकूटानि इत्यत्र लोहितकूटानि हेममयगिरिशृङ्गाणि ।

इन्द्रो देवगणैस्सार्धं जितो हित्वा गजोत्तमम् ।
पारिजातो हृतः पार्थ केशवेन बलीयसां ।।
तस्माद्भीत्या क-तं तेन पुरं स्वर्गभिवापरम् ।

अजेयो दुष्प्रधर्षश्च लोकपालो महाद्युतिः ।

---

(०१) (४)क- वरुणाश्चा । क- वानरावभित ।
(०२) (२) राजन्नवहैलनतत्परौ
(०३) (४)क- सुराष्ट्रौ क- त्यराष्ट्रौ ।
(०४) (१) क- कोशे इदमर्धं नास्ति (३)ख-(अधिकः पाठः)

इन्द्रद्वीपो महेन्द्रेण गुप्तो मघवता स्वयम् ॥ ५७ ॥
पारिजातो हृतः पार्थ केशवेन बलीयसा ॥ ५८ ॥

पाण्ड्यं पौण्ड्रं च मात्स्यं च कलिङ्गं च जनार्दनः ।
जघान सहितान्सर्वानङ्गराजं च माधवः ॥ ५९ ॥

एष चैकशतं हत्वा रथेन क्षत्रपुङ्गवान्।
गान्धारीमवहत्कृष्णो महिषीं यादवर्षभः ॥ ६० ॥

अथ गाण्डीवधन्वानं क्रीडार्थं मधुसूदनः ।
जिगाय भरतक्षेष्ठ कुन्त्याश्च प्रमुखे विभुः ॥ ६१ ॥
वङ्गानयानरहितान् माधवे भरतर्षभ ॥

द्रोणं द्रौणिं कृपं कर्णं भीमसेनं सुयोधनम्।
वक्रानुयाने सहितान् जिगाय भरतर्षभ ॥ ६२ ॥[०१]

लक्षालङ्कारः-वक्रानुयान इत्यत्र रैवताचले वक्रीभूय अनुयाने जात्येकवचनं, स्वस्वानुकूलरथेषु सहितान् पुञ्जीभूतान् ।

बभ्रोश्च प्रियमन्विच्छिन्नेष चक्रगदाधरः ।
वेणुदारिहृतां भार्यामुन्ममाथ युधिष्ठिर।** ॥ ६३ ॥

पर्याप्तां पृथिवीं सर्वां साश्वां सरथकुञ्जराम्।
वेणुदारिवशे युक्तां जिगाय मधुसूदनः ॥ ६४ ॥

अवाप्य तपसा वीर्यं बलमोजश्च भारत।
त्रासिताः सगणाः सर्वे बाणेन विबुधाधिपाः ॥ ६५ ॥

(१) क-(अधिकः पाठः)

बभ्रवे दत्तवान् राज्यम् अस्माकं पश्यतामसो ।
ततः प्रभ-ति राजानस् सर्वे बिभ्यति चास्य वै ॥

(०१) (३) युद्धाय सहितान् राजन्

वज्राशनिगदापाशैस्त्रासयद्भिरनेकशः ।
तस्य नासीद्रणे मृत्युर्देवैरपि सवासवैः ।। ६६ ।।

सोऽभिभूतश्च कृष्णेन निहतश्च महात्मना।
असौ कुवलयापीडं कंसं च मधुसूदनः ।
हस्ति पश्च महाबाहुर्निजघान जनार्दनः ।
छित्त्वा बाहुसहस्रं तद्गोविन्देन महात्मना ।। ६७ ।।

एष पीठं महाबाहुः कंसं च मधुसूदनः ।
पैठकं चातिलोमानं निजघान जनार्दनः ।। ६८ ।।
(१) क-(अधिकः पाठः)
अवाप्तं तपसा वीर्यं बलमोजश्च भारत ।

जम्भमैरावतं चैव विरूपं च महायशाः ।
जघान भरतश्रेष्ठ शम्बरं चारिमर्दनम् ।। ६९ ।।

एष भोगवतीं गत्वा वासुकिं भरतर्षभ।
निर्जित्य पुण्डरीकाक्षो रौहिणेयमचोदयत्(मोचयत्)।। ७० ।।

एवं बहूनि कर्माणि शिशुरेव जनार्दनः ।
कृतवान्पुण्डरीकाक्षः सङ्कर्षणसहायवान्।* ।। ७१ ।।
एवं बहूनि कर्माणि शिशुरेव जनार्दनः ।
कृतवान्पुण्डरीकाक्षस्सङ्कर्षणसहायवान्।

एवमेषोऽसुराणां च सुराणां चापि सर्वशः ।
भयाभयकरः कृष्णः सर्वलोकेश्वरः प्रभुः ।। ७२ ।।

एवमेष महाबाहुः शास्ता सर्वदुरात्मनाम्।
कृत्वा देवार्थममितं स्वस्थानं प्रतिपत्स्यते ।। ७३ ।।
यत् करिष्यति तत्सर्वं पश्यसि त्वं क्षृणोषि च ।

सुरासुरमनुष्येषु नाभून्न भविता क्वचित् ।

एष भोगवतीं रम्यां रवि(मृषि)कान्तां महायशाः ।
द्वारकामात्मसात्कृत्वा सागरं गमयिष्यति ॥ ७४ ॥

बहुपुण्यवतीं रम्यां चैत्ययूपवतीं शुभाम्।
द्वारकां वरुणावासं प्रवेक्ष्यति सकाननाम् ॥ ७५ ॥

तां सूर्यसदनप्रख्यां मनोज्ञां शार्ङ्गधन्वना।
रहितां वासुदेवेन सागरः प्लावयिष्यति ॥ ७६ ॥(०१)

सुरासुरमनुष्येषु नासीन्न भविता क्वचित्।
वसत्यद्य महान्राजा न विनामधुसूदनात् ॥ ७७ ॥(०२)

भ्राजमानास्तु सर्वे वै वृष्ण्यन्धकमहारथाः ।
नाकपृष्ठं प्रपत्स्यन्ते मुनिशापगतासवः ॥ ७८ ॥(०३)

एवमेव दशार्हाणां विधाय विधिना विधिम्।
विष्णुर्नारायणः साक्षात्वस्थानं प्राप्स्यते ध्रुवम् ॥ ७९ ॥(०४)

अनियोज्योऽप्रमेयश्च यस्तु कामशरीरधृत्

अप्रमेयोऽनियोज्यश्च यत्रकामगमो वशी।
मोदते भगवान्भूतैर्बालः क्रीडनकैरिव ॥ ८० ॥

नैष गर्भत्वमापेदे योऽन्यां वै सर्वभूतकृत् ।
आत्मनस्तेजसा कृष्णः सर्वेषां कुरुते गतिम् ॥ ८१ ॥(०५)

यथा बुद्बुद उत्थाय पारावरेनिलीयते।

---

(०१) (२) तज्जुष्टं प्रतिपत्स्यन्ते नाकपृष्ठं गतासवः- अधिकः (३) विश्लिष्टां
(०२) (२) नाभूत् -(३) यस्तामध्यवसद्राजा अन्यत्र
(०३) (१) शिशवो
(०४) (४) सोमः सूर्यश्च सविता स्वयम्
(०५) (२) न योन्यामवसत्प्रभुः

चराचराणि भूतानि तथा नारायणे सदा ।। ८२ ।।[०१]

न प्रमातुं महाबाहुः शक्यो भारत केशवः ।
परं ह्यपरमेतस्माद्विश्वरूपान्न विद्यते ।। ८३ ।।[०२]

अयं तु पुरुषो बालः शिशुपालो न बुध्यते।
सर्वत्र सर्वदा कृष्णं तस्मादेवं प्रभाषते।
यो हि धर्मं विचिनुयादुत्कृष्टं मतिमान्नरः ।
स वै पश्येद्यथा धर्मं न तथा चेदिराडयम्।
सवृद्धबालेष्वथवा पार्थिवेषु महात्मसु।
को नार्हं मन्यते कृष्णं को वाप्येनं न पूजयेत्।
अथैनां दुष्कृतां पूजां शिशुपालो व्यवस्यति।
दुष्कृतायां यथान्यायं तथायं कर्तुमर्हति।[०३]

अस्मिन् पर्वणि ४०अध्याये ८३श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि(१०) दशमोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अर्घाभिहरणपर्वणि भीष्मवाक्ये चत्वारिंशोऽध्यायः।। ४०।।

# ४१.एकचत्वारिंशोऽध्यायः

## 02-05-41

---

(०१) (२) तत्रैव प्रविलीयते

(०२) (३)क- परं ह्यपरतस्तस्माद् विश्वरूपान्न विद्यते क- हि परतस्तस्माद्विश्वरूपं ।.

(०३) (१) अथैमां; अथैनां; यथेमां; अथ वा; अथैव; अधिमां (for अथेमां).; (२) व्यवस्थितिः; (३) दुष्कृतानां; सुकृतं वा; . दुष्कृतां वा; सुकृतां वा; दुष्कृते वा (for °ताया).; यथान्याय्यं; °न्यायं; (४) तथाहं.; तथा त्वं कर्तुमर्हसि; तथा कर्तुमिहार्हतिऽ

**भीष्मवाक्योपरमे सहदेवेन कृष्णपूजाविरुद्धभाषिणो वधे प्रतिज्ञतेराज्ञां तूष्णीम्भावः ।। १ ।। सहदेवमूर्ध्नि पुष्पवृष्टिः ।। २ ।। अशरीरवाणी च ।। ३ ।। नारदेन कृष्णार्चकस्य निन्दनम् ।। ४ ।। सहदेवेन सभ्यपूजनपूर्वकं कर्मसमापनम् ।। ५ ।। शिशुपालेन यज्ञविघाताय राज्ञां प्रोत्साहनम् ।। ६ ।। राज्ञां रणोद्यमाद्बुभ्यतो युधिष्ठरस्य भीष्मेण समाश्वासनम् ।। ७ ।। राज्ञः प्रति सहदेवस्य सदर्पोक्तिः । ततो विक्षुब्धानां शिशुपालप्रभृतीनां युद्धायोद्यमनम् ।।**

वैशम्पायनः

**एवमुक्त्वा ततो भीष्मो विरराम महाबलः ।**
**व्याजहारोत्तरं तत्र सहदेवोऽर्थवद्वचः ।। १ ।।**[०१]

सहदेवः-

**केशवं केशिहन्तारमप्रमेयपराक्रमम्।**
**पूज्यमानं मया यो वः कृष्णं न सहते नृपाः ।**[०२]
**सर्वलोकेश्वरं कृष्णं विज्ञाय पुरुषोत्तमम् ।।* ।। २ ।।**[०३]

***३६१ (अधिकपाठः - कपाठे)**

**क्षिप्रं युद्धाय निर्यातु शक्तश्चेदत्र मे युधि।***
**(यद्यवज्ञा कृता मया)**
**सर्वेषां बलिनां मूर्ध्नि मयेदं निहितं पदम्।**
**एवमुक्ते मया सम्यगुत्तरं प्रब्रवीतु सः ।**[०४]

---

(०१) (१) एवमुक्तस्.;भीष्मे.;(२) महाबलः;मनाः;यशः (for यशाः).;(३) आजहार (for व्याजहार).;(उ)त्तमं; (अं)तरे; ततस् (for (उ)त्तरं).;पश्चात् (for तत्र).;(४) सहदेवः प्रतापवान्; देवो महामनाः;देवार्थ(द्ध) तत्ववित्; देवस्तु तत्ववित्ऽ

(०२) सहदेवः; (१) केशिहर्तारम्.;(२) अप्रमेयं महाबलं; अप्रमेयमरिन्दमंऽ

(०३)(३) कृष्णं; यो वै; योद्य (for यो वः).;यो वा न सहते राज्ञां (कश्चिद्).; (४) यो वै (for कृष्णं).;नृपः (for नृपाः).;कश्चित्स (राज्ञां स)बलवाहनःऽ

(०४) (१) तस्येदं सकलं मूर्ध्नि; तस्य मूर्ध्नि सुसंन्यस्तं.;(२) दर्शितं (for निहितं).; मया विन्यस्यते पदं; ममेदं सकलं पदं; राज्ञः सव्यं (सर्वं (for सव्यं)पदं मया.;(३) इत्थम् (for एवम्).;उक्तो; क्तं (for क्ते).;हेतुर्

*३६२ (अधिकपाठः - कपाठे)

(स एव हि मया वध्यो भविष्यति न संशयः ।)*

मतिमन्तश्च ये केचिदाचार्यं पितरं गुरुम्।

अर्च्यमर्चितमर्घार्हमनुजानन्तु ते नृपाः ।[०१]

तमिः सर्वसम्पन्नम् आचार्यं पितरं गुरुम् ।
अर्च्यमर्चितमस्माभिस् सर्वे सम्मन्तुपर्हथ ॥ ३ ॥

यो वा न सहते राज्ञां कश्चित्सबलवाहनः ।
क्षिप्रं युद्धाय निर्यातु शक्तश्चेदत्र मे युधि ॥ ४ ॥

पूज्यमानं मया यो वः कृष्णं न सहते नृपः ।
तस्य मूर्ध्नि सुसन्न्यस्तं राज्ञस्सव्यं पदं मया।
एवमुक्ते मया सम्यगुत्तरं प्रब्रवीतु सः ॥ ५ ॥

ततो न व्याजहारैषां कश्चिद्बुद्धिमतां सताम्।
मानिनां बलिनां राज्ञां मध्ये वै दर्शिते पदे ॥ ६ ॥[०२]

ततोऽपतत्पुष्पवृष्टिः सहदेवस्य मूर्धनि।

अदृश्यरूपा वाचश्च निश्चेरुःसाधु साध्विति ॥ ७ ॥[०३]

आविध्यदजितं कृष्णं भविष्यद्भूतजल्पकः ।

---

(for सम्यग).; (४) मे (for सः)ऽ

(०१) (१) च (for तु).;तमिमं सर्वसम्पन्नम्.;(२) नृपतिं; भूपतिं (for पितरं).;(३) अभ्यम्; अर्ध्यम् (for अर्च्यम्).; अर्चाह्यम्; अर्चति; अर्घ्यार्हम्; अर्च्यार्हम्; अर्घार्हम्; अस्माभिः (for अर्चार्हम्).;(३) ह्यनु (for अनु).;सर्वे संमन्तुमर्हथऽ

(०२)(२) तेषां; किञ्चिद् (for कश्चिद्).;(३/४) राज्ञां मध्ये.;वै (for सं).;पथि (for पदे).;मध्ये सन्दर्शितं पदं; अवध्ये दर्शिते पदे; अचिन्त्ये दर्शिते (र्पिते; र्शिने) पदेऽ

(०३)(३) अदृष्टपूर्वा; अदृश्यरूप; श्यदेहा (श्या देव).;(४) (अ)प्रब्रुवन्; निश्चेरुः (for (अ)प्यब्रुवन्).;साधु साध्विति चाब्रुवन्ऽ

सर्वसंशयनिर्मोक्ता नारदः सर्वलोकवित् ।। ८ ।।(०१)

उवाचाखिलभूतानां मध्ये स्पष्टतरं वचः ।। ९ ।।

नारदः-

कृष्णं कमलपत्राक्षं नार्चयिष्यन्ति ये नरः।
जीवन्मृतास्तु ते ज्ञेया न सम्भाष्याः कदाचन ।। १० ।।(०२)

वैशम्पायनः-

तत्राहूतागतास्सर्वे सुनीथप्रमुखाः नृपाः ।
प्रत्यदृश्यन्त सङ्क्रुद्धा विवर्णाः क्रोधमूर्छिताः ।। ११ ।।(०३)

युधिष्ठिराभिषेकं च कृष्णे पूजां च तादृशीम्।
व्यब्रुवंस्तत्र राजानो निर्वेदादात्मनिश्चयात् ।। १२ ।।(०४)

न स्याद्यथा तथा कार्यमेवं सर्वे तदाब्रुवन् ।
निष्कर्षान्निश्चयात्सर्वे राजानः क्रोधमूर्छिताः ।*(०५)

सुहृद्भिर्वार्यमाणानां तेषां हि वपुराबभौ।
आमिषादपकृष्टानां सिंहानामिव गर्जताम् ।। १३ ।।(०६)

---

(०१) (१) नारद उं.; अविध्यदजिनं; आविध्यदजितं (मं); आविध्य वृजितं; अविध्यदजितं; आराध्य यजितं; प्राविध्वदजिनं; आविद्ध; आविश्य सदनं; आविध्यदजिनं.;आविध्यत्.;हृष्टो; कृष्णो (for कृष्णं).;

(२) भविश्यभूत; भविष्याद्भुतं.; भविष्यद्भूतभावनः.;(३) सर्वसंशय (सङ्गक)निर्मुक्तो;निर्मुक्ता.;

(४) सर्वयोगवित्; लोकजित्; धर्मवित्ऽ

(०२)( स्पष्टतमं (for तरं).;नारदं उ).

(०३) (१) तत्रार्हणागमे; हूतागणाः; हूतास्ततः; हूताश्च ते (ये);तदाहूतागताः; तत्राश्रतागताः; शत्रुभूताहिताः; तमाहूतागताः;(२) गताः; नृपाः(for गणाः).; (३) समदृश्यन्त; सम्प्रदृ; प्र (अ)त्यदृ.;सङ्क्रुद्धो.;(४) तदा (for तथा).;विचित्र- वदनास्तथा; विवर्णाः क्रोधमूर्च्छिताःऽ

(०४) (१) युधिष्ठिरे चाभिषेकं तु; युधिष्ठिरेभिषेकं च.;(२) वार्हणं; चा(वा)र्हणां. कृष्णे पूजां च तादृशींऽ

(०५)(तस्माद् (for न स्याद्). तथा (for तदा).) (३) विब्रुवन्; व्यब्रु.;(४) निर्वेदाना(न्ना)त्मनिश्चयात् (न्); निर्वेदात्म(र्थ) विनिश्चयात्ऽ

(०६) (३) आमिषादवकृष्टानां; आमर्षादवकृष्टानां; आमिषादप(प्र)हृष्टानां.;

(४) गर्जितं;.गर्जितांऽ

तं बलौघमपर्यन्तं राजसागरमव्ययम्।
कुर्वाणं समयं कृष्णो युद्धाय बुबुधे तदा ॥ १४ ॥[०१]

पूजयित्वा च पूजार्हान्ब्रह्मक्षत्रविशेषवित्।
सहदेवो नृणां देवः समापद्यत कर्म तत् ॥ १५ ॥[०२]

तस्मिन्नभ्यर्चिते कृष्णे सुनीथः शत्रुकर्षणः ।
अतिताम्रेक्षणः कोपादुवाच मनुजाधिपान् ॥ १६ ॥[०३]

शिशुपालः-

स्थितः सेनापतिर्योऽहं मन्यध्वं किं तु साम्प्रतम्।
युधि तिष्ठाम सन्नह्य समेतान्वृष्णिपाण्डवान् ॥ १७ ॥[०४]

वैशम्पायनः-

इति सर्वान्समुत्साह्य राज्ञस्तांश्चेदिपुङ्गवः ।
यज्ञोपघाताय ततः सोऽमन्त्रयत राजभिः ॥ १८ ॥[०५]

तत्राहूता गताः सर्वे सुनीथप्रमुखा गणाः ।
समदृश्यन्त सङ्क्रुद्धा विवर्णवदनास्तथा।

---

(०१) (१) तं जनौघम्; तद्बलौ; तुमुलौ (for तं बलौ).;(२) मव्ययं (for मक्षयम्).; (४) तथा (for तदा).

(०२) (१) वैशं उं (वैशं).;च (for तु); पृजार्हान्.;(२) विशेषवत्; षवित् (for षतः).; क्षत्रविशेषवित्.; (३) सहदेवो विशेषज्ञः.;(४) समुपायत.;कर्मकृत्ऽ

(०३) (२) चेदिराट्; सनाथः (for सुनीथः).;शत्रुकर्शनः (नं); तापनः; सूदनः; दर्शनः (for कर्षणः).; (३) अभिताम्रे; अतिताम्रा.; रोषाद्; क्रोधाद् (for कोपाद्).;(४) उवाच वसुधाधिपान्ऽ

(०४) (१) क- हितः. स्थितिः;हितः (for स्थितः यो; वा (for वो).;(२) ब्रुवध्वं (for मन्य).; तु (for नु).;मर्ष(मृष)यध्वं किमीदृशं; मन्यध्वं किमीदृशं).;महर्षयमकीदृशं. (३) अधितिष्ठाम(मि); युधि तिष्ठामि.;(४) समेता (for तान्).;पाडवैःऽ

(०५) (१) कः ततस्सर्वान् सम्त्साद्य राज्ञस्र्ताश्चेदिपुङ्गवः । क- समुत्सार्य । समासाद्य. तदा (ततः; सदा) (for इति).;समुत्थाप्य; त्सह्य; च्छाह्य; त्साद्य; समासाद्य; ;समुत्सार्य; चार्; न्नाह्य (for त्साह्य).;(२) राजस्तांश्चेदि; स राज्ञश्चेदि; स राज्ञस्त्वां चेदि; नृपतींश्चेदि°; नृपतिश्चेदि.;(३) राज्ञोपघाताय; यज्ञोपया. तदा (for ततः).;यज्ञो पघातं पार्थानां.;(४) सा (सं).; मन्त्रं; अ (आ)मन्त्रंऽ

युधिष्ठिराभिषेकं च वासुदेवस्य चार्हणम्।
न स्याद्यथा तथा कार्यमेवं सर्वे तदाब्रुवन्।
निष्कर्षान्निश्चयात्सर्वे राजानः क्रोधमूर्छिताः ।
अब्रुवंस्तत्र राजानो निर्वेदादात्मनिश्चयात्।
सुहृद्भिर्वार्यमाणानां तेषां हि वपुराबभौ।
आमिषादपकृष्टानां सिंहानामिव गर्जताम्।
तं बलौघमपर्यन्तं राजसागरमक्षयम्।
कुर्वाणं समयं कृष्णो युद्धाय बुबुधे तदा।

वैशम्पायनः

ततः सागरसङ्काशं दृष्ट्वा नृपतिमण्डलम्।
रोषात्प्रचलितं सर्वमिदमाह युधिष्ठिरः ।। १९ ।।(०१)

*३६५ (अधिकपाठः - कपाठे)

संवर्तवाताभिहतं भीमं क्षुब्धमिवार्णवम्।(०२)

भीष्मं मतिमतां मुख्यं वृद्धं कुरुपितामहम्।
बृहस्पतिं बृहत्तेजाः पुरुहूत इवारिहा ।। २० ।।(०३)

युधिष्ठिरः-

असौ रोषात्प्रचलितो महान्नृपतिसागरः ।
अत्र यत्प्रतिपत्तव्यं तन्मे ब्रूहि पितामह ।। २१ ।।(०४)

---

(०१)(२) °मण्डलं (for °सागरम्). दृष्ट्वा तन्नृपमण्डलंऽ

(०२)( भीष्मं (for भीमं). क्रुद्धम् (for लुब्धम्). भीमक्षोभ्यमिवार्णवं.) (३) प्रचलितं; प्रचलितो., राजन् (for सर्वम्). (४) इदमाहा युधिष्ठिरः

(०३) (१) मुख्यं (for श्रेष्ठं). (२) वृद्ध. (३) बृहस्पति; प्रजापतिं. महातेजाः (°जः) (for बृहत्तेजाः).
(४) शतक्रतुर् (°तुम्) (for पुरुहूत)ऽ

(०४) (१) प्रचलतो. (२) महानृपतिसागरः (°रं). (३)क- तत्र यत्प्रतिपत्तव्यं । क- पत्तव्यं. यत्र; तत्र

यज्ञस्य च न विघ्नः स्यात्प्रजानां च हितं भवेत्।
यथा सर्वत्र तत्सर्वं ब्रूहि मेऽद्य पितामह ।। २२ ।।(०१)

इत्युक्तवति धर्मज्ञे धर्मराजे युधिष्ठिरे।
उवाचेदं वचो भीष्मस्ततः कुरुपितामहः ।। २३ ।।(०२)

भीष्मः-

मा भैस्त्वं कुरुशार्दूल श्वा सिंहं हन्तुमर्हति।
शिवः पन्थाः सुनीतोऽत्र मया पूर्वतरं वृतः ।। २४ ।।(०३)

प्रसुप्ते हि यथा सिंहे श्वानस्तस्मिन्समागताः ।
भषेयुः सहिताः सर्वे तथेमे वसुधाधिपाः ।। २५ ।।(०४)

वृष्णिसिंहस्य सुप्तस्य तथामी प्रमुखे स्थिताः ।
भषन्ते तात सङ्क्रुद्धाः श्वानः सिंहस्य सन्निधौ ।। २६ ।।(०५)

---

अत्र). प्रतिकर्तव्यं; °वक्तव्यं; °वत्तव्यं (for पत्तव्यं). अत्र स्वन्तं भवेद्यन्नः. पितामहं (°हः)ऽ

(०१) (१) न च. विघ्नं जज्ञस्य च विधानं स्यात्; यज्ञस्य निर्विघ्नकरं. (२) हितं (for शिवं). हि नः; हितं; महत्; च नः; च यत्; वचः (for भवेत्). तद्वदस्व कुरूत्तम (°द्वह). (३) सवं स्यात्; क्षेमं स्यात्; नः स्वां (स्त्वं) तं (for तत्सर्वं). यथा (त) ब्रूहि मन्त्रं त्वं°; यथा सर्वं न नस्वतं; यथा हि (च) पूर्ववत्स(त्पू)र्वं; प्रजानामधिपं पूर्वं. (४) तथा ब्रूहि; ब्रूहि मह्यं (for ब्रूहि मेऽद्य). पितामहः. ब्रूहि मे कुरुपुङ्गवऽ

(०२) (१) धर्मज्ञ; धर्मिष्ठे; राजेन्द्र. (२) धर्मपुत्रे (for राजे. (३/४) वचनं (for ( )दं वचो). भीष्मस्तत्र; काले भीष्मः (for भीष्मस्ततः). °पितामह (हं)ऽ

(०३) भीष्मः. (१/२) भैनं; भीर्न; भैषीस् (for भैस्त्वं). कुलशार्दूल; नृपं; न च कौन्तेय; त्वं न कौतेय (for कुरु). °शार्दूलश्चासिंहं; शार्दूलश्चासि त्वं. सिंहान् (for सिंहं). योद्धुम् (for हन्तुम्). इच्छति; इच्छसि (for अर्हति). न श्वा सिंहं हन्तुमर्हतीत्यन्वयः (३) शिव; शिवं (कल्याणं). पथा. सुनीथोन्त्र; तु भीः (है) मोत्र. सुनीतः (४) पूर्वतमं. वृतं; ततः; कृतः; प्रति (for वृतः)ऽ

(०४) (१) च; तु; (ऽ)पि (for हि). (२) तस्मिन्; तात (for तत्र). समागतः. (३) भवेयुः; भषन्ते; भक्षेयुः; भवेरन्; हर्षेरन्; भक्षरेन्; (४) तथामी; तथैव (for तथेमे);ऽ

(०५) (१) वृष्णिसिंहप्रसुप्तस्य; स्य पुण्यस्य. (२) तथामी; तथा मे; तथैमे; तवेमे. संमुखाः; प्रमुखाः; पुरुषाः; प्रमुख; (ऽ)भिमुखाः (खे); विमुखाः; हि मुखाः (for प्रमुखे). (३) क- हर्षन्ते भृगसङ्काशाः । क- भाष्नते भाष । क- भाषन्ते चाष । क- भाषन्ते झष । भवन्ति; भाषन्ते; भवन्त; भीषन्ते; भूषन्ते; हर्षते; भक्षन्ते. तत्र; चापि (for तात). भाष (भष; चष) सङ्काशाः; मृगसङ्काशाः (°शं); चाषसङ्काशाः; चाभिसक्रद्धाः (for तात सङ्क्रुद्धाः). संरब्धाः; सं (स) क्रोधाः (for सङ्क्रद्धाः). (४) नराः श्वानो (°ना) स्यसंनिधौ; असिंहाः

न हि सम्बुध्यते यावत्सुप्तः सिंह इवाच्युतः ।[०१]
तदिदं ज्ञातपूर्वं हि तव संस्तोतुमिच्छतः ॥ २७ ॥[०२]

तेन सिंहीकरोत्येतान्नृसिंहश्चेदिपुङ्गवः ।
पार्थिवान्पार्थिवश्रेष्ठः शिशुपालोऽप्यचेतनः ।
सर्वान्सर्वात्मना तात नेतुकामो यमक्षयम् ॥ २८ ॥[०३]

नूनमेतत्समादातुं पुनरिच्छत्यधोक्षजः ।
यदस्य शिशुपालस्य तेजस्तिष्ठति भारत ॥ २९ ॥[०४]

विप्लुता चास्य भद्रं ते बुद्धिर्बुद्धिमतां वर ।**
चेदिराजस्य कौन्तेय सर्वेषां च महीक्षिताम् ॥ ३० ॥[०५]

आदातुं च नरव्याघ्रो यं यमिच्छत्ययं तदा।
तस्य विप्लवते बुद्धिरेवं चेदिपतेर्यथा ॥ ३१ ॥[०६]

चतुर्विधानां भूतानां त्रिषु लोकेषु माधवः ।
प्रभवश्चैव सर्वेषां निधनं च युधिष्ठिरः ॥ ३२ ॥[०७]

---

सिंहसंनिधौऽ
(०१) (१) तर्हि (for न हि). यावत्; यो वै (for तावत्). (२) सुप्त (for सुप्तः)ऽ
(०२)( ज्ञाप्य॰ (for ज्ञात), स्तवं (for तव). ॰मिच्छसि; ॰मिच्छति; मर्हसि.) (३) क- तदिहाज्ञानपूर्वं हि . क- तदिदं ज्ञाप्य पूर्वं हि तव संस्तोतुभिच्छसि । येन (for तेन). सिंहकरोति; सिंहः क. एष; एनान् (for एतान्). (४) नृसिंहां; नृसिंहं; नृसिंहा; न सिंहां; असिंह (for नृसिंह). ॰पुङ्गवऽ
(०३) (१) पार्थिवश्रेष्ठः पाण्डवश्रेष्ठ; पार्थिवः श्रेष्ठः; वं श्रेष्ठ; पार्थिवश्रेष्ठा; पार्थिवाध्यक्षः (॰क्षाः; ॰क्षान्; क्ष). (२) प्य चेतनः (for ल्पचेतनः). (४) नेतुमर्हत्य पक्षयंऽ
(०४) (१) समाधातुं; ॰दातं; त्वमादातुं; (२) ईक्षति (for इच्छति). (३) यदत्र; ये तत्र (for ॰स्थ). पालस्य; पालेस्ति (स्मि); पालस्थे (for पालस्थं). (४) बुद्धि स्तिष्ठति पार्थिवऽ
(०५) (१) विवृता; विप्लुता; तस्य (for चास्य). दुर्बुद्धेर्; दुर्बुद्धिर् (for भद्रं ते). (२) ब्रूहि (for बुद्धिर्). (३) कौरव्य; चैषा हि (for कौन्तेय)ऽ
(०६) (१) च (for हि). आदातुं पुण्डरीकाक्ष. (२) यो यम्; एष (for यं यम्). इच्छन्ति; यच्छति. तत्; यं; नः; सं (for (अ)यं). तदा; तथा; सदा; वदा (for यदा). (३) यस्य. विश्रवते (for विप्ल). (४) येवं; वैवं (for एवं). चेदिपते; तिर्. तथा; यदा (for यथा)ऽ
(०७) (१) लोकानां (for भूता). (२) भारत (for माधवः). (३) अभवचैव; प्रभवत्त्वैव. भूतानां (for

वैशम्पायनः

इति तस्य वचः श्रुत्वा ततश्चेदिपतिर्नृपः।
भीष्मं रूक्षाक्षरा वाचः श्रावयामास भारत ।। ३३ ।।(०१)

अस्मिन् पर्वणि ४१अध्याये ३३श्लोकाः सन्ति

**अर्घाभिहरणपर्वणि (११) एकादशोऽध्यायः**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि शिशुपालवधपर्वणि युधिष्ठिराश्वासने एकचत्वारिंशोऽध्यायः।। ४१।।

**(समाप्तम् अर्घाभिहरणपर्व)**

---

सर्वेषां). माधवं प्रभवश्चैव. (४) निधनश्च; निधानं च. भूतानां निधनं च यः.

(०१) (१) अथ (for इति). (२) तदा; तथा; यथा (for ततश्). चेदिपते; चेति पतिर्. नृपाः. (३) राव; भाषः (for वाचः). भीष्मो रुक्षतरा वाचः; भीष्मं रूक्षतरां (रूक्षाक्षरां) वाचंऽ

# शिशुपालवधपर्व

## ४२.द्विचत्वारिंशोऽध्यायः

महाभारततात्पर्यनिर्णये एकविंशाध्याये

जयः प्रविश्य केशवं पुनश्च पार्षदोऽभवत् ।
असौ च पाण्डवैः क्रतुः प्रवर्तितो यथोदितः ।।२५१।।

## 02- 05- 42

शिशुपालकृता भीष्मनिन्दा

शिशुपालः

विभीषिकाभिर्बह्वीभिर्भीषयन्सर्वपार्थिवान्।
**न व्यपत्रपसे कस्माद्वृद्धः सन्कुलपांसन ।। १ ।।(०१)**

उक्तमेतत्तृतीयायां प्रकृतौ वर्तता त्वया।
दिवाकरमिवोद्यन्तं ददृशुस्सर्वपार्थिवाः ॥ ४५ ॥

दृष्ट्वा कृष्णमथायान्तं प्रतपन्तमिवौजसा ।
स्थितं पुष्परथे दिव्ये पुष्पकेतुमिवापरम् ॥ ४६ ॥

यथार्हं केशवे वृत्तिमवशाः प्रतिपेदिरे ॥ ४७ ॥

तानुवाच महाबाहुः महासुरनिबर्हणः ॥
वृष्णवीरस्तदा राजन्सान्त्वयन्परवीरहा ॥ ४८ ॥

श्रीभगवानुवाच

अपेत सबलास्सर्व आश्वस्ता मम शासनात् ।
मा दुष्टो दूषयेत्पाप एष वै सर्वपार्थिवान् ॥ ४९ ॥[०१]

लक्षालङ्कारः-अपेत इति लोटि मध्यमपुरुषवचनम् ॥

एवमुक्तस्ततः कृष्णो मृदुपूर्वमिदं वचः ।
उवाच पार्थिवान्सर्वान्स समक्षं च पाण्डवान्वीर्यवान् ॥ ५० ॥[०२]

सात्वतानां नृशंसात्मा न हितोऽनपकारिणाम् ।[०३]

प्राग्ज्योतिषपुरं यातानस्माञ्ज्ञात्वा नृशंसकृत् ।

---

(०१)(३)क- अदुष्टान् ।.

(०२)( ५) (१)वैशं उ, इत्युक्ते च, एवमुक्तस् (for एवमुक्ते), (४)स (तान् ) (for तत्), संम तच् (forसमक्षं), हि (for च), वीर्यवान् (for पाण्ङ), एष नः शत्रुरत्यन्तं पार्थिवाः सात्वतीसुतः ।.

(०३)(६) (१)वः (forनः), (२)एष वृष्णिविमर्दमः (षु मानदः, अस्यांतमधुना नृपाः), (३)सात्वतां (तान्, तैः) सात्वतीपुत्रो (एष वो ह्युक्तवानस्य), (४)विहितो, न हीनो, निहितो (forन हितो, नहितो), नहितो अहित इत्यर्थः । नोप (for -नप) वैरं चरति शाश्वतं (मोचनं नाद्य रोचये),.

**अदहद्द्वारकामेष स्वस्रीयः सन्नराधिपाः ।। ५१ ।।**[०१]

**क्रीडतो भोजराजस्य एष रैवतके गिरौ ।**
**हत्वा बद्ध्वा च तान्सर्वानुपायात्स्वपुरं पुरा ।। ५२ ।।**[०२]

**अश्वमेधे हयं मेध्यमुत्सृष्टं रक्षिभिर्वृतम् ।**
**अपाहरत्पापबुद्धिः पुरा यज्ञजिघांसया ।। ५३ ।।**

**पितुर्मे यज्ञविघ्नार्थमहरत्पापनिश्चयः ।**[०३]

**सौवीरात् प्रति यातां च बभ्रोरेष तपस्विनः ।**
**भार्यामभ्यहरन्मोहादकामां तामितो गताम् ।। ५४ ।।**[०४]

**लक्षालङ्कारः-सौवीरात्प्रतिपत्तौ च इत्यत्र प्रतिपत्तौ 'पद्‌लृ गतौ' इति धातोः द्वारकां प्रत्यागमने सति, बभ्रोः बभ्रुनामकयादवस्य ।**

**एष मायाप्रतिच्छन्नः करूशार्थे तपस्विनीम् ।**
**जहार भद्रां वैशालीं मातुलस्य नृशंसकृत् ।। ५५ ।।**[०५]

**लक्षालङ्कारः-करूशार्थे दन्तवक्रार्थम् । मातुलस्य वसुदेवस्य । नृशंसकृत् निष्ठुरकारी ।**

---

(०१) ७, (१)जोतिष, द्यो, ज्यौ, पुरे, वधे (for पुरं), जातान् गतान्, मयि प्राग्ज्योतिषं,) (२) श्रुत्वा, कृत्वा (for ज्ञात्वा), नृशंसवत्, वान्, द्धारकामरुधत्पुरा, (३)अदहं, द्धारिकामेष, द्धारकामेव,) (४)स्वस्त्रेयः, स्वस्त्रियः, स (च) (forसन्), न (पु)राधिपः,.

(०२)(८) (१) भोजराजस्य,) (२)नैष (forएष), (३)अन्यान् (for सर्वान्), गत्वा हत्वा च बद्धा (लब्ध्त्रा)च, (४)अपा (for उपा),प्रति (for पुरा), स्वपुरं (सस्वरं) तानथानयत् (तमनाथयत्, तान दान),.

(०३)(९) (१)अश्रमेध (धं), हि यन् (forहयं), (२)उच्छिष्टं, निसृष्टं (for उत्सृ), ऋषिभिर्, रषिभिर् (for रक्षिभिर्),वृतः,) (३)अपाहरत् पापबुद्धिः, पितुर्मैप जहूहारतिपापो, पितुर्मैपहरत्पापो,) (४) अहत्पापविनिश्चयं, पुरा (बुह्त्चा, पितुर्) यज्ञजिघांसया,.

(०४)( १०) (१)सौ(सु) वीरत्, सौ(सु)वीरां, सौवीरं, प्रतिपीतां च, यांतीं च, यात्रायां, यातां च, सौवीरा प्रति (भ्यव) पत्तौ च (तु), (२)क- यशस्विनः । एव, एषां, किषु, एष, तपस्विनः, महात्मनः, मनस्विनः, (३) अभ्या,अप, अपा, अभ्य,मौर्ख्याद्, मौहाद्,पाप, पापो,मोहाद्, भार्या हि रममत्पापाद्, (४)अकामं,अकामाद्, ह्चकामां, मलुजाधिपाः, कामतो गतां, धर्मतो गतां, तामितो गतां,.

(०५)( ११) (१)एवं (forएष), मया, चैव (for माया), (२)क- कारूशार्थे ।कुरुषार्थे, कारुषा, करुता,करुपा,क (का)रुशा, यश(for तप), (३)ददर्श, बभार (for जहार), बद्धा, भद्रं, भार्या (for भद्रां),

वृष्णिदारान्विलाप्यैष हत्वा च कुकुरान्धकान् ।
**पापबुद्धिरुपातिष्ठत्स प्रविश्य ससम्भ्रमम् ।। ५६ ।।**

विशालराज्ञो दुहितां मम पित्रा वृतां सतीम् ।
**अनेन कृत्वा सन्धानं करूशेन जिहीर्षया ।।**
**जरासन्धं समाश्रित्य कृतवान्विप्रियाणि मे ।। ५७ ।।**

लक्षालङ्कारः-जिहीर्षया कन्यापहारेच्छया ।।

तानि सर्वाणि सङ्ख्यातुं न शक्नोमि धराधिपाः ।। ५८ ।।

एवमेतदपर्यन्तमेष वृष्णिषु किल्बिषी ।
**अस्माकमयमारम्भांश्चकार परमानृजुः ।। ५९ ।।**

लक्षालङ्कारः-परमानृजुः इत्यत्र परमश्चासौ अनृजुः वक्रश्चेति विग्रहः ।

शतं क्षन्तव्यमस्माभिः वधार्हाणां किलागसाम् ।
**बद्धोऽस्मि समयैर्घोरैः मातुलेयोऽस्य सङ्गरे ।। ६० ।।**(०१)

लक्षालङ्कारः-मातुलेयोऽस्य सङ्गर इत्यत्र अस्य मातुलेयः अहं सङ्गरे प्राप्ते सति वधार्हाणां आगसां शतं क्षन्तव्यमिति घोरैः समयैः बद्धोऽस्मीति योजना ।

तत्तथा शतमस्माकं क्षान्तं क्षयकरं मया ।
**द्वौ तु मे वधकालेऽस्मिन्न क्षन्तव्यौ कथञ्चन ।। ६१ ।।**

यज्ञविघ्नकरं हन्यां पाण्डवानां च दुर्हृदम् ।
**इति मे वर्तते भावः तमतीयां कथन्वहम् ।। ६२ ।।**

पितृष्वसुः कृते दुःखं सुमहन्मर्षयाम्यहम् ।
**दिष्ट्या हीदं सर्वराज्ञां सन्निधावद्य वर्तते ।। ६३ ।।**(०२)

---

वैशा (मा)ला, वै कन्यां, (४)नृशंसवत्,सक:,.
(०१) (२) मातुरस्यैव सङ्गरे
(०२) (१) पितृष्वसाकृते, ष्वस्रा, ष्वसृ, कथं (for कृते), (२)समयं (for सुमहन्), धर्ष (forमर्ष),

पश्यन्ति हि भवन्तोऽद्य मय्यतीव व्यतिक्रमम् ।
कृतानि तु परोक्षं मे यानि तानि निबोधत ।। ६४ ।।[०१]

इमं त्वस्य न शक्ष्यामि क्षन्तुमद्य व्यतिक्रमम् ।
अवलेपाद्वधार्हस्य समग्रे राजमण्डले ।। ६५ ।।[०२]

रुक्मिण्यामस्य मूढस्य प्रार्थनाऽऽसीन्मुमूर्षतः ।
न च तां प्राप्तवान्मूढः शूद्रो वेदश्रुतिं यथा ।। ६६ ।।[०३]

**वैशम्पायनः -**

एवमादि ततः सर्वे विस्तरेण नराधिपाः ।
गर्हणं शिशुपालस्य वासुदेवेन विश्रुताः ।। ६७ ।।[०४]

लक्षालङ्कारः-वासुदेवेन विश्रुता इत्यत्र विश्रुताः विशेषेण श्राविता इत्यर्थः ।

वासुदेववचश्शृत्वा प्राद्रवंत्सर्वपार्थिवाः ।
विहाय परमोद्विग्नाश्चेदिराजं चमूमुखे ।। ६८ ।।

रथोपस्थे धनुष्मन्तं शरान्संदधतं रुषा ।
श्रुत्वाऽपि च विलोक्याशु दुद्रुवुस्सर्वपार्थिवाः ।।

स तांस्तु विद्रुतान्सर्वान्साश्वपत्तिरथ द्विपान् ।

---

(३) दृष्ट्वा (for दिष्टचा), हीदं, (इ)दानीं, त्वद्य, त्वयं,चेंद (for त्विदं), महीपानां (लां),

(४) संनिधावत्यवर्तत, धाने प्रवर्तते, धावभ्यवर्तते,.

(०१) (१)पश्यंतो,पष्यंते, पश्यंतु,च, (इ)ह (for हि), (-)पि, (-)स्य (for (-)द्य),.(२)मह्चतीव, मया (for मय्यं ), (३)च (forतु), (४)न्यबोध तत् (forनिबोधत),

(०२)(१४) (१)इंद (for इमं), त्व (च)द्य (forत्वस्य), न शक्यामि,

(२)अस्य (for अद्य ),.(३)अबलेयाद्,अवतोपाद्,) (४)समीपे,समये (for समग्रे), समे राजस्य मंङ्ले, (१) क- कोशेइदमर्ध नास्ति.

(०३)(१५) (१)(२)तस्य (for अस्य), मूर्खं (for मूढ), रुक्मिण्यां प्रार्थना चासीदस्य पूर्व मुमूर्षतः,)

(३)चैनां (for च तां), मूर्षः, मूढे (forमूढः), (४)श्रतीव च, श्रतीमि (रि)व (for श्रुतिं यथा),.

(०४)(४)क- क्षाविताः (ख) विस्तृतम् । क- विश्रुताः ।.

तदा तद्वृष्णिवीरेण त्रासितानुरुविक्रमान् ।। ६९ ।।(०१)

लक्षालङ्कारः-तदा तद्वृष्णिवीरेण इत्यत्र स चासौ वृष्णिवीरश्च तद्वृष्णिवीरः तेन ।

कृष्णतेजोहतान्सर्वान्समीक्ष्य वसुधाधिपान् ।
शिशुपालो रथेनैकः प्रत्युपायात्स केशवम् ।।
रुषाताम्रेक्षणो राजन्शलभः पावकं यथा ।। ७० ।।

अस्मिन् पर्वणि ४४अध्याये ७०श्लोकाः सन्ति

शिशुपालवधपर्वणि(३) तृतीयोऽध्यायः

इति श्रीमहाभारते सभापर्वणि शिशुपालवधपर्वणि शिशुपालवृत्तान्तकथने चतुश्चत्वारिंशोऽध्यायः ।। ४४ ।।

# ४५.पञ्चचत्वारिंशोऽध्यायः

## 02- 05- 45

शिशुपालस्य दुर्निमित्तोत्पत्तिः ।। १ ।। नारदेन तत्तदुत्पातानां विशिष्य फलकथनम् ।। २ ।।

वैशम्पायनः

ततो युद्धाय सन्नद्धं चेदिराजं युधिष्ठिरः ।
दृष्ट्वा मतिमतां श्रेष्ठो नारदं समुवाच ह ।। १ ।।

युधिष्ठिरः

अन्तरिक्षे च भूमौ च न तेऽस्त्यविदितं क्वचित् ।
यानि राजविनाशाय भौमानि च खगानि च ।। २ ।।

निमित्तानीह जायन्ते उत्पाताश्च पृथग्विधाः ।

(०१)(३)क- कोश इदमर्धं नास्ति । क-दारितान् वृ ।.

एतदिच्छामि कार्त्स्न्येन श्रोतुं त्वत्तो महामुने ।। ३ ।।

वैशम्पायनः -

इत्येवं मतिमान्विप्रः कुरुराजस्य धीमतः ।
पृच्छतस्सर्वमव्यग्रमाचचक्षे महायशाः ।। ४ ।।

नारद

पराक्रमं च मार्गं च सन्निपातं समुच्छ्रयम् ।
आरोहणं कुरुश्रेष्ठ अन्योन्यप्रतिसर्पणम् ।। ५ ।।

लक्षालङ्कारः-पराक्रमं च मार्गं च इत्यत्र परस्याक्रमणं पराक्रमं, एकग्रहदशाऽसमाप्तौ ग्रहान्तरदशावाप्तिः । मार्गं वक्रावक्रगतिरूपमार्गम् । सन्निपातं पञ्चषडादिग्रहयोगम् । समुच्छ्रयं केन्द्राद्युच्चस्थानस्थितिम् । आरोहणं नीचस्थानादुच्चस्थानारोहणम् । अन्योन्यप्रतिसर्पणं ग्रहयोः परस्परयुद्धम् ।

रश्मीनां व्यतिसंसर्गं व्यायामं वृत्तिपीडनम् ।
दर्शनादर्शनं चैव अदृश्यानां च दर्शनम् ।। ६ ।।

लक्षालङ्कारः-रश्मीनां व्यतिसंसर्गं नीचोच्चग्रहयोरेकराशौ मेलनम् । व्यायामं कालक्षेपेण फलदानम् । पीडनं सद्यः पीडनम्। दर्शनादर्शनानां दृश्यन्त इति व्युत्पत्त्या दृश्यादृश्यग्रहाणां दर्शनादर्शनं दृश्यस्य बृहस्पत्यादेः अदर्शनं मौढ्यसञ्ज्ञितं, अदृश्यस्य राह्वादेश्चन्द्रोपरागादौ दर्शनम् ।

हानिं वृद्धिं च ह्रासं च वर्णस्थानं बलाबलम् ।
सर्वमेतत्परीक्षेत ग्रहाणां ग्रहकोविदः ।। ७ ।।

लक्षालङ्कारः-हानिं हान्याख्यफलदत्वम् । वृद्धिं वृद्धिफलदत्वम् । ह्रासं व्ययफलदत्वम्। वर्णस्थानं बृहस्पतियोगे ब्राह्मणानां, अङ्गारकयोगे क्षत्रियाणां, शनैश्चरादिग्रहयोगे वैश्यशूद्राणां फलं; उपरागादेः श्वेतिम्नि ब्राह्मणानां, रक्तिम्नि क्षत्रियाणां, पीतिम्नि वैश्यानां, नीलिम्नि शूद्रादीनां फलं वा; कस्यचिद्ग्रहस्य श्वेतवर्णं वस्त्रपुष्पादिकं, कस्यचिद्रक्तं, कस्यचित्पीतं, कस्यचिन्नीलमिति वा वर्णस्थानम् । बलाबलं ग्रहाणां प्राबल्यं दौर्बल्यं च ।

भौमाः पूर्वं प्रवर्तन्ते खेचराश्च ततः परम् ।
उत्पद्यन्ते च लोकेऽस्मिन्नुत्पाता देवनिर्मिताः ।। ८ ।।

लक्षालङ्कारः-उत्पाद्यन्ते च लोकेऽस्मिन् इत्यत्र अरिष्टकाले अकस्मादुत्पाद्यन्त इत्युत्पाता इत्यर्थः ।

यदा तु सर्वभूतानां छाया न परिवर्तते ।
अपरेण गते सूर्ये तत्पराभवलक्षणम् ।। ९ ।।

अच्छाये विमलच्छाया प्रतिच्छायेव लक्ष्यते ।
यत्र चैत्यकवृक्षाणां तत्र विद्यान्महद्भयम् ।। १० ।।

लक्षालङ्कारः-अच्छाये विमलच्छाया इत्यत्र यत्र चैत्यकवृक्षाणाम् अच्छाये छायाया अयोग्ये स्थले विमला छाया, प्रतिच्छाया सूर्यादीन् प्रत्येव च्छाया ।

शीर्णपर्णप्रवालाश्च शुष्कपर्णाश्च चैत्यगाः ।
अपभ्रष्टप्रवालाश्च तत्राभावं विनिर्दिशेत् ।। ११ ।।(०१)

लक्षालङ्कारः-शीर्णपर्णप्रवाला इत्यत्र शीर्णपर्णाः पतितपर्णाः प्रवालाः पल्लववच्छोभमानाः, चैत्यगाः वृक्षगाः पर्णाश्च अपभ्रष्टप्रवालाः अपगतप्रवालाः शुष्कपर्णा एव दृश्यन्ते,तत्र भावम् उत्पातसद्भावम् ।

स्निग्धपत्रप्रवालाश्च दृश्यन्ते यत्र चैत्यकाः ।
हीयमानाश्च दृष्टाश्च भावस्तत्र न संशयः ।। १२ ।।(०२)

लक्षालङ्कारः-हीयमानाः क्षीयमाणा वृक्षाः स्निग्धपत्रप्रवाला दृश्यन्ते ।

पुष्पे पुष्पं प्रजायेत फले वा फलमाश्रितम् ।
राजा वा राजमात्रो वा मरणायोपपद्यते ।। १३ ।।

प्रावृट्छरदि हेमन्ते वसन्ते वाऽपि सर्वशः ।

(०१) (२) चैत्यकाः
(०२) (१)क- पकृष्टाश्च । क- मृष्टाश्च । क-नमितोऽपि वा ।.

अकालजं पुष्पफलं राष्ट्रक्षोभं विनिर्दिशेत् ।
नदीनां स्रोतसोऽकाले द्योतयन्ति महाभयम् ।। १४ ।।

वनस्पतिः पूज्यमानः पूजितोऽपूजितोऽपि वा ।
यदा भज्येत वातेन भिद्यते नमतेऽपि वा ।। १५ ।।

लक्षालङ्कारः-वनस्पतिः पूज्यमान इत्यत्र अपूजितः पूजार्थं सङ्कल्पितः पूजामप्राप्तश्चेत्यर्थः।

अग्निवायुभयं विद्याच्छ्रेष्ठो वापि विनश्यति ।
दिशस्सर्वाश्च दीप्यन्ते जायन्ते राजविभ्रमाः ।। १६ ।।

भिद्यमानो यदा वृक्षो विनदेच्चापि पातितः ।
सह राष्ट्रं च पतितं न तं वृक्षं प्रपातयेत् ।। १७ ।।

लक्षालङ्कारः-न तं वृक्षं निपातयेत् इत्यत्र तं वृक्षं वृक्षान्तरे शिलया वा प्रतिरुद्धं दण्डरज्ज्वाद्युपायेन (न) पुनर्निपातयेदित्यर्थः ।

अथैनं छेदयेत्कश्चित्प्रतिक्रुद्धो वनस्पतिम् ।
छेत्ता भेत्ता पतिश्चैव क्षिप्रमेव विनश्यति ।। १८ ।।

लक्षालङ्कारः-अथैनं छेदयेत् इत्यत्र एनं वृक्षं छेदयेत् पातार्थं मध्ये छेदयेत्, इन्धनार्थं वा छेदयेदित्यर्थः ।

देवतानां च पतनं मण्डपानां च पातनम् ।
अचलानां प्रकम्पश्च तत्पराभवलक्षणम् ।। १९ ।।(०१)

लक्षालङ्कारः-दैवतानां च पतनम् इत्यत्र उत्सवे उदूह्य नीयमानानां देवानां पतनम् ।

निशि चेन्द्रधनुर्दृष्टं ततोऽपि च महद्भयम् ।।
तद्द्रष्टुरेव भीतिस्स्यान्नान्येषां परिवर्जयेत् ।। २० ।।(०२)

---

(०१) (२) धुष्टनम्
(०२) (१)क- द्वेष्ट्वा तद्राष्ट्रं परिवर्जयेत् ।.

रात्राविन्द्रधनुर्दृष्वा तद्राष्ट्रंपरिवर्जयेत् ।। २१ ।।

देवता यत्र नृत्यन्ति नदन्ति च हसन्ति च ।
उन्मीलन्ति निमीलन्ति राष्ट्रक्षोभं विनिर्दिशेत् ।। २२ ।।

लक्षालङ्कारः-देवताः देवालयान्तस्स्थितदेवाः ।

शिला विकृतं प्रसिश्चत् स्नेहांश्चोदकसम्भवान् ।
अन्यद्वारि भयं किञ्चित् तद्भयस्य निदर्शनम् ।। २३ ।।(०१)

लक्षालङ्कारः-अन्यद् वारिभयम् इत्यत्र वारि उदके अन्यत् किञ्चित् भयं भयङ्कररक्तबुद्बुदादिकम् ।

म्रियते वा महामात्रो राजा सपरिवारकः ।
पुरस्य वा भवेव्द्याधी राष्ट्रे देशेच विभ्रमाः ।। २४ ।।
देवतानां यदाऽऽवासे राज्ञां वा यत्र वेश्मनि ।।
भाण्डागारायुधागारे निविशेत यदा मधु ।
सर्वं तद्दाहयेत्स्थानं हन्यमानं बलीयसा ।। २५ ।।(०२)
आगन्तुकं भयं तत्र भवोदित्येव निर्दिशेत् ।। २६ ।।
पादपश्चैव यो यत्र रक्तं स्रवति शोणितम् ।
दन्ताग्रात्कुञ्जरो वाऽपि शृङ्गाद्वा वृषभस्तथा ।। २७ ।।

पादपाद्राष्ट्रविभ्रंशः कुञ्जराद्राजविभ्रमः ।
गोब्राह्मणविनाशस्स्याद्वृषभस्येति निर्दिशेत् ।। २८ ।।

छत्रं नरपतेर्यस्य निपतेत्पृथिवीतले ।
सराष्ट्रो नृपती राजन्क्षिप्रमेव विनश्यति ।। २९ ।।

---

(०१) (४) तत् पराभवलभणम् ।.
(०२) (३)क- तदा भवेत् ।.

देवागारेषु वा यत्र राज्ञो वा यत्र वेश्मनि ।
विकृतं यदि दृश्येत नागावासेषु वा पुनः ।। ३० ।।

लक्षालङ्कारः-विकृतं यदि दृश्येत इत्यत्र विकृतं रावणहस्ताद्याकारेण जायमानो मृद्विकारः ।

तस्य देवस्य पीडा स्याद्राज्ञो जनपदस्य वा ।
अनावृष्टिभयं घोरं दुर्भिक्षमिति निर्दिशेत् ।। ३१ ।।

बाहुभङ्गे तु देवानां गृहस्थानां भयं भवेत् ।
भग्ने प्रहरणे विद्यात्सेनापतिविनाशनम् ।। ३२ ।।

आगन्तुका च प्रतिमा स्थानं यत्र न विन्दति ।
अभ्यन्तरेण षण्मासाद्राजा त्यजति तत्पुरम् ।। ३३ ।।

प्रदीर्यते मही यत्र विनदत्यपि पात्यते ।
म्रियते यत्र राजा च तच्च राष्ट्रं विनश्यति ।। ३४ ।।

श्रेणीपदान्वा सर्पान्वा डुण्डुभानथ दीपकान् ।
मण्डूको ग्रसते यत्र तत्र राजा विनश्यति ।। ३५ ।।(०१)

लक्षालङ्कारः-श्रेणीपदान् इत्यत्र श्रेणीभूतबहुपादयुक्ताः प्राणिनः। 'चेरटे' इत्यपभ्रंशभाषा। दीपकान् तमसि दीपाकारेण ज्वलमानान् खद्योतान् सरीसृपप्राणिविशेषान् वा। 'सण्णजिरि' इत्यपभ्रंशभाषा ।

अभिन्नं वाऽप्यपक्वं वा यत्रान्नमुपवीयते ।
जीर्यन्ते वा म्रियन्ते वा तदन्नं नोपभुञ्जते ।। ३६ ।।

लक्षालङ्कारः-अभिन्नं वाऽप्यपक्वं वा इत्यत्र अभिन्नं वा पाकेन तण्डुलेषु विदारणरहितं वा, अपक्वं वा पाकरहितं वा, यत्र भाण्डे, अन्नम् उपचीयते अभिवर्धते । ते तण्डुलाः जीवन्ते वा तण्डुलीभावेनैव तिष्ठन्ति वा, म्रियन्ते वा तण्डुलीभावं त्यक्त्वा हस्तेन स्पर्शे सति चूर्णीभवन्ति

---

(०१) (१) एणीपदान् (२) दीप्यकान्

वेत्यर्थः ।

उदपाने च यत्रापो विवर्धन्ते युधिष्ठिर ।
**स्थावरेषु प्रवर्तन्ते निर्गच्छेयुः पुनस्ततः ।। ३७ ।।**(०१)

लक्षालङ्कारः- उदपाने च यत्र इत्यत्र 'पुंस्येवान्धुः प्रहिः कूपमुदपानं तु पुंसि वा' इत्यभिधानात् उदपाने कूपे । ततः कूपान्निर्गच्छेयुः । स्थावरेषु भूप्रदेशेषु प्रवर्तन्ते च ।

अपादं वा त्रिपादं वा द्विशीर्षं वा चतुर्भुजम् ।
**स्त्रियो यत्र प्रसूयन्ते ब्रूयात्तत्र पराभवम् ।। ३८ ।।**

हस्तिनी महिषी गौर्वा खराष्ट्रमथ सूकरम् ।
**ईदृशानि प्रजायन्ते विद्यात्तत्र पराभवम् ।। ३९ ।।**

अजैडकास्त्रियो गावो ये चान्ये च वियोनयः ।
**विकृतानि प्रजायन्ते तत्र तत्र पराभवः ।। ४० ।।**

लक्षालङ्कारः-विकृतानि प्रजायन्त इत्यत्र विकृतानि यथा भवन्ति तथा प्रजाकारेण जायन्ते ।

नदी यत्र प्रतिस्रोता आवहेत्कलुषोदकम् ।
**दिशश्च न प्रकाशन्ते तत्पराभवलक्षणम् ।। ४१ ।।**

एतानि च निमित्तानि यानि चान्यानि भारत ।
**केशवादेव जायन्ते भौमानि च खगानि च ।। ४२ ।।**

चन्द्रादित्यौ ग्रहाश्चैव नक्षत्राणि च भारत ।
**वायुरग्निस्तथैवापः पृथिवी च जनार्दनात् ।। ४३ ।।**

यस्य देशस्य हानिं वा वृद्धिं वा कर्तुमिच्छति ।
**तस्मिन्देशे निमित्तानि तानि तानि करोत्ययम् ।। ४४ ।।**

---

(०१) (२) निर्गच्छेच्च

योऽसौ चेदिपतेस्तात विनाशस्समुपस्थितः ।
**निवेदयति गोविन्दः स्वैरुपायैर्न संशयः ।। ४५ ।।**

लक्षालङ्कारः-योऽसौ चेदिपतेस्तात इत्यत्र विनश्यत्यनेनेति विनाशो गोविन्दः तत् विनाशसूचकदुर्निमित्तम् ।

इयं प्रचलिता भूमिः अशिवं वान्ति मारुताः ।
**राहुश्चाप्यपतत्सोमः अपर्वणि विशाम्पते ।। ४६ ।।**

सनिर्घाताः पतन्त्युल्काः तमस्सञ्जायते भृशम् ।
**चेदिराजविनाशाय हरिरेष विजृम्भते ।।**

वैशम्पायनः -

**एवमुक्त्वा तु भगवान्नारदो विरराम ह ।। ४७ ।।**

ताभ्यां पुरुषसिंहाभ्यां तस्मिन्युद्ध उपस्थिते ।
**ददृशुर्भूमिपालास्ते घोरानौत्पातिकान्बहून् ।। ४८ ।।**

तत्र तैर्दृश्यमानानां दिक्षु सर्वासु भारत ।
**अश्रूयन्त तदा राजन्शिवानामशिवा गिरः ।। ४९ ।।[०१]**

ररास च मही कृत्स्ना सवृक्षवनपर्वता ।
**अपर्वणि च मध्याह्ने सूर्यं स्वर्भानुरग्रसत् ।। ५० ।।[०२]**

लक्षालङ्कारः-ररास च मही कृत्स्ना इत्यत्र ररास 'रसी उद्वेगे' इति धातोः तत्रास त्रस्ता जाता ।

ध्वजाग्रे चेदिराजस्य सर्वरत्नपरिष्कृते ।
**अपतत्खाच्युतो गृध्रः तीक्ष्णतुण्डः परन्तप ।। ५१ ।।**

**आरण्यैस्सहसा हृष्टा ग्राम्याश्च मृगपक्षिणः ।**

---

(०१) (१)क-सततं वाश्यमानानां ।.

(०२)(२)क-तृण क-कुल ।.

चुक्रुशुर्भैरवं तत्र तस्मिन्युद्ध उपस्थिते ।। ५२ ।।

एवमादीनि घोराणि भौमानि च खगानि च ।।
औत्पातिकान्यदृश्यन्त सङ्क्रुद्धे शार्ङ्गधन्वनि ।। ५३ ।।

अस्मिन् पर्वणि ४५अध्याये ५३श्लोकाः सन्ति

शिशुपालवधपर्वणि(४) चतुर्थोऽध्यायः

इति श्रीमहाभारते सभापर्वणि शिशुपालवधपर्वणि शिशुपालवृत्तान्तकथने पञ्चचत्वारिंशोऽध्यायः ।। ४५ ।।

# ४६. षट्चत्वारिंशोऽध्यायः

## 02- 05- 46

श्रीकृष्णशिशुपालयोर्युद्धवर्णनम् ।। १ ।। शिशुपालवधः ।। २ ।।

महद्विष्फारयन् राजा ततश्चेदिपतिर्धनुः ।
अभियास्यन्हृषीकेशमुवाच मधुसूदनम् ।। १ ।।

शिशुपालः-

एकस्त्वमसि मे शत्रुस्तं त्वां हत्वाद्य माधव ।
ततस्सागरपर्यन्तां पालयिष्यामि मेदिनीम् ।। २ ।।

द्वैरथं काङ्क्षितं यद्वैतदिदं पर्युपस्थितम् ।।
चिरस्य बत मे दिष्ट्या वासुदेव सह त्वया ।
अद्य त्वां निहनिष्यामि भीष्मं च सहपाण्डवैः ।। ३ ।।

लक्षालङ्कारः-द्वैरथं काङ्क्षितम् इत्यत्र द्वौ रथौ ययोस्तौ द्विरथौ तयोर्भावः द्वैरथं द्वन्द्वयुद्धमित्यर्थः ।

वैशम्पायनः-

एवमुक्त्वा स तं बाणैर्निशितैरात्ततैजनैः ।
विव्याध युधि तीक्ष्णाग्रैश्चेदिराड्यदुपुङ्गवम् ।। ४ ।।

कङ्कपत्रच्छदा बाणाश्चेदिराजधनुश्च्युताः ।
विविशुस्ते तदा कृष्णं भुजङ्गा इव पर्वतम् ।। ५ ।।

नारदानस्य चैद्यस्य शरानप्यस्यतोऽपि वा ।
ददृशुस्त्वन्तरं केचिद्गतिं वायोरिवाम्बरे ।। ६ ।।

चेदिराजमहामेघश्शरजालाम्बुमां स्तदा ।
अभ्यवर्षद्धृषीकेशं पयोद इव पर्वतम् ।। ७ ।।

ततश्शार्ङ्गममित्रघ्नः कृत्वा स शरमच्युतः ।
आबभाषे महाबुहुस्सुनीतं परवीरहा ।। ८ ।।

अयं त्वां मामकस्तीक्ष्णश्चेदिराज महाशरः ।
भेत्तुमर्हति वेगेन महाशनिरिवाचलम् ।। ९ ।।

एवं ब्रुवति गोविन्दे ततश्चेदिपतिः पुनः ।
मुमोच निशितानन्यान्कृष्णं प्रतिशरान्बहून् ।। १० ।।

अथ बाणार्दितः कृष्णश्शार्ङ्गमायम्य दीप्तिमान् ।
मुमोच निशितान्बाणान्शतशोऽथ सहस्रशः ।। ११ ।।

तान्शरांस्तु स चिच्छेद शरवर्षैस्तु चेदिराट् ।
षट्छरैश्च जघानाशु केशवं चेदिपुङ्गवः ।। १२ ।।

ततोऽस्त्रं शतथा कृष्णः प्रमुमोच जगत्पतिः ।
अस्त्रेण तन्महाबाहुर्वारयामास चेदिराट् ।। १३ ।।

ततश्शरसहस्रेण शराणां नतपर्वणाम् ।
सर्वतस्समवाकीर्य शौरिं दामोदरं तदा ।। १४ ।।

ननाद बलवान्क्रुद्धः शिशुपालः प्रतापवान् ।
इदं चोवाच संरब्धः केशवं परवीरहा ।। १५ ।।

शिशुपालः-

अद्य ते मामका बाणा नेष्यन्ति तव संयुगे ।
हत्वा त्वां ससुतामात्यान्पाण्डवांश्च तपस्विनः ।। १६ ।।(०१)

लक्षालङ्कारः-अद्य त इत्यत्र ते मामका बाणाः नेष्यन्ति यमलोकं प्रापयिष्यन्ति ।

आवृण्यमद्य यास्यामि जरासन्धस्य धीमतः ।
कंसस्य केशिनश्चैव नरकस्य तथैव च ।। १७ ।।

इत्युक्त्वा क्रोधताम्राक्षश्शिशुपालो जनार्दनम् ।
अदृश्यं शरवर्षेण सर्वस्स चकारह ।। १८ ।।

ततोऽस्त्रेणैव भगवान्निकृत्य च शरान्बहून् ।
शरवर्षैस्तथा चैद्य मन्तर्धातुं प्रचक्रमे ।। १९ ।।

अन्तर्धानगतौ वीरौ शुशुभा ते महारथौ ।। २० ।।

तौ दृष्ट्वा सर्वभूतानि साधुसाध्वित्यपूजयन् ।
न दृष्टपूर्वमस्माभिर्युद्धमीदृशकं पुरा ।। २१ ।।
इति सर्वाणि भूतानि जजस्पुस्तत्र भारत ।।

ततः कृष्णं जघानाशु शिशुपालस्त्रिभिश्शरैः ।
कृष्णोऽपि बाणैर्विव्याध सुनीथं पञ्चभिर्युधि ।
ततस्सुनीथं सप्तत्या नाराचैरर्दयद्बली ।। २२ ।।

ततोऽतिविद्धः कृष्णेन सुनीथः क्रोधमूर्छितः ।
विव्याध निशितैर्बाणैर्वासुदेवं स्तनान्तरे ।। २३ ।।

---

(०१) अद्याङ्गं मामका बाणा खेत्स्यन्ति -पां

पुनः कृष्णं त्रिभिर्विध्वास ननाद भृशं नृपः ।। २४ ।।

ततोऽतिदारुणं युद्धं सहसा चक्रतुश्शरैः ।
तौ नखैरिव शार्दूलौ दन्तैरिव गजोत्तमौ ।। २५ ।।

दंष्ट्रैरिव तु सञ्चास्यौ तुण्डकैरिव कुक्कुटौ ।
वारयेतां शरैस्तीक्ष्णैरन्योन्यं युधि तावुभौ ।
ततो मुमुचतुः क्रुद्धौ शरवर्षमनुत्तमम् ।। २६ ।।

शरैरेव शराञ्छित्वा तावुभौ पुरुषर्षभौ ।
चक्रातेऽस्त्रमयं युद्धं घोरं तदतिमानुषम् ।। २७ ।।

आग्नेयमस्त्रं मुमुचे शिशुपालः प्रतापवान् ।
वारुणास्त्रेण तच्छीघ्रं नाशयामास केशवः ।। २८ ।।

कौबेरमस्त्रं सहसा चेदिराट्प्रमुमोच ह ।
कौबेरेणैव सहसानाशयत्तज्जगत्प्रभुः ।। २९ ।।

याम्यमस्त्रं ततः क्रुद्धो मुमुचे कालमोहितः ।
याम्यैनैवास्त्रयोगेन याम्यमस्त्रं व्यनाशयत् ।। ३० ।।

गन्धर्वेण च गान्धर्वं मानवं मानवेन च ।
वायव्येन च वायव्यं रौद्रं रौद्रेण चाभिभूः ।। ३१ ।।

ऐन्द्रमैन्द्रेण भगवान्वैष्णवेन च वैष्णवम् ।
एवमस्त्राणि कुर्वाणौ युयुधाते महाबलौ ।। ३१ ।।

ततो मायां विकुर्वाणो दमघोषसुतो बली ।
गदामुसलसंयुक्तां च्छक्तितोऽमरसायकान् ।। ३२ ।।

परश्वथमुसुण्ठीश्च ववर्ष युधि केशवम् ।
अमोघास्त्रेण तद्वर्षं नाशयामास केशिहा ।। ३३ ।।

शिलावर्षं महाघोरं ववर्ष युधि चेदिराट् ।
**वज्रास्त्रेणाभिसङ्क्रुद्धश्चूर्णं तदकरोत्प्रभुः ॥ ३४ ॥**

जलवर्षं ततो घोरं व्यसृजच्चेदिपुङ्गवः ।
**वायव्यास्त्रेण भगवान्व्याक्षिपतच्छतशो हि तत् ॥ ३५ ॥**

निहत्य सर्वमायां वै सुनीथस्य जनार्दनः ।
**स मुहूर्तं चकाराशु द्वन्द्वयुद्धं महारथः ॥ ३६ ॥**

स बाणयुद्धं कुर्वाणो भर्त्सयामास चेदिराट् ।
**दमघोषसुतो धृष्टमुवाच यदुन्दनम् ॥ ३७ ॥**

आद्यतृष्णमकृष्णं तु कुर्वन्तु मम सायकाः ॥ ३९ ॥

इत्येवमुक्तवा दुष्टात्मा शरवर्षं जनार्दने ।
**मुमोच पुरुषव्याघ्रो घोरं वै चेदिपुङ्गवः ॥ ४० ॥**

शरसङ्कृत्तगात्रस्तु क्षणेन यदुनन्दनः ।
**रुधिरं परिसुस्राव मदं मत्तइव द्विपः ॥ ४१ ॥**

लक्षालङ्कारः-रुधिरं परिसुस्राव इत्यत्र अति अतिशयेन रुधिरं परिसुस्रावेव ।

न यन्ता न रथो वापि न चाश्वाः पर्वतोपमाः ।
**दृश्यन्तो शरसञ्छन्नाः केशवस्य महात्मनः ।**
**केशवं तदवस्थं तु दृष्ट्वा भातानि चुक्रुशः ॥ ४२ ॥**

दारुकस्तु तदा प्राह कृष्णं यादवनन्दनम् ।

दारुकः-

**नेदृशो दृष्टपूर्वो हि सङ्ग्रामो वै पुरा मया ॥ ४३ ॥**

स्थातव्यमिति तिष्ठामि त्वत्पदावेन माधव ।
**अन्यधा न च मे प्राणातिष्ठंत्येव जनार्दनष ॥ ४४ ॥**

अतस्सञ्चिन्त्य गोविन्द क्षिप्रमस्य वधं कुरु ।

वैशम्पायनः-

एष ह्यतिबलो दैत्यो हिरण्यकशिपुः पुरा ।
रिपुस्सुराणामभवद्वरदानेन गर्वितः ॥ ४६ ॥

तथायं रावणो नाम राक्षसोह्येष वीर्यवान् ।
तेनैव बलवीर्येण बलं नागणयन्मम ॥ ४७ ॥

अहं मृत्युश्च भविता काले काले दुरात्मनः ।
न भेतव्यं त्वया सूत नैषु चिन्मयि तस्थिरे ॥ ४८ ॥(०१)

लक्षालङ्कारः-नैषु चिन्मयि तस्थिर इत्यत्र ये शराः मयि तस्थिरे (एषु) तेषां मध्ये चित् कश्चिदिषुः मयि न। असुरजनमोहनार्थं शरविद्ध इव अहमभवम्।

इत्येवमुक्त्वा भगवान्ननर्द गरुडध्वजः ।
पाञ्चजन्यं महाशङ्खं पूरयामास केशवः ॥ ४९ ॥

सम्मोहयित्वा भगवान्चक्रं दिव्यं समादधे ।
चिच्छेद च सुनीथस्य शिरश्चक्रेण संयुगे ॥ ५० ॥

लक्षालङ्कारः-चिच्छेद च सुनीथस्य इत्यत्र सुनीथस्य पश्यतः सतः चैद्यस्य शिरः चिच्छेदेत्यर्थः।

वासुदेववचः श्रुत्वा चेदिराजं व्यगर्हयन् ।(०२)
गर्हणां शिशुपालस्य वासुदेवेन श्राविता ।(०३)
रथोपस्थे धनुष्मन्तं शरान्संदधतं रुषा ।(०४)

---

(०१) (२) नैष कश्चिन्मयि स्थिते
(०२) (२)विस्तरेण (for सहि), नरर्षभा, नराधिकाः, धिपाः),.
(०३)( शुश्रुवुः विश्रुतां (S. श्रीविताः).
(०४) व्यगर्हयत्, चेगिराजमगर्हयन्, प्राद्रवन्सर्वपर्थिवाः श्रुत्वापि च विलोक्याशु दुद्रुवुः सर्वपार्थिवाः,.

तस्य तद्वचनं श्रुत्वा शिशुपालः प्रतापवान् ।
जहास स्वनवद्धासं वाक्यं चेदमुवाच ह ।। (०१)
मत्पूर्वां रुग्मिमणीं कृष्ण संसत्सु परिकीर्तयन् ।
विशेषतः पार्थिवेषु व्रीडां न कुरुषे कथम् ।। (०२)
मन्यमानो हि कः सत्सु पुरुषः परिकीर्तयेत् ।
अन्यपूर्वां स्त्रियं जातु त्वदन्यो मधुसूदन ।(०३)
क्षम वा यदि ते श्रद्धा मा वा कृष्ण मम क्षम ।
क्रुद्धाद्वापि प्रसन्नाद्वा किं मे त्वत्तो भविष्यति ।(०४)

स पपात महाबाहुर्वज्राहत इवाचलः ।। ५१ ।।
एवमुक्तस्तु सूतेन केशवो वाक्यमब्रवीत् ।

आगच्छन्तं तु हष्ट्वा शिशुपालं स दुर्मतिम् ।
पार्श्वस्थं चक्रमादाय प्रेषयन्स दुरात्मनि ।
अपराधशतं तस्य क्षमित्वालोक्य सर्वशः ।
उदपात्रमुपालभ्य चक्रार्थ च तदानघ ।
तप्तचामाकराभासं क्षिप्तं तस्यैव दुर्मतेः ।
चक्रं च तत्कृष्णाकरप्रभासं
जहार पृथिव्यां पतितं सकुण्डलं

---

(०१) (१)तस्य (for ततस्), (२)चेदिराजः (forशिशु), (३)जहार (forस), सस्वनं (for स्वनवद्), (४)वाक्यं चेदम्, प्रहस्यैनम् (forप्रहस्येदम्),.

(०२) (१)मत्पुजां, मत्पूर्व,मत्पूर्वा,रुक्मिणी, कृष्णां, (२)सत्सु संपरिकीर्तयन्,.

(०३) (१)व्रीड,मन्य,कः साधु, संसत्सु (for कः सत्सु), (२)परिकीर्तयन्, (३)पुजां (for पूर्वा), जानन् (forजात्),.

(०४) (१)क्षमा वा, क्षमतां, क्षमं वा, वा (forते), (२)न (forमा), या (forवा), क्षमा, मः (forम), यमक्षयं (मम क्षयं), (३)क्रुद्धाद्यपि प्रसन्नद्या, (४)त्वत्तो मे, २१,पेज नंबर २०३ में २१ श्लोक को सर्च करो,.

हा हेति शब्दः समभूत्सभायाम् ।

तथा ब्रुवत एवास्य भगवान्मधुसूदनः ।

व्यपाहरच्छिरः कुद्धश्चक्रेणामित्रकर्षणः ।

स पपात महाबाहुर्वज्राहत इवाचलः ।

मनसाचिन्तयच्चक्रं दैत्यवर्गनिषूदनम् ।। (०१)

एतस्मिन्नेव काले तु चक्रे हस्तगते सति ।

उवाच भगवानुच्चैर्वाक्यं वाक्यविशारदः ।।

शृण्वन्तु मे महीपाला येनैतत्क्षमितं मया ।

अपराधशतं क्षाम्यं मातुरस्यैव याचने ।।(०२)

दत्तं मया याचितं च तानि पार्थिवपूर्णानि पार्थिवाः ।(०३)

अधुना वधयिष्यामि पश्यतां वो महीक्षिताम् ।।(०४)

एवमुक्त्वा यदुश्रेष्ठश्चेदिराजस्य तत्क्षणात् ।(०५)

ततश्चेदिपतेर्देहात्तेजोऽग्र्यं ददृशुर्नृपाः ।।

उत्पतन्तं महाराज सुवोऽन्तादिव भास्करम् ।। ५२ ।।(०६)

लक्षालङ्कारः-सुवोऽन्तात् इत्यत्र सुवः स्वर्लोकस्य अन्तात् मध्यात् ।

---

(०१) (१), चिंतयामास (for (अ) चिन्तयच्चक्रं), संध, सिंह (for वर्ग),.

(०२) याचते, याचते, .

(०३) तदा चास्मै,याचितानि (for याचितं च) पूर्णं हि ,तानि पूर्णानि (for तद्वै पूर्णै हि) पापिने (for पार्थिने (for पार्थिवाः).

(०४) वध (forमार), अनास्य च वधिष्यामि

(०५) ततः कृष्ण (for यदुश्रेष्ट), तत्क्षणं (for णात्), (३)(४)कृष्णाश् (for क्रुद्धश्) अमीव (for अमित्र) कर्शनः (forकर्षणः), चिच्छेद च सुनीथस्य शिरश्चक्रेण संयुगे) ६.वज्रहत, परः (for चलः),.

(०६) (१)वीरात् (for दोहात्) (२)व्यदहशुर् (for -ग्रयं दहशुर्) (-) ग्निं (for (-)रयं), (३) उत्पतत्त (तंत)त्, उत्पतत्तु, उत्पपात (for उत्पतन्तं) तदा राजन् (for महाराज) (४)घमांतादि (वि)व भास्करं, सुवांताद् (for गगनाद्).

ततः कमलपत्राक्षं कृष्णं लोकनमस्कृतम् ।
स्तुत्यं त्रैलोक्यवन्द्यं तमस्तोतारमजं विभुम् ।
ववन्दे तत्तदा तेजो विवेश च नराधिप ।। ५३ ।।(०१)

तदद्भुतममन्यन्त दृष्ट्वा सर्वे महीक्षितः ।
यद्विवेश महाबाहुं तत्तेजः पुरुषोत्तमम् ।। ५४ ।।(०२)

लक्षालङ्कारः-तेजः ज्येतिर्मयस्य जयस्य देहात्मकं तेजः ।।

अनभ्रे प्रववर्ष द्यौः पपात ज्वलिताशनिः ।
कृष्णेन निहते चैद्ये चचाल च वसुन्धरा ।। ५५ ।।(०३)

ततः केचिन्महीपाला नाब्रुवंस्तत्र किञ्चन ।
अतीतवाक्पथे काले प्रेक्षमाणा जनार्दनम् ।। ५६ ।।(०४)

हस्तैर्हस्ताग्रमपरे प्रत्यपिंषन्नमर्षिताः ।
अपरे दशनैरोष्ठानदशन्क्रोधमूर्च्छिताः ।। ५७ ।।(०५)

लक्षालङ्कारः-हस्तैर्हस्ताग्रम् इत्यत्र प्रत्यपिक्षन् पेषणं कृतवन्तः ।

रहश्च केचिद्वार्ष्णेयं प्रशशंसुर्नराधिपाः ।

---

(०१) (३)ववंद, उपायात् (for ववन्दे), तं, च (for तत्), महा (for तदा),उपावर्तत तत्तेजा),
(४)नरोत्तमं, नराधिप, जनाधिप,.

(०२) (१)तम् (fortद्), अमन्यंत, महाराज, तदद्भुतं च दहशुः, तदद्भुततममन्य, तदद्भुततमम हष्ट्वा),
(२)सर्व), सर्व एव मही, गगनादिव भास्करं, (३)महाबाहु,.

(०३) (१)अनाभ्रा,अनभ्रैस्तु प्रवर्षद्भिः, भ्रे पर्वर्षद्यौः, भ्रेशु ववर्श द्यौः, (२)ज्वलितोशनिः, सलिलाशनिः,
(३)हि हते, (अ) भिहते (for नि),.

(०४) (१)सर्वे (forकेचिन्), महीपालान्, (२)अबुनंस् (for ना), केचन (forकिं),
(३)अतीत्य, अतीते, अतीव (for अतीत),वाक्यदे, बांधवे (व,),तदा (तत), तथा) संक्रुदिधमनसः (सा), (४)प्रेक्षमाणं,

(०५) (१)हस्ते हस्ता, हस्ते हस्तं स्वमपरे, (२)प्रत्यपिषन्, पेषन्, पिंषन्, पिपुषुश्रान्, पिपिशुश्राप्य्, प्रत्यर्पि (पीं) क्षन्, वीक्षन्, प्रत्यपिक्षन्, नराधिपा), अमर्शणाः, षिंः, नरर्षाभाः (for अमर्षिताः),
(३)ओष्टं (forओष्टान्), (४)ददंशुः (for अदशन्), म्च्छितः,.

केचिदेव सुसंरब्धा मध्यस्थास्त्वपरेऽभवन् ।। ५८ ।।[०१]

ये देवगन्धर्वगणा राजानो भुवि विश्रुताः ।[०२]
ते प्रणामं हृषीकेशे प्रकुर्वन्ति महात्मनि ।। ५९ ।।[०३]

ये त्वासुरगणान्पक्षान्सम्भूताः क्षत्रिया इह ।[०४]

ते निन्दन्ति हृषीकेशं दुरात्मानो गतायुषः ।। ६० ।।[०५]
प्रजापतिगणा ये तु मध्यस्थाश्च महात्मनि ।। ६१ ।।[०६]

लक्षालङ्कारः-प्रजापतिगणा इत्यत्र प्रजापतिगणाः ब्रह्मादिप्रजापतीनां गणाः ।

ब्रह्मर्षयश्च सिद्धाश्च गन्धर्वोरगचारणाः ।[०७]
केचित्स्तुवन्ति गोविन्दं दिव्यैर्मङ्गलसंयुतैः ।। ६२ ।।[०८]

परस्परं च नृत्यन्ति गीतेन विविधेन च ।[०९]
उपतिष्ठन्ति गोविन्दं प्रीतियुक्ता महात्मनि ।। ६३ ।।[१०]
प्रहृष्टाः केशवं जग्मुः संस्तुवन्तो महर्षयः ।
ब्राह्मणाश्च महात्मानः पार्थिवाश्च महाबलाः ।। ६४ ।।[११]

---

(०१) (१)रहक्ष, रहस्यं (स्या), न ह स्म (for रहस्तु), (२)महारथाः, नरर्षभाः (for मराधिपाः), (३)सुसंरव्धाः, तु संक्रुद्धाः (forतु संरव्धाः), (४)च (for तु), (-)व्रुवन् (for -भवन्), .

(०२) १,स (for ये), वहु (for भुवि),.

(०३) २,प्रणामं हि, प्रमाणं हि, ते प्रमाणं, ते प्रमाणा (for ते प्रणामं),.

(०४) ३, गण, पक्षाः, गणा यक्षाः (for गणात्पक्षात्), इव (for इह जाताश्र भूमिपाः .

(०५) ४,ते मदैति,तेतिमिंदन्,तेनिंदन्हि (forते निन्दन्ति),.

(०६) ५, प्रा(प्र)जापत्या, प्रजापति, प्रजापत्य,.

(०७) ६,राक्षसाः (,, चारणाः), केचित् (forते वै),दिव्य,स्तवैर् (forदिव्यैर्),.

(०८) ७,केचित् (forते वै),दिव्य,स्तवैर् (forदिव्यैर्),.

(०९) ८,अतोद्येन (forपरस्परं),गतेन (for गी), .

(१०) ९, महात्मनः (forनि),.

(११) २९, (१)प्रकृष्टाः (forहृष्टाः), (२) संस्तवंतो, प्रशशंसुर् (forसंस्तुवन्तो), (३)ब्राह्मणाश्चापि, सुप्रिताः, (४)पांडवा (forपार्थिवा), बलैः सह (forमहा), .

शशंसुर्निर्वृताः सर्वे दृष्ट्वा कृष्णस्य विक्रमम् ।

पाण्डवस्त्वब्रवीद्भ्रातॉन् सत्कारेण महीपतिम्।
दमघोषात्मजं वीरं संस्कारयत मा चिरम् ॥ ६५ ॥
कुरुराजवचश्श्रुत्वा भ्रातरस्ते त्वरान्विताः ।
तथा च कृतवन्तस्ते भ्रातुर्वै शासनं तदा ॥ ६६ ॥(०१)

पाण्डवस्त्वब्रवीद्भ्रातन्सत्कारेण महीपतिम् ॥(०२)

ततः स कुरुराजस्य क्रतुः सर्वसमृद्धिमान् ।
यूनां प्रीतिकरो राजन्स बभौ विपुलौजसः ॥(०३)
शान्तविघ्नः सुखारम्भः प्रभूतधनधान्यवान् ।
अन्नवान्बहुभक्ष्यश्च केशवेन सुरक्षितः ॥ (०४)
समापयासा च तं राजसूय महाक्रतुम् ।
तं तु यज्ञं महावाहुरा समाप्तेर्जनार्दनः ।
तं तु यज्ञं महाबाहुरासमाप्तेर्जनार्दनः ।
ररक्ष भगवाञ्छौरिः शार्ङ्गचक्रगदाधरः ॥(०५)

---

(०१) ३०, (१)(२)संस्काण, संस्कारार्थि (र्थ), पतिः, पते (forपतिम्),सर्वात्राजन्निदं वचः, (२)स तत्रोवाच तेवेशः,पितृष्वसृपतिं तदा, भगवान्), (३)शूरं (forवीरं), (४)संस्कार (रा)यत, सत्कारयत (for संसाधं),.

(०२)(इति कृष्ण (for कुरुराज) तु (for च), शासनात् (forनं),तथा, तथा (forतदा), भ्रातरस्ते त्वरान्विताः आहि तान्निक्रियादिभिः,.

(०३) ३२, (१)वैशं,) च (forस) (२)तदा (for क्रतुः),क्रतुऋ सर्वर्त्विग्भिर्युतः,सर्वकर्मसमृद्धिमान्, (३)राज्ञां (ज्ञः) यज्ञः (for यूनां), (४)स बभौ,सबलौ, बभौ स (for संबभौ),विपुलोद्भवः, विपु (म ) लोत्सवः,.

(०४) ३३, (१)शांतिर्विघ्नः, शांतविघ्न, सकु (शु)भकरः, शांतविघ्न (घ्नः) ससा (मुखा) रंभः, (२) धामियमान्,धान्यवत्,) (३)अन्नदान्, बहुभक्ष्यंश्च, भक्षश्च,अन्नवांश्चपि (भि) निर्वृत्तः, (४)सुरर्षितः,कैशवानाभिरक्षितः (पि रक्षितः, प्यभिष्टुतः),.

(०५) (१)तदा (for च तं), (२)यथाविधि (for महाक्रतुम् ),.

पञ्चविंशतिसाहस्रमश्वनां हेममालिनाम् ।
बाह्लीकः प्रददौ राजा पाण्डवाय महात्मने ।[०१]

चेदीनामाधिपत्ये च पुत्रमस्य महीपतेः ।
अभ्यषिञ्चत्तदा पार्थः सह तैर्वसुधाधिपैः ।। ६७ ।।[०२]

अस्मिन् पर्वणि ४६अध्याये ६७श्लोकाः सन्ति

शिशुपालवधपर्वणि(५) पञ्चमोऽध्यायः

इति श्रीमहाभारते शतसहस्रिकायां संहितायां सभापर्वणि शिशुपालवधपर्वणि शिशुपालवृत्तान्तकथने षट्चत्वारिंशोऽध्यायः ।। ४६ ।।

# ४७. सप्तचत्वारिंशोऽध्यायः

## 02- 05- 47

विस्तरेण राजसूयवर्णनम् ।। १ ।।

वैशम्पायनः -

ततः प्रववृते यज्ञो धर्मराजस्य धीमतः ।
शान्तविघ्नार्हणक्षोभो महर्षिगणसङ्कुलः ।। १ ।।

लक्षालङ्कारः-शान्तविघ्नार्हणक्षोभ इत्यत्र अर्हणात् क्षोभः शिशुपालस्य क्षोभः विघ्नश्चासावर्हणक्षोभश्च स शान्तो यत्र स तथोक्तः ।

तस्मिन्यज्ञे प्रवृत्ते तु वागीशा हेतुवादिनः ।

---

(०१) (४) (प्रययौ,राजन्).

(०२) ३१, (१)पत्ये तु, पत्येन (forपस्ये च ), (२)पुत्रस्य च (for पुत्रमस्य), महीपतेः, पुत्रं तस्याज्ञया हरेः, (३)अभ्यशिंचंस्तदा (था) पार्थाः), (४)सहितैर् (forसह तैर्),.

हेतुवादान् बहून् प्राहुः परपक्षजिगीषवः ॥ २ ॥[०१]

लक्षालङ्कारः-वागीशाः विद्याधीशाः ।

ददृशुस्ते नृपतयो यज्ञस्य विधिमुत्तमम् ।
उपेन्द्रस्येव विहितं सहदेवेन भारत ॥ ३ ॥[०२]

लक्षालङ्कारः-उपेन्द्रस्येव इत्यत्र देवैः सह वर्तमानः सहदेव इन्द्रः तेनोपेन्द्रस्य विहितं कर्मेव ।

ददृशुस्तोरणान्यत्र हेमतालमयानि च ।
दीप्तभास्करतुल्यानि प्रदीप्तानीव तेजसा ।
स यज्ञस्तोरणैस्तैश्च ग्रहैर्द्यौरिव सम्बभौ ॥ ४ ॥

शय्यासनविहारांश्च सुबहून्वित्तसम्भृतान् ।
घटान्पात्रीः कटाहानि कलशानि समन्ततः ।
न ते किञ्चिदसौवर्णमपश्यंस्तत्र पार्थिवाः ॥ ५ ॥

तद्यज्ञे न्यवसन्राजन्ब्राह्मणा भृशसत्कृताः ।
कथयन्तः कथां बह्वीं पश्यन्तो नटनर्तकान् ॥ ६ ॥

भुञ्जतां चैव विप्राणां स्वादु भोज्यं पृथग्विधम् ।
अनिशं श्रूयते तत्र मुदितानां महास्वनः ॥ ७ ॥

दीयतां दीयतामेवं भुज्यतां भुज्यतामिति ।
एवम्प्रकारास्सञ्जल्पाः श्रूयन्ते स्मात्र नित्यशः ॥ ८ ॥

ओदनानां विकाराणि स्वादूनि विविधानि च ।
सुबहूनि च भक्ष्याणि पेयानि मधुराणि च ।
ददुर्द्विजानां सततं राजप्रेष्या महाध्वरे ॥ १० ॥

---

(०१) (२) वाग्विदो (४) परस्पर
(०२) (१) उपेन्द्रबुद्ध्या

पूर्णे शतसहस्रे तु विप्राणां भुञ्जतां तदा ।
स्थापिता तत्र संज्ञाभूच्छङ्खोऽध्मायत नित्यशः ।। ११ ।।

मुहुर्मुहुः प्रणादस्तु तस्य शङ्खस्य भारत ।
उत्तमं शङ्खशब्दं तं श्रुत्वा विस्मयमागताः ।। १२ ।।

एवं प्रवृत्ते यज्ञे तु तुष्टपुष्टजनायुते ।
अन्नस्य बहवो राजन्नुत्सेधाः पर्वतोपमाः ।। १३ ।।

दधिकुल्याश्च ददृशुः सर्पिषां च ह्रदाञ्जनाः ।। १४ ।।

जम्बूद्वीपो हि सकलो नानाजनपदायुतः ।
राजन्नदृश्यतैकस्थो राज्ञस्तस्मिन्महाक्रतौ ।। १५ ।।

तत्र राजसहस्राणि पुरुषाणां ततस्ततः ।
गृहीत्वा धनमाजग्मुः तस्य राज्ञो महाक्रतौ ।। १६ ।।

राजानः स्रग्विणस्तत्र सुमृष्टमणिकुण्डलाः ।
तान् पर्यवीषन् विप्रान् शतशोऽथ सहस्रशः ।। १७ ।।(०१)

लक्षालङ्कारः-पर्यवीविषन् इत्यत्र अतिशयेन परिवेषयामासुः ।

विविधान्यन्नपानानि लेह्यानि विविधानि च ।
तेषां नृपोपभोग्यानि ब्राह्मणेभ्यो ददुः स्म ते ।। १८ ।।

नानाविधानि भक्ष्याणि स्वादुपुष्पफलानि च ।
गुलानि स्वादुक्षौद्राणि ददुस्ते ब्राह्मणेष्विह ।। १९ ।।

एतानि सततं भुक्त्वा तस्मिन्यज्ञे द्विजातयः ।
परां प्रीतिं ययुः सर्वे मोदमानास्तदा भृशम् ।। २० ।।

एवं समुदितं सर्वं बहुगोधनधान्यवत् ।। २१ ।।

---

(०१) ९१)तान्परीविविष

यज्ञवाटं नृपा दृष्ट्वा विस्मयं परमं ययुः ।
ऋत्विजश्च यथाशास्त्रं राजसूयं महाक्रतुम् ।
पाण्डवस्य यथाकालं जुहुवुः सर्वयाजकाः ॥ २२ ॥

निराक्रामंश्च शास्त्रज्ञा विधिवत्सर्वशिक्षिताः ।
व्यासधौम्यादयः सर्वे विधिवत्षोडशर्त्विजः ।
स्वस्वकर्माणि चक्रुस्ते पाण्डवस्य महाक्रतौ ॥ २३ ॥

नाषडङ्गविदत्रासीत्सदस्यो नाबहुश्रुतः ।
नाव्रतो नानुपाध्यायो नपापो नाक्षमो द्विजः ॥ २४ ॥

न तत्र कृपणः कश्चिद्दरिद्रो न बभूव ह ।
क्षुधितो दुःखितो वापि प्राकृतो वापि मानुषः ॥ २५ ॥

भोजनं भोजनार्थिभ्यो दापयामास सर्वदा ।
सहदेवो महातेजाः सततं राजशासनात् ॥ २६ ॥

सस्तरे कुशलाश्चापि सर्वकर्माणि याजकाः ।
दिवसे दिवसे चक्रुर्यथाशास्त्रार्थचक्षुषः ॥ २७ ॥

ब्राह्मणा वेदशास्त्रज्ञाः कथाश्चक्रुश्च सर्वदा ।
रेमिरे च कथान्ते तु सर्वे तस्मिन्महाक्रतौ ॥ २८ ॥

सा वेदिर्वेदसम्पन्नैः देवद्विजमहर्षिभिः ।
आबभासे तदा कीर्णा नक्षत्रैर्द्यौरिवामला ॥ २९ ॥

पाण्डित्यदर्शनार्थाय केचन द्विजसत्तमाः ।
तर्कार्थमागताः केचित्केचिद्विद्याभिमानिनः ॥ ३० ॥

केचिद्दिदृक्षया केचिद्भीत्या राज्ञः प्रतापिनः ।
सर्वेऽप्यवमृथस्नाता याजकाः केचन द्विजाः ॥ ३१ ॥

ततो वै हेमयूपांश्च सर्वरत्नसमाचितान् ।
शोभार्थं कारयामास सहदेवो महाद्युतिः ।। ३२ ।।

ददृशुस्तोरणान्यत्र हेमतालमयानि च ।
स यज्ञस्तोरणैस्तैश्च ग्रहैर्द्यौरिव सम्बभौ ।। ३३ ।।

तालानां तोरणैर्हैमैः दान्तैरिव दिशागजैः ।
दिक्षु सर्वासु विन्यस्तैः तेजोभिर्भास्करैर्यथा ।। ३४ ।।
सकिरीटैर्नृपैश्चैव शुशुभे तत्सदस्तदा ।। ३५ ।।
देवैरन्यैश्च यक्षैश्च उरगैर्दिव्यमानुषैः ।
विद्याधरगणैः कीर्णः पाण्डवस्य महात्मनः ।। ३६ ।।

स राजसूयः शुशुभे धर्मराजस्य धीमतः ।
गन्धर्वगणसङ्कीर्णः शोभितोऽप्सरसां गणैः ।
देवैर्मुनिगणैर्यक्षैर्देवलोक इवापरः ।। ३७ ।।

स किम्पुरुषगीतैश्च किन्नरैरुपशोभितः ।
नारदश्च जगौ तत्र तुम्बुरुश्च महाद्युतिः ।। ३८ ।।
विश्वावसुश्चित्रसेनस्तथान्ये गीतकोविदाः ।
रमयन्ति स्म तान्सर्वान्यज्ञकर्मान्तरेष्वथ ।। ३९ ।।
तत्र चाप्सरसस्सर्वाः सुन्दर्यः प्रियदर्शनाः ।
ननृतुश्च जगुश्चात्र नित्यं कर्मान्तरेष्वथ ।। ४० ।।
इतिहासपुराणानि आख्यानानि च सर्वशः ।
ऊचुर्वै शब्दशास्त्रज्ञा नित्यं कर्मान्तरेष्वथ ।। ४१ ।।

भेर्यश्च मुरजाश्चैव मड्डुका गोमुखाश्च ये ।

शृङ्गवर्णाम्बुजाश्चैव श्रूयन्ते स्म सहस्रशः ।। ४२ ।।[०१]

लक्षालङ्कारः-शृङ्गवर्णाम्बुजा इत्यत्र अम्बुजाः शङ्खाः, वर्णाः वाद्यविशेषाः ।

लोकेऽस्मिन्सर्वविप्राश्च वैश्याः शूद्राश्च सर्वशः ।
सर्वे म्लेच्छाः सर्ववर्णाः सादिमध्यान्तजास्तथा ।। ४३ ।।

नानादेशसमुद्भूतैर्नानाजातिभिरागतैः ।
पर्याप्त इव लोकोऽयं युधिष्ठिरनिवेशने ।। ४४ ।।

भीष्मद्रोणादयः सर्वे कुरवः ससुयोधनाः ।
वृष्णयश्च समग्राश्च पञ्चालाश्चापि सर्वशः ।। ४५ ।।

यथार्हं सर्वकर्माणि चक्रुर्दासा इव क्रतौ ।। ४६ ।।
एवं प्रवृत्तो यज्ञः स धर्मराजस्य धीमतः ।
शुशुभे च महाबाहो सोमस्येव क्रतुर्यथा ।। ४७ ।।
वस्त्राणि कम्बलांश्चैव प्रावारांश्चैव सर्वदा ।
निष्कहेमजभाण्डानि भूषणानि च सर्वशः ।
प्रददौ तत्र सततं धर्मराजो युधिष्ठिरः ।। ४८ ।।
यानि तत्र महीपेभ्यो लब्धं वा धनमुत्तमम् ।
तानि रत्नानि सर्वाणि विप्राणां प्रददौ तदा ।। ४९ ।।

**अस्मिन् पर्वणि ४७अध्याये ४९श्लोकाः सन्ति**

शिशुपालवधपर्वणि(६) षष्ठोऽध्यायः

इति श्रीमहाभारते सभापर्वणि शिशुपालवधपर्वणि शिशुपालवृत्तान्तकथने सप्तचत्वारिंशोऽध्यायः ।। ४७।।

---

(०१) (३) शृङ्गवंशाम्बुजाश्चैव

# ४८. अष्टचत्वारिंशऽध्यायः

## 02- 05- 48

युधिष्ठिरेण व्यासादीनां पूजनम् ।। १ ।। राज्ञां युधिष्ठिरमामन्त्र्य स्वस्वदेशगमनम् ।। २ ।। श्रीकृष्णस्य युधिष्ठिरादीनामन्त्र्य द्वारकां प्रति गमनम् ।। ३ ।।

वैशम्पायनः -

ततः स कुरुराजस्य तदा सर्वसमृद्धिमान् ।
यज्ञः प्रीतिकरो राजन्सम्बभौ विमलोत्सवः ।। १ ।।

शान्तविघ्नसमारम्भः प्रभूतधनधान्यवान् ।
अन्नवांश्चापि निर्वृत्तः केशवेनाभिरक्षितः ।। २ ।।

तस्य यज्ञं महाबाहुः आसमाप्तेर्जनार्दनः ।
ररक्ष भगवाञ्छौरिः शङ्खचक्रगदाधरः ।।
समापयत तदा राजा राजसूयं यथाविधि ।। ३ ।।
कोटीसहस्रं प्रददौ ब्राह्मणानां महात्मनाम् ।
न करिष्यति तं लोके कश्चिदन्यो महीपतिः ।। ४ ।।(०१)
याजकाः सर्वकामैश्च सततं ततृपुर्धनैः ।। ५ ।।(०२)
ततश्चावभृथस्नातः स राजा पाण्डुनन्दनः ।
व्यासं धौम्यं च प्रयतो नारदं च महामतिम् ।। ६ ।।(०३)
सुमन्तुं जैमिनिं पैलं वैशम्पायनमेव च ।

---

(०१) (२)यल्लोके (forत),.
(०२) ( )३,विप्राश्च (forसततं),.
(०३) ( )५,प्रतरो (forप्रयतो), मुनिं (for मतिम्), व्यासं धौम्यं वरिष्टं च प्रयतो लारदं भुनिं,.

याज्ञवल्कयं कठं चैव कलाप च महौजसम् ।[०१]

सर्वांश्च विप्रप्रवरान्पूजयामास सत्कृतान् ।। ७ ।।[०२]

युधिष्ठिरः

युष्मत्प्रभावात्प्राप्तोऽयं राजसूयो महाक्रतुः ।[०३]

जनार्दनप्रभावाच्च सम्पूर्णो मे मनोरथः ।। ८ ।।[०४]

वैशम्पायनः -

अथ यज्ञं समाप्यान्ते पूजयामास माधवम् ।[०५]

बलदेवं च देवेशं भीष्माद्यांश्च कुरूत्तमान् ।
समापयामास च तं राजसूयं महाक्रतुम् ।। ९ ।।

ततस्त्ववभृथस्नातं धर्मात्मानं युधिष्ठिरम् ।

समस्तं पार्थिवं क्षत्रमुपगम्येदमब्रवीत् ।। १० ।।[०६]

राजानः-

दिष्ट्या वर्धसि धर्मज्ञ साम्राज्यं प्राप्तवानसि ।
आजमीढाजमीढानां यशः संवर्धितं त्वया ।। ११ ।।

कर्मणैतेन राजेन्द्र धर्मश्च सुमहान्कृतः ।। १२ ।।[०७]

---

(०१) ( ) ७,कलं (forकंठ),कपालं (forकलापं),.

(०२) ( ) ८,स सर्वान् (forसर्वांश्च), चार्त्विक्प्र, क्रत्विक्प्र (for विपप्र),.

(०३) ( )९, प्रसादात् (forप्रभावात्),.

(०४) (१ )संपूर्ण मे मरोरथं,.

(०५) ( १) अर्ध (for अथ), (३)तस्य (for तं तु),यज्ञे (for यज्ञं), (४)आ (अ)समाप्ते, आसमाप्तं, जनार्दन,नं, ५.सौरिः, शंभुः (forशौरिः), ६.शंख (forशार्ङ्ग),.

(०६) (१)तथा (forततस्), अवभृत, भ्रत, स्नानं (forस्नातं), (२)धर्मात्मानं, राजो ष्ठिरः,
(३)समस्त,समग्रं, समर्थ (forतमस्तं), पार्थिव, सत्रम्,तत्रम् (forक्षत्रम्),
(४)उपा, उप,समा (for अभि),.

(०७) (१)राजन्वै, राजेन्द्र (forधर्मज्ञ), दिष्टचा वै राजन्), (२)चाप्त (for प्राप्त), असि, प्रभो (forविभो),

आपृच्छामो नरव्याघ्र सर्वकामैः सुपूजिताः ।
स्वराष्ट्राणि गमिष्यामस्तदनुज्ञातुमर्हसि ॥ १३ ॥(०१)

वैशम्पायनः -

श्रुत्वा तु वचनं राज्ञां धर्मराजो युधिष्ठिरः ।
यथार्हं पूज्य नृपतीन्भ्रातन्सर्वानुवाच ह ॥ १४ ॥(०२)

युधिष्ठिरः-

राजानः सर्व एवैते प्रीत्यास्मान्समुपागताः ।
प्रस्थिताः स्वानि राष्ट्राणि मामापृच्छ्य परन्तपाः ।
ते न व्रजत भद्रं वो विषयान्तं नृपोत्तमान् ॥ १५ ॥(०३)

**लक्षालङ्कारः-ते न व्रजत इत्यत्र ते यूयम् ।**

वैशम्पायनः-

भ्रातुर्वचनमाज्ञाय पाण्डवा धर्मचारिणः ।
यथार्हं नृपतीन्सर्वानेकैकं समनुव्रजन् ॥ १६ ॥(०४)
धृतराष्ट्रं च भीष्मं च विदुरं च महामतिम् ॥ १७ ॥

---

(३)अश्व, अजमी, नृपाणामज, (४)संपर्कितं, र्धितस्), ५.तेन,(अ)नेन (for (ए)तेन), ६.धर्मज्ञः (for श्र),कृतान् (for कृतः), यशश्व (धर्म च ) सुमहत्कृतं,.

(०१) (२)च (forसु), सकामैश्व न पूजिताः, (३)स्वराष्ट्रं दंतुमिच्छामस्,.

(०२) वैशं उ, (१)स्तुत्वा (forश्रु), तद्, च (forतु), (३)तथा हि, यथार्हा, पूजयित्वा तान्, प्रतिपूज्यैतान्, पूज्य धर्मात्मा), (४)सर्वान्भ्रातृन् (न्कामान्), इदम्(for सर्वान्),.

(०३) (१)एवेमे (for एवैते), (२)मां (for(अ) स्मान्), समुपागातान्)
(३)राज्यानि (for राष्ट्रणि), ममापश्छच), (४)मामापूज्य, ममापृच्छच,स्वागच्छत, मामा (ममा, माम) पृच्छन्, मावपृच्छप,,मापृच्छप),
५.तेनु (ते कु, अनु, तेन) व्रजंतु, तेनुप्रयात, अनुव्रजत,.६.नृपोत्तमाः,

(०४) (१)आकर्ण्य, आदाय (for आज्ञाय), (३)नृपतीन्सर्वान् (forनृपसुख्यां), (४)एकैकमनुवन्नजुः,तदैकैकनुव्रजान्,.

सञ्जयं च महात्मानं भीमसेनः प्रतापवान् ।[०१]
द्रोणं द्रोणायनिं चैव सामात्यं ससुहृद्गणम् ।। १८ ।।

भीष्मकं सहपुत्रेण मातुलं च महामतिम्

कृपं च बाह्लिकं चैव सहदेवो महामतिः ।। १९ ।।

दाक्षिणात्यांश्च सर्वांश्च हैडिम्बस्समनुव्रजत् ।।[०२]

नकुलः सुबलं राजन्सहपुत्रं समन्वयात् ।।

द्रौपदेयाः ससौभद्राः पर्वतीयान्महारथान् ।[०३]

शल्यं तु ससुतं वीरं सत्यकः परवीरहा ।

भगदत्तं च राजानं कौसल्यं बृहद्बलम् ।[०४]

विराटं चान्वयात् तूर्णं धृष्टद्युम्नः प्रतापवान् ।। २० ।।

भीष्मकं सह पुत्रेण मातुलं च महामतिम् ।
दाक्षिणात्यंश्च सवाश्चं हैडिम्बः समनुव्रजत् ।। २१ ।।[०५]

द्रौपदेयास्ससौभद्रा पार्वतीयान् महीपतीन् ।

अन्वगच्छंस्तथैवान्यान्क्षत्रियान्क्षत्रियर्षभाः ।। २२ ।।

एवं सुपूजिताः सर्वे जग्मुर्विप्राः सहस्रशः ।। २३ ।।[०६]

---

(०१) After Sl. 42 S ins.:.(१) विदुरं च महामतिम् ।(२)धृतराष्ट्रं च मारुतिः, भीमसेनः प्रतापवान्, (०२)(ए)व सुतं (forच ससुतं) वीरः, चैव (for वीरं), (४)युधां पति, (तिं), महाबलः, महामतिः, महीपतिः (forमहारथः),.

(०३) (१)सबलं, सौ (for सु), चैव (for राजन्),कृपं च ससुतं चैव,) (२)ससैन्यं च (for सहपुत्रं )समन्वियात्, अनुव्रजत् (for समन्वयात्),.

(०४) कृपं, शल्यं, क्रथं (द्रोणं ), तु (forच),तु सुमितं, सह सुतः शारदृतं,.

(०५) (पं:१) द्युतिं (ऽ. मतिम्). (पं:२) नृपतीन् (ऽ. सर्वोश्च). ऋद्धियः (ऽ. हैडिम्बः). (३)दॄौपदीयाः. ससौभदॄान्. (४)पर्वतीयान्. महाबलान्, महाथान्, महामतीन् (ऽ. मही).

(०६) (१)अनु (for अन्व), च,(इ)व, वा (for (ए)व), (अ)न्ये (for (अ)न्यान्), (२)पुरुषर्षभाः (भः, भान्), क्षत्रियर्षभान्, पार्थिवान् (वाः) कुरवोपरे, (३)सुपूजिताः, सर्वे, ते तु, तेन (for ते वै),एवं नृपाः

गतेषु पार्थिवेन्द्रेषु सर्वेषु ब्राह्मणेषु च ।
युधिष्ठिरमुवाचेदं वासुदेवः प्रतापवान् ॥ २४ ॥[०१]

After Sl 45, ins.:

कृतार्थं पाण्डवं दृष्ट्वा सिंहासनगतं नृपम् ।
रोचमानं महेन्द्राभं वासुदेवोऽब्रवीद्बली ॥ २५ ॥

आपृच्छे त्वां गमिष्यामि द्वारकां कुरुनन्दन ।
राजसूयं क्रतुश्रेष्ठं दिष्ट्या त्वं प्राप्तवानसि ।[०२]
तमुवाचैवमुक्तस्तु धर्मराण्मधुसूधनम् ॥ २६ ॥

युधिष्ठिरः

तव प्रसादाद्गोविन्द प्राप्तः क्रतुवरो मया ।[०३]
क्षत्रं समग्रमपि च त्वत्प्रसादाद्वशे स्थितम् ।
उपादाय बलिं मुख्यं मामेव समुपस्थितम् ॥ २८ ॥

ते वयं त्वामृते वीर न रंस्यामः कथञ्चन ।[०४]
कथं त्वद्गमनार्थं मे वाणी वितरतेऽनघ ।
न ह्यहं त्वामृते वीर रतिं प्राप्नोमि कर्हिचित् ।

---

(पान्) पूजितास्ते (एवं नृपास्ते सर्वेपि), (४)सहस्त्रशः (forच सर्वशः).

(०१) ४५, (२)ब्रा (ब्र)ह्मणेषु च, पुरुषर्षभ, भरतर्षभः, (३)(४)युधिष्टिरः सहामात्यः प्रविवेश पुरोत्तमं,.

(०२) (१)(२)त्वा, त्वं (for त्वां), सहाराजा (for गमि), सत्तम (for नन्दन),कृतकृत्योस्मि कौन्तेय गमिष्ये द्वारकां पुरीं,)

(३)क्रंतु श्रेष्टं, क-तं श्रेष्टं) (४)स (forत्वं) प्राप्नुयानु (forप्रात्पवान्), नृप,नृपः (for असि),.

(०३) (१)(ए)व (for (ए) वम्), उक्ते तु, कृष्णस्तु (for उक्तस्तु), (२)धर्मराजो जनार्दन (युधिष्टिरः) धर्मात्मा मधुसूदनं, धर्मवामिनधु,) (३ त्वत्प्रसादाच्च गोविंद,)

(४)अमि, असि (for अस्मि), च (forवै), कृतः,क्रतुः (for क्रतुम्), प्राप्तः क्रतुवरो मया,.

(०४) (१)समग्रं,ग्र्यं (for स्तं), क्षत्रं समग्रमपि च (मापेन, मात्पन्नस्),

(२)तत्प्रसादाद्, वशे (शो) स्थितं, वशायुगं (for वशानुगम्),

(३)बली, धनं (for बलिं), (४)ममेव, मामेवं,समुपागताः, मामेवा समुपास्थितं,.

अवश्यं चैव गन्तव्या भवता द्वारकापुरी ।। २९ ।।[०१]

एवमुक्तः स धर्मात्मा युधिष्ठिरसहायवान् ।

अभिगम्याब्रवीत्प्रीतः पृथां पृथुयशा हरिः ।। ३० ।।[०२]

साम्राज्यं समनुप्राप्ताः पुत्रास्तेऽद्य पितृष्वसः ।

सिद्धार्था वसुमन्तश्च सा त्वं प्रीतिमवाप्नुहि ।।[०३]

अनुज्ञातस्त्वया चाहं द्वारकां गन्तुमुत्सहे ।। ३१ ।।

सुभद्रां द्रौपदीं चैव सभाजयत केशवः ।। ३२ ।।[०४]

After Sl 52ab, S ins.:

एवमुक्त्वा ततश्शौरिः भगिनीं वै पितुस्तदा ।[०५]

निष्क्रम्यान्तःपुरात्तस्माद्युधिष्ठिरसहायवान् ।

स्नातश्च कृतजप्यश्च ब्राह्मणान्स्वस्ति वाच्य च ।। ३३ ।।[०६]

ततो मेघवपुःप्रख्यं स्यन्दनं च सुकल्पितम् ।

---

(०१) ४९, (१)न ह्यहं, नैवाहं, ते वयं (for न वयं), वै विना, वै क्रते, त्वा क्रते, त्वा क्रते (for त्वामृते), वीरं), (२)रमामेह, त्वां रंस्येत्र, रंस्ये (त्वां रस्ये)एक,स्थास्यामो ह, न रंस्याम (मः) (for रंस्यामहे), कदाचन, रतिं प्रप्नोमि (प्राप्नोस्मि ) कर्हिचित्) (३)चैव, वापि (for चापि), गंतव्यं, व्य (for व्या), (४) त्वया (यथा) द्धारवतीं (ती) पुरीं (रं) भवता द्वारका पुरि (पुरीं),.

(०२) ५०, (१)तु (for,), गोविंदो (for धर्मात्मा), (२)सहायकः, (३)वीरः, वीर (for प्रतिः), (४)कुंतीं (forपृथां), विभुः (भुवि (for हरिः),.

(०३) हरिरुवाच, (१)अनुसंप्राप्ताः, सुमहत्प्राप्ताः, समनुप्राप्तः, (२)पुत्रस्ते, ह (for -द्य),
(३)वि (for सि), (४)सांत्वं (for सा त्वं), अवाप्स्यसि (for प्नहि), सदा त्वं प्रीतिमाप्नुहि,.

(०४) (१)(अ)हं च, चेह, .

(०५)(३)सुभद्रा द्रौपदी चैव, (४)सभाजयति,संभावयत (ति), अथ पप्रच्छ, आपप्रच्छ स,आपृच्छय स तु, सभाजयत ,.

(०६) (१)निष्कामियान्तः, निष्कमान्तः, तस्माद्, चापि (for चैव), (३)सांतश्व, स्नातकान्, स्नात्वा च (for स्नातक्ष), कृतकृत्यश्र, जाप्यश्र, विप्रश्व, जल्पश्र (for जप्यश्र), समंगलो जप्तजप्यो,
(४)स्वस्ति (स्त्य) वाचयत् (कान्, यन्), ह (forच),.

योजयित्वा महाबाहुर्दारुकः समुपस्थितः ।। ३४ ।।(०१)

उपस्थितं रथं दृष्ट्वा तार्क्ष्यप्रवरकेतनम् ।

युधिष्ठिरकिरीटिभ्यां दत्तहस्तो ययौ रथम् ।। ३५ ।।

प्रदक्षिणमुपावृत्य समारुह्य महामनाः ।।

दारुकस्य करं गृह्य तत्रोच्चतलमाविशत् ।। ३६ ।।

सुखास्तरणसंवीतं सोपधानं गवाक्षितम् ।

प्रययौ पुण्डरीकाक्षस्ततो द्वारवतीं पुरीम् ।। ३७ ।।(०२)

वीजयामासतुस्तत्र चामराभ्यां हरिं तथा ।। ३८ ।।

बलदेवश्च देवेशो यादवाश्च सहस्रशः ।(०३)

प्रययू राजवत्सर्वे धर्मपुत्रेण पूजिताः ।। ३९ ।।(०४)

ततः स सम्मतं राजा हित्वा सौवर्णमासनम् ।।(०५)

तं पद्भ्यामनुवव्राज धर्मराजो युधिष्ठिरः ।। ४० ।।

भ्रातृभिः सहितः श्रीमान्वासुदेवं महाबलम् ।(०६)

After Sl.56, T1 G5 ins.:

कार्यमानुषरूपं वै विष्णुं सर्वगुरुं प्रभुम् ।। ४१ ।।

वायोर्दूतनापरप्रख्यगतिं कुर्वाणमग्रतः ।

---

(०१) (१)नवं, रवं, वपु, चय, वना (forवर), (२)च (forवै), नवकं, चानुक, सुप्रक, सुर्यसंनिभं (forवै सुक), (३)(४)बाहुर (for राज), समुप, समुपा (forप्रत्युप) ददर्श कलितं द्धरि श्रेताश्वैर्यो जितं हरिः,.

(०२) (२)तार्क्ष, शूकर (for प्रवर), (३)(४)अपवृत्य, महात्मानाः, त्मनां (for मनाः), दारुकस्य करं गृह्य तत्रोलितमाविशत्, ५.६.प्रययुः, द्धारवती, मुखास्तरणसंवीतं सोपयानं गवाश्रितं,.

(०३) ३,यादवैश्च (for वाश्च),.

(०४) ४,प्रययौ (for यू), पूजितः (forताः), रथमारुह्य निर्जग्मुः राजमार्गेण वै पुरें,.

(०५) ५, ससंभ्रमं, स हि समं, सुसंमतं (for स संमतं),.

(०६) (१)अन्वयाद्राजा (for अनुवव्राज), ततः (तं तु )जद्भ्यामनुप्रायाद् (प्राप्तो), पुत्रो (forराजो),(३)(४)धीमान् (forश्रीमान्), वासुदेव, वो,महारथः,रथं,बलः (forबलम्), भ्रतृभिर्ब्राह्मणैः,सार्धमृषि भिवैगपारगैः,.

ततो मुहूर्तं सङ्गृह्य स्यन्दनप्रवरं हरिः ।
अब्रवीत्पुण्डरीकाक्षः कुन्तीपुत्रं युधिष्ठिरम् ॥ ४२ ॥(०१)

श्रीभगवान्

अप्रमत्तस्थितो नित्यं प्रजाः पाहि विशाम्पते ॥ ४३ ॥

पर्जन्यमिव भूतानि महाद्रुममिव द्विजाः ।

बान्धवास्त्वोपजीवन्तु सहस्राक्षमिवामराः ॥ ४४ ॥(०२)

वैशम्पायनः

कृत्वा परस्परेणैवं संविदं कृष्णपाण्डवौ ।
अन्योन्यं समनुज्ञाप्य जग्मतुः स्वगृहान्प्रति ।(०३)

गते द्वारवतीं कृष्णे सात्वतप्रवरे नृप ॥ ४५ ॥

युधिष्ठिरो महाराज प्रविवेश पुरं ततः ॥ ४६ ॥(०४)

एको दुर्योधनो राजा शकुनिश्चापि सौबलः ।
सूतपुत्रश्च राधेयः सह दुश्शासनादिभिः ॥ ४७ ॥

तस्यां सभायां दिव्यायामूषतुस्तौ नरर्षभौ ।(०५)

After Sl. 60 ab, N1 S ins.:

---

(०१) (२)स्यंदनं प्रवरं, हरिं, प्रभुः, विभुः (for हरिः), (३)
(४)उवाच (for अब्रवीत्), धर्मराजं परिष्वज्य प्रोवाच वदतां वरः, सूतं संचोद्य नेत्राभ्यां युधिष्ठिरमभाषत,.

(०२) भदवान्,
(१)अप्रमत्तोत्थितो, मत्तस्थितो, मत्तोस्थितो, संप्रस्थितो,
(२)प्रजानां हि (forप्रजाः पाहि), महाद्युते, विशां पतेः,
(३)पर्जन्य इव), (४)द्रुम (for द्रुमम्), इवांडजान्, इव दि्जाः, इवांडजं), ५.सुहृदः, बांधवः, ब्राह्मणाः (for बान्धवााः), चाप,त्वाप, त्वानु,चोप (for त्वोप), त्वा,.

(०३) (१)(ए)व, (इ)दं (for (ए)वं), (२)संवादं, विदं, (३)समनुज्ञाय), (४)प्रत्ययात्कुरुनंदनः,.

(०४) सहासात्यः, सहाराज, रहातेजाः, पुरिं, पुरात् (for पुरं),पुरं महत्,पुरोत्तमं (for पुरं .

(०५) (१)पुनर् (पुर) (for गते), द्वारावतीं, क-ष्णः (ष्ण),
(२)सांत्वत, स्त्वते, स्त्वत (सत्वतः, सत्वत )प्रवरो (सांतःपुरवरो), नृपः, पे (for प).

युधिष्टिरो महाराजः प्रवीवेश पुरं ततः ।[०१]

सर्वकामगुणोपेतैः अर्च्यमानस्तु भारत ।
सभायां रमणीयायामवसंस्तत्र पाण्डवैः ।। ४८ ।।[०२]

**अस्मिन् पर्वणि ४८अध्याये ४८ श्लोकाः सन्ति**

शिशुपालवधपर्वणि(७) सप्तमोऽध्यायः

इति श्रीमहाभारते शतसहस्रिकायां संहितायां सभापर्वणि शिशुपालवधपर्वणि
शिशुपालवृत्तान्तकथने पञ्चचत्वारिंशोऽध्यायः ।। ४८ ।।

(समाप्तं शिशुपालवधपर्व)

---

(०१) (१)सहामात्यः महाराज, महोतेजाः पुरी, पुराद् (ऽ. पुरं महत्,पुरोत्तमं (ऽ. पुरं ततः) वैशं),
(३)दुर्योधनो महाराज (जा), (४)च महाबलः, चापि कौशलः,चैव सौबलः, च स सौबलः, परंतपः (प) (for चापि सौबल),.

(०२) नरर्षभ, नराधिप , सभायां रमणीयायामवसंस्तत्र पांडवैः (सन्पांडवैः सह, संस्तत्र पांडवाः),